११६

१-१४२ प.
१४३-२२२ पृ.

1.

शंकर कृत मीमांसा भाष्य पर
वाचस्पति मिश्र विरचित अ. २ पा. ४ पत्र ६२ तक

~~शारीरक भाष्य वृत्त~~

~~पाद भामती~~

~~।।। अत्र पंचपाद~~

~~पाद~~

प. २४२ पर प्रथम
अध्याय समाप्त.

श्रीगणेशाय नमः अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो विवर्त्ता यस्यैते वियदनिलते।
जोऽबवनयः यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं नमामस्तद्ब्रह्मापरिमितसुखज्ञान
ममृतं १ निश्वसितमस्य वेदा वीक्षितमेतस्य पंचभूतानि स्मितमेतस्य चराचरमस्य च सु
प्तं महाप्रलयः २ षड्भिरंगैरुपेताय विविधैरव्ययैरपि शाश्वताय नमस्कुर्मो वेदाय च भ
वाय च ३ मार्तंडतिलकस्वामिमहागणपतीन्वयं विश्ववंद्यान्नमस्यामः सर्वसिद्धिवि
धायिनः ४ ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे ज्ञानशक्त्यवताराय नमो भगवतो ह
रेः ५ नत्वा विशुद्धविज्ञानं शंकरं करुणाकरं भाष्यं प्रसन्नगंभीरं तत्प्रणीतं विभज्यते
६ आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनां रथ्योदकमिव गंगाप्रवाहपातः
पवित्रयति ७ अथ यदसंदिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरः यथा
समनस्केंद्रियसन्निकृष्टः स्फीतालोकमध्यवर्ती घटः करटदंता वा तथा चेदं ब्रह्मेति
व्यापकविरुद्धोपलब्धिः तथाहि बृहत्त्वाद्बृंहणत्वाद्वात्मैव ब्रह्मेति गीयते स चाब्र
ह्मकीटपतंगेभ्य आ च देवर्षिभ्यः प्राणभृन्मात्रस्येदंकारास्पदेभ्यो देहेंद्रियमनोबुद्धिवि ऊ.
षयेभ्यो विवेकेनाहमित्यसंदिग्धाविपर्यस्तापरोक्षानुभवसिद्ध इति न जिज्ञासास्पदं १
नहि जातु कश्चिदत्र संदिग्धेऽहं न वेति नापि विपर्यस्यति नाहमेवेति न चाहं कृ
शस्थूलो गच्छामीत्यादिदेहधर्मसामानाधिकरण्यदर्शनाद्देहालंबनोऽयमहंकार

वाच. भू. २

तेनीयः सचेदयमनादिरनादिनात्मयाथात्म्यज्ञानेन सहावर्त्तते कुतोस्य निवृत्तिरवि।
रोधात् कुतश्चात्मयाथात्म्यानुभवः नखल्वहमित्यनुभवादन्यदात्मयाथात्म्यज्ञानमस्ति
नचाहमिति सर्वजनीनस्फुटतरानुभवसमर्थितमात्मा देहेन्द्रियादिव्यतिरिक्तः शाक्यउ
पनिषदां सहस्रैरप्यपवादयितुमनुभवविरोधात् नह्यागमाः सहस्रमपि घटं पटयितु
मीशते तस्मादनुभवविरोधात् उपचरितार्था एवोपनिषद इति युक्तमुत्पश्यामः उ
त्पाशयवानाशंकां परिहरति युष्मदस्मत्प्रत्ययगोचरयोरिति अत्र च युष्मदित्यादि
मिथ्याभवितुं युक्तमित्यन्तः शंकाग्रन्थः तथापीत्यादिः परिहारग्रन्थः तथापीत्यभिसं
बन्धात् शंकायामपि यद्यपीति पठितव्यं। इदमस्मत्प्रत्ययगोचरयोरिति वक्तव्ये युष्मद्ग्रह
2 णमत्यन्तभेदोपलक्षणार्थं यथाहंकारप्रतियोगी त्वंकारो नैवमिदंकारः एते वयमि
मे वयमास्महे इति बहुलं प्रयोगदर्शनादिति चिदात्मा विषयी जडस्वभावा बु
द्धीन्द्रियदेहविषया विषयाः एते हि विद्यमानं विषयिणं विषिण्वन्ति अवबध्नन्ति स्वेन रूपेण नि
रूपणीयं कुर्वन्तीति यावत् परस्परानध्यासहेतावत्यन्तवैलक्षण्ये दृष्टान्तः तमःप्रका उ.
शवदिति नहि जातु कश्चित्समुदाचरद्वृत्तिनी प्रकाशतमसी परस्परात्मतया प्रतिपत्तु २
मर्हति तदिदमुक्तमितरेतरभावानुपपत्ताविति इतरेतरभाव इतरेतरत्वं तादात्म्य
मिति यावत् तस्यानुपपत्ताविति स्यादेतन्मा भूद्धर्मिणोः परस्परभावः तद्धर्माणां

इतिसांप्रतं तदालंबनत्वेहि योऽहंबाल्येपितरावन्वभूवंसएवस्थाविरेप्रनप्तॄननुभवामी
तिप्रतिसंधानेनभवेत् नहिबालस्थविरशरीरयोरस्तिमनागपिप्रत्यभिज्ञागंधः येनै
कत्वमध्यवसीयेत तस्मात्तेषुव्यावर्त्तमानेषुयदनुवर्त्ततेतत्तेभ्योभिन्नंयथाकुसुमेभ्यः
सूत्रंतथाचबाल्यादिशरीरेषुव्यावर्त्तमानेष्वपिपरस्परमहंकारास्पदमनुवर्त्तमानंतेभ्यो
भिद्यते अपिच स्वप्नांतेदिव्यंशरीरभेदमास्थायतदुचितान्भोगान्भुंजानएवप्रतिबु
द्धोमनुष्यशरीरमात्मानंपश्यन्नाहदेवोमनुष्यएवेतिदेवशरीरेबाध्यमानेप्यहमा
स्पदमबाध्यमानंशरीराद्भिन्नंप्रतिपद्यते अपिच योगाद्यात्रः शरीरभेदेष्वात्मान
मभिन्नमनुभवतीति नाहंकारालंबनंदेहः अतएवनेंद्रियाण्यपितदालंबनं इंद्रिय
भेदेपियोहमद्राक्षंसएवेदानींस्पृशामीत्यहमालंबनस्यप्रत्यभिज्ञानात् विषयेभ्य
स्तस्यविवेकःस्पष्टीयानेवबुद्धिमनसोश्चकरणयोरहमितिकर्तृप्रतिभासप्रसंगा ।
त्वानालंबनत्वायोगात् कृशोहं योहमित्यादयस्तुप्रयोगास्तत्त्वभेदकपवि
वेचाः क्रोणेनीलादिवदौपचारिका इति युक्तमुत्पश्यामः तस्मादिदंकारास्पदंदेभ्यो
देहेंद्रियमनोबुद्धिविषयेभ्योव्यावृत्तः स्फुटतरमहमनुभवगम्यः आत्मास्यथायाभा
नादनित्यस्यइतिसिद्धं अप्रयोजनत्वाच्च तथाहिसंसारनिवृत्तिरपवर्गो इह प्रयो
जनंनित्यं तस्मिन्संसारआत्मसापाप्मान्मानमनुभवतिमित्रआत्मसपाप्मान्यज्ञानेननिव

वाच॰
प्र॰
३

ध्रुतितन्मन्त्राणिसंहतिशाक्यानिक्वकोणामुपचरितार्थानिकर्तृत्वभ्यासेहिभूयस्त्वमर्थस्यभ
वति यथाहोदर्शनीयाहोदर्शनीयेतिनन्यूनत्वमपिप्रागेवोपचरितार्थत्वमिति अहम
नुभवरूपआदेशिकानेकविधशोकदुःखादिप्रपंचोपप्लुतमात्मानमादर्शयन् कथ
मात्मतत्त्वगोचरःकथंचानुपप्लवः नचज्ञेयेषुप्रमाणप्रत्यक्षविरोधादाम्नायस्यैवत
दर्थत्वस्याप्रामाण्यमुपचरितार्थत्वंवेतियुक्तं तस्यापौरुषेयतयानिरस्तसमस्तदोषा
शंकस्यबोधकतयाचस्वतःसिद्धप्रमाणभावस्यस्वकार्येप्रमितौपरानपेक्षत्वात् ।
प्रमितावनपेक्षत्वेप्युत्पत्तौप्रत्यक्षापेक्षत्वात् तद्विरोधादनुत्पत्तिलक्षणमप्रा
माण्यमितिचेत् नोत्पादकाप्रतिद्वन्द्वित्वात् नह्यागमज्ञानंसांव्यावहारिकंप्रत्यक्षस्य

3

प्रामाण्यमुपहंतियेनकारणाभावान्नभवेत् अपितुतात्विकं नचतस्योत्पादकंता
त्विकप्रमाणभावेभ्यापिसांव्यावहारिकेप्रत्यक्षसंभवान्तोत्पत्तिदर्शनात् तथाचवर्णे
ष्वपिह्रस्वदीर्घत्वादयोन्यधर्माअपिसमारोपितास्तत्वप्रतिपत्तिहेतवः नहिलौकिक
नागइतिवानगइतिवापदात् कुंजरंवाननकंवाप्रतिपद्यमानाभवतिभ्रांताः नचा उ॰
नन्यपरंवाक्यंस्वार्थेउपचरितार्थंयुक्तं उक्तंहि नविधौपरःशब्दार्थइति ज्योष्टत्वे ३
चानपेक्षितस्यबाध्यत्वेहेतुर्नबाधकत्वेरजतज्ञानस्यानपसंः शुक्तिज्ञानेनकनीयसा
बाधदर्शनात् तदनपबाधनेचतदपबाधात्मनस्तस्योत्पत्तेरनुपपत्तेः दर्शितंचैता

तुनाद्युच्चैतन्यमनित्यत्वादीनामितरेतरत्राध्यासो भविष्यति इष्यते हि धर्मिणोरविवेकग्रहे ।
पि तद्धर्माणामध्यासः यथा जपाकुसुमाद्भेदेन गृह्यमाणेपि स्फाटिकमणावति स्वच्छत
याजपाकुसुमबिंबोद्ग्राहिण्यः रुणः स्फटिकद्रव्यारुणः विभ्रमइत्यतउक्तं तद्धर्माणाम
पीति इतरेतरत्र धर्मिणोर्धर्माणां भावेवि निमयस्तस्यानुपपत्तिः अयमभिसंधिः रूप
वद्धि द्रव्यमति स्वच्छतया रूपवतो द्रव्यांतरस्य तद्विवेकेन गृह्यमाणस्यापि छायां गृह्णीयात
चिदात्मा त्वनीरूपो विषयी न विषयच्छायामुद्गृहीतुमर्हति यथाहुः शब्दगंधरसादीनां
कीदृशी प्रतिबिंबतेति तदिह परिशेष्याद्धि धर्मिविषयिणोरन्योन्यात्मसंभेदेनैव तद्धर्मा
णामपि परस्परसंभेदेन विनिमयात्मना भवितव्यं तौ चेद्धर्मिणावसंततविवेकेन गृह्यमा
नावसंभिन्नौ असंभिन्नाः सुतरां तयोर्धर्माः स्वाश्रयाभ्यां व्यवधानेन दूरापेतत्वात् तदिद
मुक्तं सुतरामिति तद्धि पर्यायेणोक्तं विषयविषयिणोर्मिथ्याशब्दोपह्नववचनः एत
दुक्तं भवति अध्यासो भेदाग्रहणाध्यासः तद्विरुद्धश्चेह चास्ति भेदग्रहः सोयं हं निवर्तयंस्त
द्धास्मध्यासं निवर्तयतीति मिथ्येति भवितव्यमुक्तं यद्यपि तत्त्वापीतिर्योजना इदमत्राकूतं
भवेदेतदेवं यद्यहमित्यनुभवे आत्मतत्त्वं प्रकाशेत नत्वेतदस्ति तथाहि समस्तोपाध्यन ।
वच्छिन्नानंतानंदचैतन्यैकरसमुदासीनमेकमद्वितीयमात्मतत्त्वं श्रुतिस्मृतीतिहासपुरा
णेषु गीयते न चैतान्युपक्रमपरामर्शोपसंहारैः क्रियासमभिहारेण इदमात्मतत्त्वमभिद ।

वा॰व॰ प्र॰ ४

तीति नचबालस्थविरशरीरभेदेपि सोहमित्येकस्यात्मनः प्रतिसंधानात्तदेहात्देहादिभ्यो
भेदेनात्मनात्मानुभवइतिवाच्यं परीक्षिकाणां त्वत्स्वपक्षपातलौकिकानांपरीक्षकाअपिव्य
वहारसमयेनलोकसामान्यमतिवर्त्तंते वक्ष्यतनंतरमेवहिभगवान्भाष्यकारः पश्वादि
भिश्चाविशेषादिति वाह्याअप्याहुः शास्त्रचिंतकाः त्वत्स्वयंचिंतयंतिनप्रतिपत्तारइति
तत्पारचोषणाच्चिदात्मगोचरमहंकारमहमिहास्मिसदनइतिप्रयुंजनोलौकिकः शरीराद्य
भेदग्रहादात्मनःप्रादेशिकत्वमभिमन्यतेनभसइवघटमणिकमल्लिकाद्युपाध्यवच्छेदा
दितियुक्तमुत्पश्यामः नचाहंकारप्रमाणायदेहादिवदात्मापिप्रादेशिकइतियुक्तं तद
त्वत्वमणुपरिमाणोवास्याद्देहपरिमाणोवा अणुपरिमाणत्वेस्थूलोहंदीर्घइतिचनस्यात्
देहपरिमाणत्वेतत्सावयवत्वपादेहवदनित्यत्वप्रसंगः किंचास्मिन्पक्षेवयवसमुदायोवाचे
तयेत् प्रत्येकंवाअवयवाः प्रत्येकचैतन्यपक्षेवहूनांचेतनानांस्वतंत्राणामेकवाक्याभावाभा
वादपर्यायेणविरुद्धदिक्क्रियत्वपाशरीरमुन्मथ्येताक्रियंवाप्रसज्येतसमुदायस्यतुचैतन्ययोगे
हस्तगएकस्मिन्नवयवेविदात्मनोप्यवयवोहस्तगइतिनचेतयेत् नचवहूनामवयवानांपरस्प
राविनाभावनियमोदृष्टः यथावयवप्रक्रिष्टत्तदाभावेनचेतयेतविज्ञानालंवनत्वेप्यह
प्रत्ययस्यभ्रांतत्वंतदवस्थमेव तस्यस्थिरवस्तुनिर्भासित्वात् अस्थिरत्वाच्चविज्ञानानां एतेन
स्थूलोहमहमधोगच्छामीत्यादयोऽप्यध्यासतयाव्याख्याताः तदेवमुक्तेनक्रमेणाहंप्रत्य

4

रुं॰ ५

विकल्पमाणभावपेक्षात्वं तथाच पारमर्षं सूत्रं पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदित्याम
स्वबलीयस्त्वं तत्र नाम प्रतीयते यत्रान्योन्यनिरपेक्षाणां यत्र जन्मधियां भवेदिति अपि च
येष्वहंकारास्पदमात्मानमास्थिप ततेरण्यस्य न तात्त्विकत्वमभ्युपेतव्यं अहमिहेवा
स्मि सदने जानानः इति सर्वव्यापिनः प्रादेशिकत्वेन ग्रहात् उच्चतरगिरिशिखरप
रिवर्तिषु महातरुषु भूमिषु सत्स्वपि बलनिर्भासप्रत्ययवत् न चेदं देहस्य प्रादेशि
कत्वमनुभूयते न त्वात्मनः इति सांप्रतं नहि तदेवं भवति अहमिति गौणत्वेनानजाना
नः इति अपि च परशब्दः परत्र लक्ष्यमाणगुणयोगेन वर्तत इति यत्र प्रयोक्तृप्रतिपत्त्रोः
संप्रतिपत्तिः स गौणः स च भेदप्रत्ययपुरःसरः तद्यथा नैयमिकाग्निहोत्रवचनोऽग्निहो
त्रशब्दः प्रकरणान्तरादवधृतभेदे कौण्डपायिनामयनगते कर्मणि मासमग्निहोत्रं जुहो
तीत्यत्र साध्यसादृश्येन गौणः माणवके चानुभवसिद्धे भेदे सिंहात्सिंहशब्दः न
त्वकारस्य नुत्वाय्योनिर्लोठितगर्भतया देहादिभ्यो भिन्नोऽनुभूयते येन परशब्दः शरी
रादौ गौणो भवेत् न चासंततनिरूढतया गौणोऽपि न गौणत्वाभिमानः सार्षपादिषु तैल
शब्दवदिति वदितव्यं तत्रापि हि स्नेहात्तिलभवात् भेदसिद्धः एवं सार्षपादीनां तैलशब्दवा
च्यत्वमापन्नाभिमानो न तत्र्पयोः तैलसार्षपयोरभेदाध्यवसायः न तु सिद्धगौणत्व मावा
विवेकविज्ञाने नवाप्यं तदिह व्यापकं विवेकविज्ञानं निवृत्तमान गौणतामपि निवर्तयेन्

वाच. सू. ५

संकीर्णेनाविवेकः स्यादेतत् द्विविधयोर्वस्तुसतोर्भेदाग्रहनिबंधनस्तादात्म्यविभ्रमो युज्यते ।
शुक्तेरिव रजताद्भेदाग्रहे रजततादात्म्याग्रहः इह तु न परमार्थसतश्चिदात्मनोऽसंततमिन्नं देहाद्यस्तिव
स्तुसत् तत्कुतश्चिदात्मनो भेदाग्रहः कुतश्च तादात्म्यविभ्रम इत्यत आह सत्यानृते मिथुनी
कृत्य विवेकाग्रहादध्यस्येति योजना सत्यं चिदात्मा अनृतं बुद्धीन्द्रियदेहादि ते द्वे धर्मिणी मिथु
नीकृत्य युगलीकृत्य न च संवृतिपरमार्थसतोः पारमार्थिकं मिथुनमस्तीत्यभूततद्भावार्थश्च्वेः
प्रयोगः एतदुक्तं भवति अप्रतीतस्यारोपायोगात् आरोप्यस्य प्रतीतिरुपयुज्यते न तु वस्तुसत्तेति
स्यादेतत् आरोप्यप्रतीतौ समारोपः पूर्वदृष्टस्य समारोपः समारोपनिबंधना च प्रतीतिरितीतरेत
रं परस्पराश्रयत्वमित्यत आह नैसर्गिक इति स्वाभाविकोऽनादिरयं व्यवहारः व्यवहारानादि
तया तत्कारणाध्यासस्यानादिता उक्ता ततश्च पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरा
देस्तत्तदुत्तराध्यासोपयोग उत्पत्तिनादित्वाद्बीजांकुरवन्न परस्पराश्रयत्वमित्यर्थः स्यादेतत् अस्तु
पूर्वप्रतीतिमात्रमुपयुज्यते आरोपेण तु प्रतीयमानस्य परमार्थसत्ता प्रतीतिरेव तत्त्वं मता सतोपाग
नकमलिनीकल्पस्य देहेन्द्रियादेर्नोपपद्यते प्रकाशमानत्वं हि चिदात्मनोऽपि सत्त्वेन तदतिरिक्त
सत्तासामान्यसमवायार्थक्रियाकारितावाद्धेनापत्तेः सत्तायाश्चार्थक्रियाकारितायाश्च सत्तान्त
रार्थक्रियाकारितान्तरकल्पनेऽनवस्थापातात् प्रकाशमानत्वेन सत्ताभ्युपेतव्या तथा च देहा
दयः प्रकाशमानतया सन्तश्चिदात्मवत् अथ सत्त्वेनाप्रकाशमाना तस्मात् कथं सत्यानृते मिथु

वे. ५

यः श्रुतिस्मृत्योरङ्गीकृतो भगवती श्रुतिरप्यहं कर्ता नैव भोक्तेत्युक्तः स्वशोकायात्मानमहमनुभवप्रसं
जितमात्मनो निषेद्धुमर्हतीति तदेवं सर्वप्रवादिश्रुतिस्मृतीतिहासपुराणप्रथितमिथ्याभा
वस्याहंप्रत्ययस्य स्वरूपनिमित्तफलैरुपव्याख्यानमन्योन्यस्मिन्नित्यादि अत्र चान्योन्यस्मि
न्धर्मिणि आत्मशरीरादावन्योन्यात्मकतामध्यस्याहमिदं शरीरादीति इदमिति च वस्तु
तो न प्रतीतितः लोकव्यवहारो लोकानां व्यवहारः स चायमहमिति व्यपदेशः इति शब्दसू
चितं शरीरादावनुकूलं प्रतिप्रमेयजातं प्रमायप्रमाणेन तदुपादानवर्जनादिरन्योन्यस्मिन्
धर्मिणि देहादिधर्मान् जन्ममरणजराव्याधिवृद्ध्यादीनात्मनि धर्मिण्यध्यस्तदेहादिभावे स
मारोप्य तथा चैतन्यादीनात्मधर्मान् देहादावध्यस्तात्मभावे समारोप्य ममेदं जरामर ।
णपुत्रपश्वादिस्वाम्यादीनि व्यवहारो व्यपदेश इति शब्दसूचितश्च तदनुरूपप्रवृत्त्यादिः अत्र चा ।
ध्यासव्यवहारक्रियायां यः कर्त्ता उक्तः स समान इति समानकर्तृत्वेनाध्यासव्यवहारयो
स्तुल्यपदं पूर्वकालत्वसूचितमध्यासस्य व्यवहारकारणत्वं स्फुटयति मिथ्याज्ञाननिमि
त्तो व्यवहारः मिथ्याज्ञानमध्यासस्तन्निमित्तत्वं तद्भावानुविधानात् व्यवहारस्य भावाभाव
योरित्यर्थः तदेवमध्यासस्वरूपं फलं च व्यवहारमुक्त्वा तस्य निमित्तमाह इतरेतरावि
वेकेनाविवेकाग्रहणेनेत्यर्थः अयमविवेक एव कस्मान्न भवति तथा चानध्यास इत्यत आह
अत्यन्तविविक्तयोर्धर्मधर्मिणोः परमार्थतो धर्मिणोरतादात्म्यं विवेकः धर्मिणोश्च ।

वाच॰ प्र॰ ९ हितदेशकालत्वस्य समारोपः एवं पीतः शंखः इति तिक्तो गुड इत्यत्राप्येतल्लक्षणं योजनीयं तथा
हि बहिर्विनिर्गच्छदत्यच्छनयनरश्मिसंपृक्तपित्तद्रव्यवर्त्तिनीं पीततां पित्तद्रव्यरहितामनुभ
वन् शंखं च दोषाच्छादितशुक्लिमानं द्रव्यमात्रमनुभवन् पीततायाश्च शंखस्य संबंधमननुभ
वन्नुभयसंबंधाग्रहणात्सारूप्येण पीततपनीयपिंडं पीतं बिल्वफलमित्यादौ पूर्वदृष्टं सामा
नाधिकरण्यं पीततत्त्वशंखयोरारोप्याह पीतः शंख इति एतेन तिक्तो गुड इति प्रत्ययो व्या
ख्यातः एवं वितताकृष्णाभिमुखस्यादर्शादिकादिषु स्वच्छेषु चाक्षुषं तेजो लग्नमपि वली
यसा सौर्येण तेजसा प्रतिस्रोतः प्रवर्त्तितं मुखमेव संपृक्तं मुखं गृह्णन् दोषवशात्तद्देशतामन
भिमुखतां च मुखस्याग्रहयन् पूर्वदृष्टाभिमुखादर्शादिकदेशतामाभिमुख्यं च मुखस्यारोप
6 यतीति प्रतिबिंबविभ्रमोपि लक्षितो भवति एतेन द्विचंद्रदिङ्मोहालातचक्रगंधर्वनग
रवंशोरगादिविभ्रमेष्वपि यथासंभवलक्षणं योजनीयं एतदुक्तं भवति न प्रकाशमान
तामात्रं सत्त्वं येन प्रकाशमानतया देहेंद्रियादेः सद्भावो भवेत् नहि सर्पादिभावेन रज्ज्वा
दयो वा स्फटिकादयो वा रूप्यादिगुणयोगिनो न प्रतिभासंते प्रतिभासमाना वा भवंतीति। उ॰ ९
दात्मानस्तु दृश्यमानाणि वा तथा सति मरुषु मरीचीचयमुच्चावचमुच्छलत्तुंगतरंगभंगमा
लेपमभ्यर्णमवतीर्णमंदाकिनीत्यभिसंधाय प्रवृत्तस्तोयमापीय पिपासामुपशमयेत्
तस्मादकामेनापि ग्रावोपितस्य प्रकाशमानस्यापि नवस्तु सत्त्वमभ्युपगमनीयं न च मरी।

नीभावस्तदभावे वा कस्यचित्संभेदाग्रहस्तदसंभवे कुतो ऽध्यास इत्याशयवानाह आहेत्याह कोयमध्यासो ना
मक इत्याक्षेपे समाधानं लोकसिद्धमध्यासलक्षणमाचक्षाण एवाक्षेपं प्रतिक्षिपति उच्यते स्मृति
रूपः परत्र पूर्वदृष्टावभासः अवसन्नोवमतो वा भासो ऽवभासः प्रत्ययान्तरबाधश्चास्यावसादो ऽ
वमानो वा एतावता मिथ्याज्ञानमित्युक्तं भवति तस्येदमुपपादनं पूर्वदृष्टेत्यादि पूर्वदृष्ट।
स्यावभासः पूर्वदृष्टावभासः मिथ्याप्रत्ययश्चारोपविषयारोपणीयमिथुनमन्तरेण न भवतीति पू
र्वदृष्टग्रहणेनानृतमारोपणीयमुपस्थापयति तस्य च दृष्टत्वमात्रमुपयुज्यते न वर्त्तमानतेति
दृष्टग्रहणं तथापि वर्त्तमानं दृष्टं दर्शनं नारोपोपयोगीति पूर्वेत्युक्तं तच्च पूर्वदृष्टस्वरूपेण स
दप्यारोपणीयतयानिर्वाच्यमित्यनृतम् आरोपविषयस्य सत्यमाह परत्रेति परत्र शुक्तिकादौ परमा
र्थसतीति तदनेन सत्यानृतमिथुनमुक्तं स्यादेतत्परत्र पूर्वदृष्टावभास इत्युपलक्षणमतिव्यापकत्वा
त् अस्ति हि व्यक्तिमस्यां गावि पूर्वदृष्टस्य गोत्वस्य परत्र कालान्तरेप्यवभासः अस्ति च पाटलिपु
त्रे पूर्वदृष्टस्य देवदत्तस्य परत्र माहिष्मत्यामवभासः समीचीनः अवभासपदं च समीचीने प्रयो
गे प्रसिद्धं यथा नीलस्यावभासः पीतस्यावभास इति अत आह स्मृतिरूप इति स्मृते रूपमिव रू
पमस्येति स्मृतिरूपः असंनिहितविषयत्वं च स्मृतिरूपत्वं संनिहितविषयं च प्रत्यभिज्ञानं स
मीचीनमिति नातिव्याप्तिः नाप्यव्याप्तिः स्वप्नज्ञानस्यापि स्मृतिविभ्रमरूपस्यैवंरूपत्वात् तत्रा
पि हि स्मर्यमाणे पित्रादौ निद्रोपप्लववशाद संनिधानापरामर्शात् तत्र तत्र पूर्वदृष्टस्यैव संनि

वाच॰ इत्यंतासंतः शरीरेंद्रियादयो नित्यत्वान्नानुभवविषया भवितुमर्हंतीति अत्र ब्रूमः नित्यत्वेचे
प्र॰ ज्ज्ञानुभवगोचरत्वं तत्किमिदानीं मरीचयोपि तोयात्मना सत्त्वादनुभवगोचराः स्युर्न सत्त्वात्त
७ दात्मना मरीचीनामसत्त्वात् द्विविधं सच्च वस्तूनां तत्त्वं सत्त्वमसत्त्वं च तत्र पूर्वं स्वतः परं तु प
रतः यथाहुः स्वरूपपररूपाभ्यां नित्यं सदसदात्मके वस्तुनि ज्ञायते किंचिद्रूपं कैश्चित्कदा
चनेति तत्किं मरीचिषु तोयनिर्भासप्रत्ययस्तत्त्वगोचरः तथा च समीचीन इति न भ्रांतो ना
पि बाध्येत अद्धा न बाध्येत यदि मरीचीन् तोयात्मत्वात् अतोयात्मना गृह्णीयात् तोयात्मना
नु गृह्णन्नु कथमभ्रांतः कथं वा अबाध्यः हंत तोयाभावात्मनां मरीचीनां तोयभावात्मत्वं तत्त्वा
वन्न सत् तेषां तोयाभावादभेदेन तोयभावात्मतानुपपत्तेर्नाप्यसत् वस्त्वंतरमेव हि वस्त्वंत
7 रस्यासत्त्वमास्थीयते भावांतरमभावो हि न कश्चिदनिरूपणात् इति वदद्भिः न चारोपितं
रूपं वस्त्वंतरं तद्धि मरीचयो वा भवेयुः गंगादिगतं वा तोयं पूर्वस्मिन्कल्पे मरीचय इति प्र
त्ययः स्यात् न तोयमिति उत्तरस्मिंस्तु गंगायां तोयमिति स्यात् न पुनरिहेति देशभेदास्म
रणे तोयमित्येव स्यात् न त्विहेति न चेदमसंतमसन्निरस्तसमस्तस्वरूपमेवास्त्विति सांप्र उ॰
तं तस्यानुभवगोचरत्वानुपपत्तेर्विसृतमथत्वात् तस्मान्न सन्नासन्नापि सदसत्परस्परविरो ७
धादिति अनिर्वाच्यमेवारोपणीयं मरीचिषु तोयमास्थेयं तदनेन क्रमेणाध्यस्ततोयस्य पर
मार्थतोयमिव अत एव पूर्वदृष्टमिव तत्त्वतस्तु न तोयं न च पूर्वदृष्टं किं त्वनृतमनिर्वाच्यं

चिद्रूपेण सलिलमवस्तु सत्स्वरूपेण तु परमार्थसदेव देहेंद्रियादयस्तु स्वरूपेणाप्यसंत इत्यनुभ।
वागोचरत्वात्कथमारोप्यंत इति सांप्रतं यतो यद्यसन्नानुभवगोचरः कथं मरीच्यादीनामसतां तो
यात्मतयाऽनुभवगोचरत्वं नच सद्रूपसत्वेन तोयात्मनापि संतो भवंति यद्यप्येतेनाभावो ना
मभावादन्यः कश्चिदस्ति अपितु भाव एव भावांतरात्मनाऽभावः स्वरूपेण तु भावः यथाहुः
भावांतरमभावो हि कयाचित्तु व्यपेक्षयेति तस्य भावात्मनोपाख्येयतया युज्येतानुभवगोच
रता सतो निरस्तसमस्तसामर्थ्यस्य निस्तत्वस्य कुतोनुभवविषयभावः कुतो वा चिदात्मन्यारोपः
नच विषयस्य समस्तसामर्थ्यविरहेपि ज्ञानमेव तत्तादृशं स्वप्रत्ययसामर्थ्यासादितादृष्टोतस्मि
द्धस्वभावदभेदमुपजातमसतः प्रकाशनं तस्मादसत्प्रकाशनशक्तिरेवास्याविद्येति सांप्रतं ।
यतो येयमसत्प्रकाशनशक्तिर्विज्ञानस्य किं पुनरस्याः शाक्यं असदिति चेत् किमेतत्कार्यमाहो
स्विदस्याज्ञाप्यं न तावत्कार्यमसतस्तत्वानुपपत्तेः नापि ज्ञाप्यं ज्ञानांतरानुपलब्धेरनवस्थापा
ताच्च विज्ञानस्वरूपमेवासतः प्रकाश इति चेत् कः पुनरेष सदसतोः संबंधः असदधीन
निरूपणत्वं सतो ज्ञानस्यासता संबंध इति चेत् अहो बतायमतिनिर्वृतः प्रत्ययतपस्वी यस्या
सत्यपि निरूपणमापतते नच प्रत्ययस्तत्राधत्ते किंचित् असतः आधारत्वायोगात् असद
तरेण प्रत्ययो न प्रथत इति प्रत्ययस्यैवैष स्वभावो न त्वसदधीनमस्य किंचिदिति चेत् अहो
बतास्य समस्तपातोपयतो यमतङ्मतिरतदात्मा चातदविनाभावनियतः प्रत्यय इति तस्मा

वाच॰ प्र॰ ८ अथ यदि तोषकारणं चायुः विज्ञानाकारता रजतादेरनुभवाद्वा व्यवस्थाप्येतानुमानाद्वा तत्रानु
मानमुपरिष्टान्निराकरिष्यते अनुभवोपि रजतप्रत्ययो वा स्यात् बाधकप्रत्ययो वा न तावद्रज
तानुभवः सहीदंकारास्पदं रजतमावेदयति न त्वांतरं अहमिति तदास्यात् प्रतिपत्तुः प्रत्ययाद
व्यतिरेकात् भ्रांतं विज्ञानं स्वाकारमेव बाह्यतया व्यवस्यति तथा च नाहंकारास्पदमस्य गोचरः
ज्ञानाकारता पुनरस्य बाधकप्रत्ययप्रवेदनीयेति चेत् हंत बाधकप्रत्ययमालोचयतु चायुष्मा।
न् किं पुरोवर्तिद्रव्यं रजताद्विवेचयत्याहोस्विज्ज्ञानाकारतामप्यस्य दर्शयति न च ज्ञानाकारतोपद
र्शनव्यापारं बाधकस्य ब्रुवाणः श्लाघनीयप्रज्ञो देवानांप्रियः पुरोवर्तित्वप्रतिषेधाद्दर्शितज्ञाना।
कारतेति चेत् असन्निधानाग्रहनिषेधात् असन्निहितो भवति प्रतिपत्तुः अत्यंतसंनिधानं त्व
8 स्य प्रतिपत्त्रात्मकं कुतः — न चैष रजतस्य निषेधो न चेदंतया पाः किंतु विवेकाग्रहप्रसंजितस्य
रजतव्यवहारस्य न च रजतमेव शुक्तिकायां प्रसंजितं रजतज्ञानेन नहि रजतनिर्भासं शुक्तिका
लंबनं युक्तमनुभवविरोधात् नावलंबसत्तामात्रेणालंबनमतिप्रसंगात् सर्वेषामर्थानां स
त्ताविशेषादालंबनत्वप्रसंगात् नापि कारणत्वेनेंद्रियादीनामपि कारणत्वात् तथापि च । उ॰ ८
भासमानतैवालंबनार्थः न च रजतज्ञाने शुक्तिकाभासत इति कथमालंबनं भासमानताभ्युप
गमे वा कथं नानुभवविरोधः अपि चेंद्रियादीनां समीचीनज्ञानोपजनने सामर्थ्यमुपलब्धं ।
मिति कथमेभ्यो मिथ्याज्ञानसंभवः दोषसहितानां तेषां मिथ्याप्रत्ययेपि सामर्थ्यमिति चेन्न

एवंच देहेंद्रियादिप्रपंचोऽनिर्वाच्योऽपूर्वोपि पूर्वमिथ्याध्यासोपदर्शितत्वेव परत्र चिदात्मन्यध्य ।
स्त इति उपपन्नमध्यासलक्षणयोगात् देहेंद्रियादिप्रपंचबाधनं चोपपादयिष्यते चिदात्मा
तु श्रुतिस्मृतीतिहासपुराणगोचरत्वान्मूलतत्वादविरुद्धन्यायनिर्णीतशुद्धबुद्धमुक्तस्वभावः स
त्वेनैव निर्वाच्योऽबाधितः स्वयंप्रकाशतानेवास्य सत्ता साच स्वरूपमेव चिदात्मनः न तु तदतिरिक्तस
त्तासामान्यसमवायोर्थक्रियाकारिता वा इति सर्वमवदातं सचाप्ययमेवंलक्षणकोध्यासोऽ
निर्वचनीयः सर्वेषामेव सम्मतः परीक्षकाणां न तु केंदपरं विप्रतिपत्तिरित्यनिर्वचनीयतां द्रढ
यितुमाह तं केचिदन्यत्रान्यधर्माध्यास इति वदंति अन्यधर्मस्य ज्ञानधर्मस्य रजतस्य ज्ञानाकार
स्येति यावत् अध्यासोऽन्यत्र बाह्ये सौत्रांतिकनये तावत् बाह्यं(स्तु) मस्ति वस्तु सन्न तत्र ज्ञानाका
राध्यारोपः विज्ञानवादिनामपि यद्यपि न बाह्यं वस्त्वस्ति तथाप्यनाद्यविद्यावासनारोपितम
लीकं बाह्यं तत्र ज्ञानाकारस्यारोपः उपपत्तिश्च यद्ग्राह्यमनुभवसिद्धरूपं तद्ग्राह्यमेवाभ्यु
पेतव्यं उत्सर्गोन्यथात्वं पुनरस्य बलवद्बाधकप्रत्ययवशात् इदं रजतमिति च बाधकस्येदं
तामात्रबाधेनाप्युपपत्तेर्न रजतगोचरतोचिता रजतस्य धर्मिणो बाधो हि रजतं च तस्य च ध
र्मस्तदंता च बाधिते भवेतां तद्वरं इदंतैवास्य धर्मो बाध्यतां न पुनः रजतमपि धर्मि तथा च र
जतं बहिर्बाधितमर्थादांतरे ज्ञाने व्यवतिष्ठत इति ज्ञानाकारस्य बहिरध्यासः सिद्ध्यति केचि
त्तु ज्ञानाकारख्यातावपरितुष्यंतो वदंति यत्र यदध्यासस्तद्विवेकाग्रहनिबंधनो भ्रमः ।

वाच॰ त्वांशः प्रमोषेण गृहीतमात्रस्य च इदमिति पुरोवस्थितद्रव्यमात्रात्तत्तज्ज्ञानाच्चविवेकस्तदग्रहण
प्र॰ निबंधनोभ्रमः भ्रांतत्वंस्मरणग्रहणयोरितरेतरसमानाधिकरणव्यपदेशोरजतादिव्यवहा
५ रश्चेति अन्येतत्राप्यपरितुष्यंतोयत्रयदध्यासः तस्यैवविपरीतधर्मत्वकल्पनामाचक्षते अत्र
दमाहुः तंत्रप्रतीतावइदंरजतार्थिनोरजतमिदमिति प्रत्ययापन्नपुरोवर्तिनिद्रव्येप्रवृत्तिः समाना
धिकरणव्यपदेशश्चेतिसर्वजनीनं तदेतन्नतावद्ग्रहणस्मरणयोः तद्गोचरयोश्चमिथोभे
दाग्रहमात्राद्भवितुमर्हति ग्रहणनिबंधनोहिचेतनव्यवहारव्यपदेशौकथमग्रहणमा
त्राद्भवेतां नन्वग्रहणमात्रात् किंतुस्मरणग्रहणे एवमिथः स्वरूपतोविषयतश्चागृही
१ तभेदेसमीचीनपुरः स्थितरजतविज्ञानसादृश्येनतद्व्यवहारं सामानाधिकरण्यव्यवहारं
चप्रवर्तयतइति अथसमीचीनज्ञानसादृश्यमनयोर्गृह्यमाणंवाव्यवहारप्रवृत्तिहेतुः अगृ
ह्यमाणंवासत्तामात्रेण गृह्यमाणत्वेपिसमीचीनज्ञानसारूप्यमनयोरिदमितिचरजतमि
तिचज्ञानयोरितिग्रहणं अथवा ऽनयोरेवस्वरूपतोविषयतश्चमिथोभेदाग्रहइतिग्रहणं
तत्रनतावत्समीचीनज्ञानसदृशेइतिज्ञानं समीचीनज्ञानवद्व्यवहारप्रवर्तकं नहिगोस उ॰
दृशोगवयइतिज्ञानंगवार्थिनंगवयेप्रवर्तयति अनयोरेवभेदाग्रहइतिज्ञानपरायणेनहि ५
भेदाग्रहेअनयोरितिभवति भेदाग्रहणमितिचभवति तस्मात्सत्तामात्रेणभेदाग्रहोगृहीत
एवव्यवहारहेतुरितिवक्तव्यं तत्रकिमयमारोपोत्पादक्रमेणव्यवहारहेतुरताहोअनुत्पा

दोषाणां कार्यैकजननसामर्थ्यविघातमात्रहेतुत्वात् अन्यथा दृष्टादपि कुटजवीजात् वटांकुरोत्पत्तिप्रसं
गात् अपि च स्वगोचरव्यभिचारे विज्ञानानां सर्वज्ञानानाश्वासः तस्मात् सर्वज्ञानं समीचीनमास्थेयं तथा
च रजतमिदमिति द्वे विज्ञाने स्मृत्यनुभवरूपे तत्रेदमिति पुरोवर्त्तिद्रव्यमात्रग्रहणं दोषवशात् तद्गत
शुक्तित्वसामान्यविशेषस्याग्रहात् तन्मात्रं च गृहीतं सदृशतया संस्कारोद्बोधक्रमेण रजतस्मृतिं ज
नयति सा च गृहीतग्रहणस्वभावापि दोषवशात् गृहीततांशप्रमोषात् ग्रहणमात्रमवतिष्ठते न
या च रजतस्मृतेः पुरोवर्त्तिद्रव्यमात्रग्रहणस्य च मिथः स्वरूपतस्तद्विषयतश्च भेदाग्रहात् सन्निहित
रजतगोचरज्ञानसारूप्येणेदं रजतमिति भिन्ने अपि स्मरणग्रहणे अभेदव्यवहारं च समानाधिक
रणव्यपदेशं च प्रवर्त्तयतः क्वचित् पुनर्ग्रहणे एव मिथोऽगृहीतभेदे यथा पीतः शंख इति अत्र
हि विनिर्गच्छन्नयनरश्मिवर्त्तिनः पित्तद्रव्यस्य काचस्येव स्वच्छस्य पीतत्वं गृह्यते पित्तं तु न गृह्यते शंखो
पि दोषवशात् शुक्लगुणरहितः स्वरूपमात्रेण गृह्यते तदनयोर्गुणगुणिनोरसंसर्गाग्रहसारूप्या
त्पीततपनीयपिंडप्रत्ययाविशेषेणाभेदव्यवहारः सामानाधिकरण्यव्यपदेशश्चाभेदाग्रहप्रसं
जिताभेदव्यवहारबाधनाच्चनेदमिति विवेकप्रत्ययस्य बाधकत्वमप्युपपद्यते तदुपपत्तौ च प्राची
नप्रत्ययस्य भ्रांतत्वमपि लोकसिद्धं भवति तस्माद्यथार्थाः विप्रतिपन्नाः सर्वे संदेहविभ्रमाः प्र
त्ययत्वाद्घटादिप्रत्ययवत् तदिदमुक्तं यत्र यदध्यास इति यस्मिन् शुक्तिकादौ यस्य रजतादेरध्या
स इति लोकप्रसिद्धिः नासावन्यथाख्यातिनिबंधना किंतु तस्य रजतादेस्तत्स्मरणस्य च गृहीत।

वाच. प्र. १०

तस्मात्तत्तयेति यदुक्तं समनवभासमानतया न शुक्तिरालंबनमिति तत्र भवान्पृष्टो व्याचष्टां किं
शुक्तिकात्वस्येदं रजतमिति ज्ञानं प्रत्यनालंबनत्वं ग्राह्यहोस्विद् व्यमात्रस्य पुरःस्थितस्य सितभास्वर
स्य यदि शुक्तिकात्वस्यानालंबनत्वं युक्तं उत्तरस्यानालंबनत्वं ब्रुवाणस्य तवैवानुभवविरो।
धः तथाहि रजतमिदमिति यस्तु भवतस्तत्रानुभविता पुरोवर्तिवस्त्वंगुल्या निर्दिशति इष्टं च
दुष्टानां करणानामौत्सर्गिककार्यप्रतिबंधेन कार्यान्तरोपजननसामर्थ्यं यथा दावाग्नि
दग्धानां वेत्रबीजानां कदलीकांडजननं भस्मकदुष्टस्य चोदर्यस्य तेजसो बहून्नपानपच
नमिति प्रत्यक्षबाधकापहृतविषयं च विभ्रमाणां यथार्थत्वानुमानमाभासीकृतवह्न्यनु
ष्णत्वानुमानवत् यच्चोक्तं मिथ्याप्रत्ययस्य व्यभिचारे सर्वप्रमाणेष्वनाश्वास इति तद्बाध
20 कत्वेन स्वतः प्रामाण्यं न व्यभिचारेणेति व्युत्पादयद्भिरस्माभिः परिहृतं न्यायकणिकायामिति
नेह प्रपंच्यते दिङ्मात्रं चास्य स्मृतिप्रमोषभंगस्योक्तं विस्तरस्तु ब्रह्मतत्त्वसमीक्षायामवगं
तव्य इति तदिदमुक्तं अन्यत्र यत्र यदध्यासः तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इ
ति यत्र शुक्तिकादौ यस्य रजतादेरध्यासस्तस्यैव शुक्तिकादेर्विपरीतधर्मत्वकल्पना रजत उ. १०
त्वधर्मकल्पनामिति योजना ननु सर्वं तु परीक्षकाणां विप्रतिपत्तयः प्रकृते तु किमायात।
मित्यत आह सर्वथापि त्वन्यस्यान्यधर्मकल्पनां न व्यभिचरति अन्यस्यान्यधर्मकल्पनाश्र
यत्ता सा चानिर्वचनीयेति अधस्तादुपपादितं तेन सर्वेषामेव परीक्षकाणां मतेऽध्यासः।

दितारोपएवस्वनइति वयंतुपश्यामः चेतनव्यवहारस्याज्ञानपूर्वकत्वानुपपत्तेः आरोपज्ञानोत्पाद
क्रमेणैवेति ननुसम्यंन चेतनव्यवहारोऽज्ञानपूर्वः किंत्वविदितविवेकस्मरणग्रहणपूर्वकइ
ति मैवं नहिरजतप्रातिपदिकार्थमात्रस्मरणं प्रवृत्त्यनुपयुज्यते इदंकारास्पदाभिमुखी
खलुरजतार्थिनांप्रवृत्तिरित्यविवादं कथंवापमिदंकारास्पदे प्रवर्तेतयदिनतदिच्छेत् अन्य
दिच्छन्नन्यत्करोतीतिव्याहतं नचेदिदंकारास्पदं रजतमितिविजानीयात् कथंरजतार्थीत
दिच्छेत् यदितथात्वेनाग्रहणादितिब्रूयात् सप्रतिवक्तव्यः अथतथात्वेनाग्रहणात् क।
स्मान्नोपेक्षेतेति सोपमनुपादानोपेक्षाभ्यामभिनयाकृष्यमाणश्चेतनो व्यवस्थितइदंका
रास्पदे रजतसमारोपेणोपादानएवव्यवस्थास्यतइतिभेदाग्रहःसमारोपोत्पादनक्रमेणचे
तनप्रवृत्तिहेतुः तथाभेदाग्रहादिदंकारास्पदे रजतत्वमारोप्यतज्ज्ञानीयस्योपकारहेतुभाव
मनुचिंत्यतज्ज्ञानीयतयेदंकारास्पदे रजतेतदनुमायतदर्थी प्रवर्ततइतिअन्वपूर्वासिद्धं न
चतटस्थरजतस्मृतिरिदंकारास्पदस्योपकारहेतुभावमनुमापयितुमर्हति रजतत्वस्यहेतो
रपक्षधर्मत्वात् एकदेशदर्शनेखल्वनुमापकंततनेकदेशदर्शने यथाऽऽहुः ज्ञातसंबंध।
स्यैकदेशदर्शनात्इति समारोपेतुएकदेशदर्शनमस्तितत्सिद्धमेतत् विवादाध्यासितं
रजतज्ञानं पुरोवर्तिविषयंरजतार्थिनः तत्रनियमेनप्रवर्तकत्वात् यद्यदर्थिनंयत्रनि
यमेनप्रवर्तयति ततज्ज्ञानंतद्विषयंयथोभयसिद्धसमीचीनरजतज्ञानं तथाचेदं

वाच॰ लक्षणालिनोऽपि चैतत्समवेतायां गमनक्रियायामिति तत्र श्रुतिविरोधात् श्रूयते हि सत्यं ज्ञानमनन्तं
प्र॰ ब्रह्मेति उपपद्यते च तथा हि योयमर्थप्रकाशः फलं यस्मिन्नर्थश्चात्मा च प्रथेते स किं जडः स्व
११ यंप्रकाशो वा जडश्चेद् द्विषयात्मानावपि जडाविति कस्मिन्किं प्रकाशेताविशेषात्सात्मतमाद्यम ।
शेषमस्तं जगतः तथा चाभाणकः अंधस्येवांधलग्नस्य विनिपातः पदे पदे न च तन्निलीनमेवविद्
ज्ञानं स्वरूपात्मानो ज्ञापयति चक्षुरादिरिति वाच्यं ज्ञापनं हि ज्ञानजननं जनितं च ज्ञानं जडं सज्ञा
नं दूषणमतिवर्त्तते एवं च तत्त्वरोद्धत्राणामपि ज्ञानानि जडानि स्वमनवस्था तस्मादपराधीनप्र
काशा संविद्रूपेतव्या तथापि किमाधाने विषयात्मनोः स्वभावजडयोः एतदयाने यत्नयोः संविद
11 जडेति तत्किं पुनः पंडितइति पितापि पंडितोऽस्तु स्वभाव एष संविदः स्वयंप्रकाशायाः यद्धर्षा
त्मसंबंधिनेति चेत् हंत पुत्रस्यापि पिंडितस्य स्वभाव एष यत्पितृसंबंधितेति समानं सहात्मार्थ
प्रकाशेन संवित्प्रकाशेन तत्त्वर्थात्मकाशाविनेति तस्याः स्वभाव इति चेत् तत्किं संविदो भिन्नौ सं
विदात्मार्थप्रकाशौ तथा च न स्वयंप्रकाशा संवित् न च संविदर्थात्मकप्रकाश इति अथ संविद
र्थात्मप्रकाशो न संविदोभिद्यते संविदेव तौ एवं चेत् यावदुक्तं भवति संविदात्मार्थौ सहेति तावदु । उ॰
क्तं भवति संविदात्मार्थप्रकाशौ सहिते तथा च न विवक्षितार्थसिद्धिः न चातीतानागतार्थगो ११
चरायाः संविदोर्थसहभावोपि तद्विषयहानोपादानोपेक्षाबुद्धिजननादर्थसहभाव इति चेत्
नार्थसंविद इव हानादिषु बुद्धीनामपि तद्विषयत्वानुपपत्तेः हानादिजननाद्धानादिबुद्धीना ।

न्यधर्मकल्पना अनिर्वचनीयाऽन्यथाभाविनीति अनिर्वचनीयता सर्वतन्त्रसिद्धान्तइत्यर्थः आख्या
तिवादिभिरकामैरपि समानाधिकरण्यव्यपदेशप्रवृत्तिनियमस्नेहादिदमभ्युपेयमितिभावः
नकेवलमियमनृततापरीक्षकाणांसिद्धाअपितुलौकिकानामपीत्याह तथाचलोकानुभवः
शुक्तिकाहिरजतवदवभासतइति नपुनारजतमितिशेषः स्यादेतत् अन्यस्यान्यात्मनावि
भ्रमोलोकसिद्धएकस्यत्वभिन्नस्याभेदभ्रमोनदृष्टइतिकुतश्चिदात्मनोऽभिन्नानांजीवानांभे
दविभ्रमउत्पन्नआह एकश्चन्द्रः सद्वितीयवदिति पुनरपिचिदात्मन्यध्यासमाक्षिपति
कथंपुनः प्रत्यगात्मन्यविषयेऽध्यासोविषयधर्माणांइत्यर्थः चिदात्मा प्रकाशतेनवा नचेन्न।
काशतेकथमस्मिन्नध्यासोविषयधर्माणां नावस्त्वप्रतिभासमाने पुरोवर्त्तिनिद्रव्ये रजतस्य
वातद्धर्माणांवासमारोपः संभवतीति प्रतिभासेवानतावदयमात्माजडोघटादिवत्पराधी
नप्रकाशइति युक्तं नावस्तुस एवकर्मचकर्त्ताचभवतिविरोधात् परसमवेतक्रियाफल
शालिहिकर्म्मनचज्ञानक्रियापरसमवायिनीतिकथमस्याःकर्म नचतदेवस्वंचपरंचविरो।
धात्आत्मान्तरसमवायाभ्युपगमेचत्तेषामात्मनोनात्मत्वप्रसंगः एवंतस्येत्यनवस्थापातः
स्यादेतत् आत्माजडोऽपिसर्वार्थज्ञानेषुभासमानोऽपिकर्तैवनकर्म परसमवेतक्रियाफलशा
लित्वाभावात् चैत्रवत् यथाहिचैत्रसमवेतयाक्रियायाचैत्रनगरप्राप्तावुभयसमवेतायाम
पिक्रियमाणायांनगरस्यैवकर्म्मतापरसमवेतक्रियाफलशालित्वात् नतुचैत्रस्यक्रियाफ

वाच॰ सू॰ १२ ततेऽप्यप्रकाशोऽपरोक्षस्थितत्त्वापरोक्षत्वाभावान्नाध्यासः नहिशुक्तावपुरःस्थितायां रजतमध्य
स्यतीदं रजतमिति तस्मादसंप्रज्ञातग्रहे चनाध्यासइतिसिद्धं स्यादेतदविषयत्वे चिदात्मनो
नाध्यासो विषयएव तु चिदात्मा सन्नप्यसंतत्प्रकर्षेनाध्यासइत्यतआह युष्मत्प्रत्ययापेतस्य च प्र
त्यगात्मनोविषयत्वं ब्रवीषि विषयत्वे हि चिदात्मनोऽन्यो विषयी भवेत् तथा च योविषयी सएव चि
दात्माविषयस्तु ततोऽन्यो युष्मत्प्रत्ययगोचरोऽभ्युपेयः तस्माद्नात्मत्वप्रसंगात् अनवस्थापरिहारा
य युष्मत्प्रत्ययापेतत्वं अतएवाविषयत्वमात्मनोवक्तव्यं तथा च नाध्यासइत्यर्थः परिहरति
उच्यते नतावदयमेकांतेनाविषयः कुतः अस्मत्प्रत्ययविषयत्वात् अयमर्थः सत्यं प्रत्यगात्मास्व
यंप्रकाशत्वादविषयोऽनंशश्चतथाप्यनिर्वचनीयानाद्यविद्यापरिकल्पितबुद्धिमनःसूक्ष्मस्थू
12 लशरीरेंद्रियावच्छेदेनानवच्छिन्नोऽपिवस्तुतोऽवच्छिन्नइवाभिन्नोऽपिभिन्नइवअकर्तापिकर्तेवा
भोक्तापिभोक्तेवाविषयोऽप्यस्मत्प्रत्ययविषयइवजीवभावमापन्नोऽवभासते नभइवघटमणिकम
ल्लिकाद्यवच्छेदभेदेनभिन्नमिवानेकविधधर्मकमिवेति नहिचिदेकरसस्यात्मनश्चिदंशेऽगृहीते
ऽगृहीतंकिंचिदस्तिनखल्वानंदनित्यत्वविभुत्वादयोऽस्यचिद्रूपाद्वस्तुतोभिद्यंतेयेनतद्ग्रहेनगृह्ये उ॰
रन् गृहीताएवतुकल्पितेनभेदेनाविवेचिताइत्यगृहीताइवभांति नचात्मनोबुद्ध्यादिभ्योभेदग्रा १
हिको येन चिदात्मनि गृह्यमाणे सोऽपि गृहीतो भवेत् बुद्ध्यादीनामनिर्वाच्यत्वेन तद्भेदस्याप्यनिर्व
चनीयत्वात् तस्माच्चिदात्मनःस्वयंप्रकाशस्यैवानवच्छिन्नस्यावच्छिन्नेभ्योबुद्ध्यादिभ्योभेदा

मर्थविषयत्वंअर्थविषयमहानादिवुद्धेर्जनन्याचअर्थसंविदस्तद्विषयत्वमितिचेत् तत्किंदेहस्यप्र
लवदात्मसंयोगाद्देहप्रवृत्तिनिवृत्तिहेतुरर्थइत्यर्थप्रकाशोप्यस्तु जाड्याद्देहात्मसंयोगेनार्थप्रका
शइतिचेत् नतस्यप्रकाशोपिस्वात्मन्येवविषयेणवत्प्रकाशः अर्थेतज्जडइत्युपपादितं नचप्र
काशस्यात्मनोविषयाः तेहिविच्छिन्नदीर्घस्थूलतयात्रानुभूयंते प्रकाशस्त्वाद्यमांतरोऽस्थूलोऽन
णुर्ह्रस्वोदीर्घश्चेतिप्रकाशते तस्माज्जडेऽनुभूयमानइवच्छित्तीयश्चेद्दमाःप्रकाशादन्योर्थोनिर्वच
नीयएवेतियुक्तमुत्पश्यामः नचास्यप्रकाशस्याज्ञानतःस्वलक्षणभेदोनुभूयते नचानिर्वाच्या
र्थभेदःप्रकाशेनिर्वाच्यंभेत्तमर्हति अतिप्रसंगात् नचार्थानामपिपरस्परंभेदः समीचीनज्ञानप
द्धतिमध्यास्तइत्युपरिष्टादुपपादयिष्यते तदयंप्रकाशएवस्वयंप्रकाशएकःकूटस्थोनित्योनिरंश
प्रत्यगात्मा अशक्यनिर्वचनीयेभ्योदेहेंद्रियादिभ्यआत्मानंप्रतीपंनिर्वचनीयमंचतिविजानातीतिप्र
त्यङ् सचात्मेतिप्रत्यगात्मासचापराधीनप्रकाशत्वादनंशत्वाच्चाविषयः तस्मिन्नध्यासोविषयध
र्मिणांदेहेंद्रियादिधर्मिणां कथंकिमात्मेपि आपन्नोपमध्यासइत्याक्षेपः कस्मादयुक्तइत्यतआह
सर्वोहिपुरोवस्थितेविषयेविषयांतरमध्यस्यति एतदुक्तंभवति यत्पराधीनप्रकाशंप्रेषावच्छेत्तस्मा
मान्यांशग्रहेकारणदोषाच्चविशेषाग्रहेऽन्यथाप्रकाशते प्रत्यगात्मात्वपराधीनप्रकाशतयानस्वज्ञा
नकारणान्यपेक्षते येनतदाश्रयैर्दोषैर्दुष्येत् नचांशवान् येनकश्चिदंशोगृह्येतकश्चिन्नगृ ।
ह्येतनहितदेवतदानीमेवतेनैवगृहीतमगृहीतंचसंभवतीतिनस्वयंप्रकाशापत्तेःऽध्यासः सदा

वाच॰
प्र॰
२३

विभातीति तदेवंपरमार्थपरिहारमुक्ताभ्युपेत्यापि चिदात्मनःपरोक्षतांप्रौढवादितयापरिहारांतर
माह नचायमस्तिनियमःपुरोवस्थितएवापरोक्षएवविषयांतरमध्यसितव्यं कस्मादयंननियमइत्य
तआह अप्रत्यक्षेपिह्याकाशेबालास्तलमलिनताद्यध्यस्यंति यस्माद्दर्शनेनभोहिद्रव्यंसद्रूपस्पर्शविर
हान्नबाह्येंद्रियप्रत्यक्षं नापिमानसं चेतसोसहायस्यबाह्येप्रवृत्तेः तस्मादप्रत्यक्षंनभः अपिचतत्रबा।
लाअविवेकिनःपरदर्शितदर्शिनःकदाचित्पार्थिवच्छायांश्यामतामारोप्यकदाचित्तैजसंशुक्लत्वमा
रोप्यनीलोत्पलपलाशश्याममितिवाराजहंसमालाधवलमितिवानिर्वर्णयंति तत्रापिपूर्ववद्।
दृष्टस्यतैजसस्यवातामसस्यवारूपस्यपरत्रनभसिस्मृतिरूपोवभासइति एवंतदेवतलमध्यस्यंति।
अवाङ्मुखीभूतमहेंद्रनीलमणिमयमहाकटाहकल्पमित्यर्थः उपसंहरति एवमनेनप्रकारे
णसर्वाक्षेपपरिहारादविरुद्धःप्रत्यगात्मन्यप्यनात्मनांबुद्ध्यादीनामध्यासः नतसंतिसहस्रम।
ध्यासास्तत्किमर्थमयमेवाध्यासआक्षेपसमाधानाभ्यांव्युत्पाद्यते नाध्यासमात्रमित्यतआह त
मेतमेवंलक्षणमध्यासंपंडिताअविद्येतिमन्यंते अविद्याहिसर्वानर्थबीजमितिश्रुतिस्मृतिइतिहा
सपुराणेषुप्रसिद्धं तदुच्छेदायचवेदांताःप्रवृत्ताइतिवक्ष्यति प्रत्यगात्मन्यनात्माध्यासएवस। उ॰ २३
र्वानर्थहेतुर्नपुनारजतादिविभ्रमाइतिसएवाविद्यातत्स्वरूपंचाविद्यातेनवाक्यमुक्तमिति।
तदेवंव्युत्पादनाध्यासमात्रं अत्रचएवंलक्षणमितिएवंरूपतयाअनर्थहेतुतोक्ता यस्मात्प्रत्य
गात्मन्यशनायादिरहितेऽशनायाद्यर्पणातःकरणशरीरहितारोपणंप्रत्यगात्मानमदुःखंदुः

23

ग्रहात् तदध्यासेन जीवभाव इति तस्य चानिदमिदमात्मनोऽस्मत्प्रत्ययविषयत्वमुपपद्यते तथाहि
कर्ता भोक्ता चिदात्माहंप्रत्यये प्रत्यवभासते नचोदासीनस्य क्रियाशक्तिर्भोगशक्तिर्वा संभवति यस्य
चक्षुरादेः कार्यकारणसंघातस्य चैतन्यं तस्माच्चिदात्मैव कार्यकारणसंघातेन ग्रथितो लब्धक्रि।
याभोगशक्तिः स्वयंप्रकाशोऽपि बुद्ध्यादिविषयविच्छुरणात् कथंचिदस्मत्प्रत्ययविषयोऽहंकारास्पदो
जीव इति च जन्तुरिति च क्षेत्रज्ञ इति चाख्यायते नखलु जीवश्चिदात्मनो भिद्यते तथाहि श्रुतिरनेन जी
वेनात्मनेति तस्माच्चिदात्मनोऽव्यतिरेकाज्जीवः स्वयंप्रकाशोऽप्यहंप्रत्ययेन कर्तृभोक्तृतया व्यवहार
योग्यः किंपुनरत्यहंप्रत्ययालंबनमुच्यते नचाध्यासे सति विषयत्वं विषयत्वे चाध्यास इत्यन्योन्या
श्रयमिति सांप्रतं बीजांकुरवदनादित्वादविरोधादित्युक्तं नैसर्गिकोऽयं लोकव्यवहार इति भाष्य
ग्रंथेन तस्मात्सूक्तं न तावदयमेकांतेनाविषय इति जीवो हि चिदात्मतया स्वयंप्रकाशतयाऽविषयो
ऽप्यौपाधिकेन रूपेण विषय इति भावः स्यादेतन्न वयमपराधीनप्रकाशतया विषयत्वेनाध्यास
मपाकुर्मः किंत्वप्रत्यगात्मा न स्वतो नापि परतः प्रथत इत्यविषय इति ब्रूमः तथाच सर्वथाऽप्य
प्रथमाने प्रत्यगात्मनि कुतोऽध्यास इत्यत आह अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः प्रतीचश्चात्मनः
प्रसिद्धिः प्रथा तस्याश्चापरोक्षत्वात् यद्यपि च प्रत्यगात्मनि स्वप्रकाशान प्रथास्ति तथापि भेदोऽध्यारोप्य।
ण पुरुषस्यैव चैतन्यमिति एतदुक्तं भवति अवश्यं चिदात्मापरोक्षोऽभ्युपेयः तदप्रथायां सर्वस्या
प्रथनेन जगदांध्यप्रसंगादित्युक्तं श्रुतिश्चात्र भवति तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं

दर्शयति तमेतमविद्याख्यमिति निगदव्याख्यातं आक्षिपति कथं पुनरविद्यावद्विषयाणि प्रत्यक्षा।
दिप्रमाणानि तत्त्वपरिच्छेदो हि प्रमा विद्या तत्साधनानि प्रमाणानि कथमविद्यावद्विषयाणि नाविद्या।
वंतं प्रमाणं प्रमाणान्याश्रयंतीति तत्कार्यस्य विद्याया अविद्याविरोधित्वादिति भावः संतवा प्रत्यक्षादीनि
मंतृत्वापि यथा तथा शास्त्राणि तु पुरुषहितानुशासनपराण्यविद्याप्रतिपक्षतया नाविद्यावद्विष।
याणि भवितुमर्हंतीत्याह शास्त्राणि चेति समाधत्ते उच्यते देहेंद्रियादिष्वहंममाभिमानहीनस्य ता
दात्म्यतद्धर्माध्यासहीनस्य प्रमातृत्वानुपपत्तौ सत्यां प्रमाणप्रवृत्त्यनुपपत्तेः अयमर्थः प्रमातृत्वं हि
प्रमां प्रति कर्तृत्वं तच्च स्वातंत्र्यं स्वातंत्र्यं च प्रमातुरितरकारकाप्रयोज्यस्य समस्तकारकप्रयोक्तृत्वं तदने
न प्रमाकरणं प्रमाणं प्रयोजनीयं न च स्वव्यापारमंतरेण करणं प्रयोक्तुमर्हतीति न च कूटस्थनित्यश्चि
दात्मा परिणामी स्वतो व्यापारवान् तस्माद्व्यापारवद्बुद्ध्यादितादात्म्याध्यासाद्व्यापारवत्तया प्रमाण
14 मधिष्ठातुमर्हतीति भवत्यविद्यावत्पुरुषविषयत्वं अविद्यावत्पुरुषाश्रयत्वं प्रमाणानामिति अथ
मा प्रवर्तिषत प्रमाणानि किं नश्छिन्नमित्यत आह नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभ
वति व्यवह्रियतेऽनेनेति व्यवहारः फलं प्रत्यक्षादीनां प्रमाणानां फलमित्यर्थः इंद्रियाणीति इंद्रि उ॰
यलिंगादीनीति द्रष्टव्यं दंडिनो गच्छंतीतिवत् एवं हि प्रत्यक्षादीन्युपपद्यंते व्यवहारक्रियायाश्च व्य २५
वहारार्थाक्षेपात् समानकर्तृकता अनुपादाय यो व्यवहार इति योजना किमिति पुनः प्रमातोपादत्ते
प्रमाणानि स्वयमेव कस्मान्न प्रवर्तंत इत्यत आह नचाधिष्ठानमंतरेणेंद्रियाणां प्रमाणं

लोकरोति तस्मादनर्थहेतुः नचैवं एणयत्नेनाऽपि मन्यंते ध्यासं येन न व्युत्पाद्यंते त्यत उक्तं पंडितंमन्यं
त इति नन्वियमनादिरतिनिरूढनिविडवासनानुबद्धा अविद्या न शक्या निरोद्धुमुपायाभावादिति
यो मन्यते तं प्रति निरोधोपायमाह तद्विवेकेन वस्तुस्वरूपावधारणं निर्विचिकित्संज्ञाने विद्यामाकृ :
पंडिताः प्रत्यगात्मनि खल्वमंत विविक्ते वुद्ध्यादिभ्यो वुद्ध्यादिभेदाग्रहनिमित्तो वुद्ध्याद्यात्मत्वत
द्धर्माध्यासः तत्र श्रवणमननादिभिर्यद्विवेकविज्ञानं तेन विवेकाग्रहे निवर्त्तिते ऽध्यासापवाधा।
त्मकं वस्तुस्वरूपावधारणं विद्या चिदात्मस्वरूपं स्वरूपेण्ववतिष्ठत इत्यर्थः स्यादेतत् अतिनिरू
ढनिविडवासनानुबद्धा अविद्या विद्ययापवाधितापि स्ववासनावशात्पुनरंकुरिष्यति प्रवर्त्तयिष्य
ति च वासनादिकार्यम्वा चित्तमित्यत आह तत्रैवं सति एवंभूततत्त्वावधारणे सति यत्र यदध्या
सस्तत्कृतेन दोषेण गुणेन वाणुमात्रेणापि न स संवध्यते अंतःकरणादिदोषेणाशनायादिना।
चिदात्मा चिदात्मनो गुणेन चैतन्यानंदादिनांतःकरणादिन संवध्यते एतदुक्तं भवति तत्त्वावधार
णाभ्यासस्य हि स्वभाव एव तादृशो यदनादिमपि निरूढनिविडवासनमपि मिथ्याप्रत्ययमपनयति
तत्वपक्षपातो हि स्वभावो धियां यथाहुर्वाह्या अपि निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः नवाधोय
त्नवत्त्वेपि वुद्धिस्तत्पक्षपातत इति विशेषतस्तु चिदात्मस्वभावस्य तत्त्वज्ञानस्यानंतानरंगस्य कुतो।
निर्वीच्यायाऽविद्ययावाध इति यदुक्तं सत्यानृते मिथुनीकृत्य विवेकाग्रहादध्यस्याहमिदं ममेदमि
ति लोकव्यवहार इति तत्र व्यपदेशलक्षणो व्यवहारः कंगोतक इति शब्दप्रपंचितं लोकव्यवहारमा

वाच॰ नन्विति कथमविद्यावद्विषयाण्येव प्रमाणानीत्यत आह पश्वादिभिश्चाविशेषादिति विदन्तु नाम प्रमा-
२५ णोपपत्तिभ्यां देहेन्द्रियादिभ्यो भिन्नं प्रत्यगात्मानं प्रमाणप्रमेयव्यवहारे तु प्राणभृन्मात्रधर्मं नाति-
वर्तन्ते यादृशो हि पशुशकुन्तादीनामविप्रतिपन्नमुग्धस्वभावानां व्यवहारस्तादृशो व्युत्पन्नानाम-
पि पुंसां दृश्यते तेन तत्सामान्यात्तेषामपि व्यवहारसमये ऽविद्यावत्त्वमनुमेयं यथाहुः समस्त्वपे उ-
त्कर्षकानिवर्तनसहिता पूर्वोक्तोपपत्तिरविद्यावत्त्वरूपविषयत्वं प्रमाणानां साधयतीत्यर्थः एत-
देव विभजते यथा हि पश्वादय इति यत्र च शब्दादिभिः श्रोत्रादीनां संबन्धे सतीति प्रत्यक्षं दर्शितं
शब्दादिविज्ञान इति तत्फलमुक्तं प्रतिकूल इति चानुमानफलं तथा हि शब्दादिस्वरूपमुपलभ्य
तज्जातीयस्य प्रतिकूलतामनुस्मृत्य तज्जातीयतयोपलभ्यमानस्य प्रतिकूलतामनुमिमत इति उ-
25 दाहरति यथा दण्डेति शेषमतिरोहितार्थं स्यादेतत् भवतु प्रत्यक्षादीन्यविद्यावद्विषयाणि शास्त्रं
तु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि न देहाद्यध्यासेन प्रवर्तितुमर्हति अत्र त्वामुष्मिकफ-
लोपभोगयोग्योऽधिकारी प्रतीयते तथा च परमर्षिसूत्रं शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वादिति
न च देहादि भस्मीभूतं पारलौकिकाय फलाय कल्पत इति देहाद्यतिरिक्तं विद्यमानमधिकारि- उ॰
णमाक्षिपति शास्त्रं तदवगमश्च विद्येति कथमविद्यावद्विषयं शास्त्रमित्याशङ्क्याह शास्त्रीयेति २५
ति तु शब्दः प्रत्यक्षादिव्यवहाराद्भिनत्ति अधिकारशास्त्रं हि स्वर्गकामस्य पुंसः परलोकसंबन्धं वि-
नान निर्वहतीति तावन्मात्रमाक्षिपेत् न त्वस्यासंसारित्वमपि तस्याधिकारेऽनुपयोगात् प्रत्युत

नो व्यापारः संभवति न जातु करणान्यधिष्ठातानि कर्त्रा स्वकार्ये व्याप्रियंते माभूत् तत्कुविंदरहितेभ्यो वेमादि
भ्यः पटोत्पत्तिरिति अयं देह एवाधिष्ठाता कस्मान्न भवति कृतमत्रात्माध्यासेनेत्यत आह न चाध्यस्तात्म
भावेन देहेन कश्चिद्व्याप्रियते सुषुप्तेऽपि व्यापारप्रसंगादिति भावः स्यादेतत् यथानध्यस्तात्मभावे वे
मादिकं कुविंदो व्यापारयन् पटस्य कर्त्तैवमनध्यस्तात्मभावं देहेंद्रियादि व्यापारयन् भविष्यति तद
भिज्ञः प्रमातेत्यत आह न चैतस्मिन्सर्वस्मिन्नितरेतराध्यासे इतरेतरधर्माध्यासे वाऽसति आत्मनो
ऽसंगस्य सर्वथा सर्वधर्मधर्मिविप्रमुक्तस्य प्रमातृत्वमुपपद्यते व्यापारवंतो हि कुविंदादयो वेमादीन
धिष्ठाय व्यापारयंति अनध्यस्तात्मभावस्य तु देहादिष्वात्मनो न व्यापारयोगोऽसंगत्वादित्यर्थः अतश्चा
ध्यासाश्रयाणि प्रमाणानीत्याह न च प्रमातृत्वमंतरेण प्रमाणप्रवृत्तिरस्ति प्रमायास्तत्फले स्व
तंत्रः प्रमाता भवति अंतःकरणपरिणामभेदस्य प्रमेयप्रवणकर्तृस्थः चित्स्वभावः प्रमा कथं जड
स्यांतःकरणस्य परिणामश्चिद्रूपो भवेत् यदि चिदात्मा तत्र नाध्यस्येत् कथं चैषा चिदात्मकर्तृका भ
वेत् यद्यंतःकरणव्यापारवांश्चिदात्मनि नाध्यस्येत तस्मादितरेतराध्यासाच्चिदात्मकर्तृकस्य प्रमाफ
ले सिद्ध इति तत्सिद्धौ च प्रमातृत्वं तामेव च प्रमामुररीकृत्य प्रमाणस्य प्रवृत्तिः प्रमातृत्वेन च प्रमो
पलक्ष्यते प्रमायाः फलस्याभावे प्रमाणं न प्रवर्त्तेत तथा च प्रमाणमप्रमाणं स्यादित्यर्थः उपसंह
रति तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि स्यादेतत् भवतु एवमज्ञानानामेव
मागमोपपत्तिप्रतिपन्नप्रत्यगात्मतत्त्वानां व्युत्पन्नानामपि पुंसां प्रमाणप्रमेयव्यवहारा दृष्ट

वाच॰
प॰
२६

घोपयाधीनां जलाग्निप्रवेशेन प्राणत्यागाद्युत्साहादिः आदिग्रहणं महापातकोपपातकसंकरीकर
णापात्रीकरणमलिनीकरणाद्युपासोपसंग्रहार्थं तदेवमात्मानात्मनोः परस्पराध्यासमाक्षेप
समाधानाभ्यां समुपपाद्य प्रमाणप्रमेयव्यवहाराविरोधेन च दृढीकृत्य तस्यानर्थहेतुतामुदाहरणप्र
पंचेन प्रतिपादयिष्यन् तत्स्वरूपमनुक्तं स्मारयति अध्यासो नामेति तस्मिंस्तद्बुद्धिरित्यवोचाम स्मृ
तिरूपः परत्र पूर्वदृष्टावभासः इत्यस्य संक्षेपाभिधानमेतत् तत्राहमिति धर्म्मितादात्म्याध्यास
मात्रं ममेत्यनुत्पादितधर्म्माध्यासं नानर्थहेतुरिति धर्म्माध्यासमेव ममकारं साक्षादशेषानर्थसंसा
रकारणमुदाहरणप्रपंचेनाह तद्यथा पुत्रभार्यादिष्विति इहतादात्म्यमात्मन्यध्यस्य देहधर्म्मं पु
त्रकलत्रादिस्वाम्यं च कृशत्वादिवदारोप्याह अहमेव विकलः सकल इति स्वस्य बाह्यसाकल्येन स्वा
म्यसाकल्यात् स्वामीश्वरः सकलः पूर्णो भवति तथा स्वाम्यवैकल्येन स्वाम्यवैकल्यात् स्वामीश्वरो वि।
कलोऽसंपूर्णो भवति बाह्यधर्म्मा ये वैकल्यादयः स्वाम्यप्रनालिकया संचारिताः शरीरे तानात्मन्य
ध्यस्यतीत्यर्थः यदा च परोध्यपेत्ते देहधर्म्मस्वाम्येऽपि गलितस्तदा केवकपानोपाधिकेषु देहधर्म्मेषु
कृशत्वादिष्वध्यासमवाह तथा च देहधर्म्मानिति देहादप्यंतरंगाणामिंद्रियाणामध्यस्तात्मभाव
नां धर्म्मान् मूकत्वादीन् ततोऽप्यंतरंगस्यांतःकरणस्याध्यस्तात्मभावस्य धर्म्मान् कामसंकल्पादी
नप्यात्मन्यध्यस्यतीति योजना तदनेन प्रपंचेन धर्म्माध्यासमुक्त्वा तस्य मूलं धर्म्म्यध्यासमाह एव
महंप्रत्ययिनमहंप्रत्ययो वृत्तिर्यस्मिन्नंतःकरणादौ सोऽयमहंप्रत्ययी तं स्वप्रचारसाक्षिणि प्रत:

26

उ॰
२६

ऽपनिषदस्य पुरुषस्याकर्त्तुरभोक्तुरधिकारविरोधात् प्रयोक्ता हि कर्म्मणः कर्म्मजनितफलभोग ।
भागी कर्मण्यधिकारी स्वामी तत्र कथमकर्त्तुः प्रयोक्तृता अभोक्तुः कर्मजनितफलोपभोगभागी तस्माद
नाद्यविद्यालब्धकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरमधिकृत्य विधिनिषेधशास्त्रं प्रवर्त्तते
एवं वेदान्ता अपि विद्यावत्पुरुषविषया एव नहि प्रमात्रादिविभागादृते तदर्थाधिगमः स त्वविद्यावं
तमनुपास्य सतो निर्मृष्टनिखिलाविद्यमनुशिष्टस्वरूपेऽवस्थापयतीति एतावानेषां विशेषः तस्मा
दविद्यावत्पुरुषविषयाण्येव प्रमाणानीति सिद्धं स्यादेतत् यद्यपि विरोधादुपयोगाभावाच्चौपनिष|
दः पुरुषाधिकारेणापेक्ष्यते तथाप्युपनिषद्भिरवगम्यमानः शक्नोत्यधिकारं निरोद्धुं तथा च पर
स्परपराहतार्थत्वेन कृत्स्न एव वेदः प्रामाण्यमपजह्यादित्यत आह शास्त्रप्राभूतात्मेति सत्यमौपनि
षदपुरुषाधिगमोऽधिकारविरोधी तस्मान्न पुरस्तात्कर्मविधयः स्वोचितं व्यवहारं निवर्त्तयन्तोऽनानु
पजातेन ब्रह्मज्ञानेन शक्या निरोद्धुं न च परस्परपराहतिर्विद्याविद्यावत्पुरुषभेदेन व्यवस्थोपप
त्तेः यथा न हिंस्यात्सर्वा भूतानीति सामान्यशास्त्रं विशेषविधानेनाभिचरन् यजेतेति शास्त्रं प्रवर्त्तमानं न हिं
स्यादित्यनेन विरुध्यते तत्कस्य हेतोः पुरुषभेदादिति प्रवर्ज्जितक्रोधारातयः पुरुषा निषेधेऽधिक्रियं
ते क्रोधारातिवशीकृतास्तु श्येनादिशास्त्र इति अविद्यावत्पुरुषविषयं नातिवर्त्तन्ते उत्तिपङ्क्ते त
देव स्फोरयति तथाहीति वर्णाध्यासः राजा राजसूयेन यजेतेत्यादि आश्रमाध्यासो गृहस्थः सह
धर्मचारिणीं विन्देदित्यादिः वयोध्यासः कृष्णकेशोऽग्नीनादधीतेत्यादिः अवस्थाध्यासः प्रतिस ।

वाच॰ प्र॰ १७

मश्रुतेनचासावप्रमाणमभ्यस्तोपिवास्तवंकर्तृत्वभोक्तृत्वाद्यात्मनोऽपनेतुमर्हति आरोपितंहि
रूपंतत्वज्ञानेनापोद्यतेनतुवास्तवमतत्वज्ञानेन नहिरज्जौरज्जुत्वंसहस्रमपिसर्पधाराप्रत्ययाअ
पवदितुमर्हन्ति मिथ्याज्ञानप्रसंजितंतुरूपंशक्यंतत्वज्ञानेनापवदितुं मिथ्याज्ञानसंसारश्च
सुदृढोपितत्वज्ञानसंस्कारेणादरनैरंतर्यदीर्घकालतत्वज्ञानाभ्यासजन्मनेनिस्यादेतत्प्राणा
द्युपासनाअपिवेदांतेषुबहुलमुपलभ्यंते तत्कथंसर्वेषांवेदांतानामात्मैकत्वप्रतिपादनमर्थ
इत्यतआह यथाचायमर्थः सर्वेषांवेदांतानांतथावयमस्यांशारीरकमीमांसायांप्रदर्शयिष्या
मः शरीरमेवशरीरकं तत्रनिवासीशारीरकोजीवात्मा तस्यत्वंपदाभिधेयस्यतत्पदाभिधेयपर
मात्मरूपतामीमांसायासातथोक्ता एतावानत्रार्थसंक्षेपः यद्यपिस्वाध्यायाध्ययनविधिनास्वा।
27 ध्यायपदवाच्यस्यवेदराशेः फलवदर्थावबोधपरतामापादयताकर्मविधिनिषेधानामिववेदां।
तानामपिस्वाध्यायशब्दवाच्यानांफलवदर्थावबोधपरत्वमापादितं यद्यपिचाविशिष्टस्तुवाक्या
र्थइतिन्यायात् मंत्राणामिववेदांतानामपिस्वार्थपरत्वमौत्सर्गिकं यद्यपिवेदांतेभ्यः चैतन्यानंदघनःक
र्तृत्वभोक्तृत्वरहितोनिःप्रपंचएकःप्रत्यगात्मावगम्यते तथापिकर्तृत्वभोक्तृत्वदुःखशोकमोहम। उ॰
यमात्मानमवगाहमानेनाहंप्रत्ययेनसंदेहवाधविरहिणाविरुध्यमानावेदांताः स्वार्थात्प्रच्युता १७
उपचरितार्थावाजपमात्रोपयोगिनोवेत्यविवक्षितस्वार्थास्तथाचतदर्थविचारात्मिकाचतुर्लक्ष
णीशारीरकमीमांसानारब्धव्या नचसर्वजनीनाहमनुभवसिद्ध आत्मासंदिग्धोवासप्रयोजनोवा।

करणप्रचारसाक्षित्वेन चैतन्योदासीनताभ्यां प्रत्यगात्मन्यध्यस्तं तदनेन कर्तृत्वभोक्तृत्वे उपपादिते
चैतन्यमुपपादयति तेन च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिविपर्ययेणान्तः
करणाद्यचेतनानां स्वविपर्ययः चैतन्यं तेन उक्तं भूतलक्षणेन तृतीया अन्तःकरणादिष्वध्यस्यति त
दनेनान्तःकरणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदंरूपश्चेतनः कर्ता भोक्ता कार्यकारणविद्याद्व
याधारोऽहंकारास्पदं संसारी सर्वानर्थसंभारभाजनं जीवात्मा इतरेतराध्यासोपादानस्तदुपादान
श्चाध्यासस्तु अनादित्वाद्बीजाङ्कुरवन्नेतरेतराश्रयत्वमित्युक्तं भवति प्रमाणप्रमेयव्यवहारेणाहंदी
कृतमपि शिष्यहिताय स्वरूपाभिधानपूर्वकं सर्वलोकप्रत्यक्षत्वेनाध्यासं स्फुटीकरोति एवमय
मनादिरनन्तस्तत्त्वज्ञानमन्तरेणाशक्यसमुच्छेदः अनाद्यनन्तत्वे हेतुरुक्तो नैसर्गिक इति मिथ्याप्र
त्ययरूपो मिथ्याप्रत्ययानां रूपमनिर्वचनीयत्वं तद्युक्तस्तथोक्तोऽनिर्वचनीयरूपत्वमर्थः प्रकृतमुप
संहरति अस्यानर्थहेतोः प्रहाणाय विरोधिप्रत्ययं विनाऽशक्यः प्रहाणमित्यत उक्तं आत्मैकत्व
विद्याप्रतिपत्तये इति प्रतिपत्तिः प्राप्तिस्तस्यै न तु जपमात्राय नापि कर्मसमुच्चयाय आत्मैकत्वं ।
विगलितनिखिलप्रपञ्चत्वमानन्दरूपस्य सतस्तत्प्रतिपत्तिर्निर्विचिकित्सा भवति ततो वेदान्ताः स
मूलघातमध्यासमुपघ्नन्तीति एतदुक्तं भवति अस्मत्प्रत्ययविषयस्यात्मा विषयस्य समीचीनत्वे सति
ब्रह्मणो ज्ञातत्वान्निःप्रयोजनत्वाच्च न जिज्ञास्यं स्यात् तदभावे च ब्रह्मज्ञानाय वेदान्ता न पठे
रन् अपि तु विवक्षितार्था जपमात्रउपयुज्येरन् नहि तदोपनिषदात्मप्रत्ययः प्रमाणं ता ।

वाच. र्थं वचनाद्भवति यथाहुः लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च सर्वतः सारभूतानि सूत्राण्याहुर्म
प्र. नीषिण इति तदेवं सूत्रलक्षणयोगाद्व्याख्यातस्य प्रथमपदमथेति व्याचष्टे तत्राथशब्दः आनन्तर्यार्थः
२८ परिगृह्यते तेषु सूत्रपदेषु मध्ये प्रथमपदमथशब्दः स आनन्तर्यार्थ इति योजना नत्वधिकारार्थोऽयम्
प्रारभ्यते यथाथैष ज्योतिरिति वेदे यथा च लोकेऽथ यथा शब्दानुशासनं अथ योगानुशासनं।
मिति तत्किमत्राधिकारार्थो न गृह्यत इत्यत आह नाधिकारार्थः कुतः ब्रह्मजिज्ञासाया अनधिका
र्यत्वात् जिज्ञासा तावदिह सूत्रे ब्रह्मणश्च तज्ज्ञानान्वयतः प्रधानं प्रतीयते न च यथा दण्डी प्रैषा
नन्वाहेत्यत्राप्रधानमपि दण्डः शब्दार्थो विवक्ष्यते एवमिहापि ब्रह्मतत्त्वज्ञाने इति युक्तं ब्रह्ममीमांसा
शास्त्रप्रवृत्त्यंगसंशयप्रयोजनसूचनार्थत्वेन जिज्ञासाया एव विवक्षितत्वात् तदविवक्षायां तत
28 दसूचनेन काकदन्तपरीक्षायामिव न ब्रह्ममीमांसायां प्रेक्षावन्तः प्रवर्तेरन् न हि तदानीं ब्रह्म वा त
ज्ज्ञानं वाभिधेयप्रयोजने भवितुमर्हतः अनध्यस्ताहंप्रत्ययविरोधेन वेदान्तानामेवंविधेऽर्थे प्रामाण्या
नुपपत्तेः कर्मप्रवृत्त्युपयोगितया च विदितार्थानां वाजपेयप्रयोगिणां चाक्रमित्येवमादीनामिवावि
वक्षितार्थानामपि स्वाध्यायाध्ययनविध्यधीनग्रहणत्वस्य संभवात् तस्मात्प्रयोजनसूचनी जिज्ञा उ.
सेह पदतो वाक्यतश्च प्रधानं विवक्षितव्या न च तस्या अधिकार्यत्वमप्रस्तूयमानत्वात् येन तत्सम २८
भिव्याहृतोऽथशब्दोऽधिकारार्थः स्यात् जिज्ञासाविशेषणत्वेन ब्रह्मज्ञानमधिकार्यं भवेन्न च तदथ
शब्देन संबध्यते प्राधान्याभावात् न च जिज्ञासा मीमांसा येन योगानुशासनवदधिक्रियेत नांतत्वं

जिज्ञासुः सन्नुविचारं प्रयुंजीतेति पूर्वपक्षः सिद्धांतस्तु भवेदेतदेवं यद्यहं ब्रह्मेत्यस्य प्रमाणं न स्यात् ।
तेन क्रमेण श्रुत्यादिवाचकत्वानुपपत्तेः श्रुत्यादिभिश्च समस्तलौकिकैश्च प्रामाण्यानभ्युपगमात् अथा
सत्वं एवं च वेदांतानां विवक्षितार्थानाप्युपचरितार्थाः किंतु तत्त्वलक्षणः प्रयोगात्मैव तेषामर्थोर्थः
तस्य च वक्ष्यमाणेन क्रमेण संदिग्धत्वात्सप्रयोजनत्वाच्च युक्ता जिज्ञासा इत्याशयवान् सूत्रकारस्तज्जि
ज्ञासामसूत्रयत् अथातो ब्रह्मजिज्ञासेति जिज्ञासया संदेहप्रयोजने सूचयति तत्र साक्षादिच्छाया
य्यत्वात् ब्रह्मज्ञाने कं तत् प्रयोजनं न च कर्मज्ञानात् पराचीनमनुष्ठानमिव ब्रह्मज्ञानात्पराचीनं कि
चिदस्ति येन एतदेवांतरं प्रयोजनं भवेत् किंतु ब्रह्ममीमांसात्वप्रतर्कितिकर्त्तव्यतानुज्ञातविषये वे
दांते गृहीते निर्विचिकित्सं ब्रह्मज्ञानमेव समस्तदुःखोपशमनरूपमानंदैकरसं परमं प्रयोजनं ।
तदर्थमधिकृत्य हि ये स्यवं तः प्रवर्त्तते नरो न च प्राप्तमप्यनाद्यविद्यावशादप्राप्तमिवेति प्रेप्सितं भ
वति यथा स्वग्रीवागतमपि ग्रैवेयकं कुतश्चिद्भ्रमात् नास्तीति मन्यमानः परेणप्रतिपादितमप्राप्त ।
मिव प्राप्नोति जिज्ञासा तु संशयकार्यमिति स्वकारणं संशयं सूचयंति संशयश्च मीमांसारंभप्रयो
जयति तथा च यथा स्त्र प्रेक्षावत्प्रवृत्तिहेतुसंशयप्रयोजनसूचनायुक्तमस्य सूत्रस्य पाठ्यत्वादितिमिमा
ह भगवान्भाष्यकारो वेदांतमीमांसाशास्त्रस्य व्याचिख्यासितस्यास्याभिविद्मादिमं सूत्रं सूत्रितवि ।
चारवचनो मीमांसाशब्दः परमपुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफलता च विचारस्य पूजित
ता तस्या मीमांसायाः शास्त्रं सा स्यते न नत्रिषिष्यते शिष्यो यया वा स्मृति पाद्यतत्तरति सूत्रं च वक्षर्यं

वाच॰ प्र॰ १९ मथशब्दमपेक्ष्य प्रथममपठितोपन्यास एवैकं पदांतरोपन्यासेन चास्यानंतर्यमर्थः पूर्वप्रकृतस्य प्रथममपठितो
पन्यासेन व्यवायात् नच पूर्वप्रकृतानपेक्षः तदनपेक्षस्य तद्विषयत्वेभावेनासमानविषयतया विकल्पा
नुपपत्तेः नहि जातु भवति किंनित्य आत्माप्रमाणानित्या बुद्धिरिति तस्मादानंतर्यं विना पूर्वप्रकृतापेक्ष
इहाथशब्दः कस्मान्न भवतीत्यत आह पूर्वप्रकृतापेक्षयाश्च फलत आनंतर्याव्यतिरेकात् अस्या
र्थः नवयमानंतर्यार्थतां व्यसनितयामहे किंतु ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धये सा च पूर्व
प्रकृतार्थपेक्षत्वेपि अथशब्दस्य सिद्ध्यतीति व्यर्थमानंतर्यार्थत्वावधारणमित्यहोऽस्माकर्मतितदिद
मुक्तं फलत इति परमार्थतस्तु कल्पांतरोपन्यासे पूर्वप्रकृतापेक्षा न चेह कल्पांतरोपन्यास इति परि
शेषात् आनंतर्यार्थ एवेति युक्तं भवतु आनंतर्यार्थः किमेवं सतीत्यत आह सति चानंतर्यार्थत्व इति
न तावदयमस्य कस्यचिदानंतर्यं वक्तव्यं तस्याभिधानमंतरेणापि प्राप्तत्वात् अवश्यं हि पुरुषः किंचि
19 त्कृत्वा किंचित्करोति न चानंतर्यमात्रस्य दृष्टमदृष्टं वा प्रयोजनं पश्यामः तस्मात्तस्यानंतर्यं वक्त।
व्यं यद्विना ब्रह्मजिज्ञासा न भवति यस्मिन्सति संभवंती भवत्येव तदिदमुक्तं यत्पूर्ववृत्तं नियमेना
पेक्ष्यत इति स्यादेतत् धर्मजिज्ञासा न भवति यस्मिन्सति संभवंती भवत्येव तदिदमुक्तं यत्पूर्ववृ उ॰ १९
त्तं नियमेनापेक्ष्यत इति स्यादेतत् धर्मजिज्ञासाया इव ब्रह्मजिज्ञासाया अपि योग्यत्वात् स्वाध्यायाध्य
यनानंतर्यं धर्मवत् ब्रह्मणोप्याम्नायैकप्रमाणगम्यत्वात् तस्य चागृहीतविषयविज्ञानाज
ननात् ग्रहणस्य च स्वाध्यायाध्येतव्य इत्यध्ययनेनैव निष्पन्नत्वात् तस्माद्वेदाध्ययनानंतर्यमे

निपातसमाहृतमानन्तर्यस्माद्वामानन्तर्यजिज्ञासायामित्यस्माद्धाथातोऽन्वयेत्यादिनानिह्नार्थे सनिवृत्त्यादि
तस्य मीमांसापदस्य पूजितविचारवचनत्वात् ज्ञानेच्छावाचकत्वात्तु जिज्ञासापदस्य प्रवृत्तिकाहि
मीमांसाया जिज्ञासायाः न च प्रवर्त्यप्रवर्तकयोरैक्यमेकत्वे तद्भावानुपपत्तेः न च स्वार्थपरत्वस्या
पपत्तौ समानमन्यार्थपरत्वकल्पनायुक्तातिप्रसंगात् तस्मात्सूत्रे जिज्ञासामात्रमनधिकार्यत्वा
दिति अथ मंगलार्थोऽथशब्दः कस्मान्न भवति तथा च मंगलहेतुत्वात् प्रत्यहं ब्रह्मजिज्ञासाका
र्येति सूत्रार्थः संपद्यत इत्यत आह मंगलस्य च वाक्यार्थे समन्वयाभावात् पदार्थ एव हि वा।
र्थे समन्वीयते स च वाच्यो लक्ष्यो वा न चेह मंगलमथशब्दस्य वाच्यं लक्ष्यं वा किं तु मृदंगशंखध्व
निवदथशब्दश्रवणमात्रकार्यं न च कार्यज्ञाप्ययोर्वाक्यार्थे समन्वयः शाब्दव्यवहारे दृष्ट इत्यर्थः
तत्किमिदानीं मंगलार्थोऽथशब्दस्तेषु तेषु न प्रयोक्तव्यः तथा च ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्म।
णः पुरा कंठं भित्त्वा विनिर्यातौ तस्मान्मांगलिकावुभौ इति स्मृतिवाक्योपरमत आह अर्थान्तरप्र
युक्त एव सथशब्दः श्रुत्या मंगलप्रयोजनो भवति अर्थान्तरेष्वानन्तर्यादिषु प्रयुक्तोऽथशब्दः श्रु
त्याश्रवणमात्रेण वेणुवीणाध्वनिवन्मंगलं कुर्वन् मंगलप्रयोजनो भवति अन्यार्थमानीयमा।
नोदकुंभदर्शनवत् तेन न स्मृतिव्याकोपो नवेदानन्तर्यार्थस्य सतोऽस्य श्रवणमात्रेण मंगलार्थत्वे
त्यर्थः स्यादेतत्पूर्वप्रकृतापेक्षोऽथशब्दो भविष्यति नैवानन्तर्यार्थत्वं तद्यथेममेवाथशब्दं प्रकृ
त्य विमृश्यते किमयमथशब्दोऽनन्तर्ये अथाधिकारार्थ इति अत्र त्वयमथो वाक्योपक्रमेऽथशब्दः पूर्वप्रकृतम

वाच·
प्र·
२०

यात्‌ यज्ञतपोदानजन्तुकृतांतर्मलात्‌ विशुद्धसत्वाः श्रद्दधाना योगयतावगमं पुरः सरं तादात्म्यमव
गमिष्यंतीति चेत्‌ तत्किं सिद्धांतीं प्रमाणकरणं योगयतावधारणं प्रमाणं कर्मणो वक्तुमध्यव
सितोसि प्रत्यक्षाद्यतिरिक्तं वा कर्मापि प्रमाणं वेदांताविरुद्ध तन्मूलन्यायबलेन तद्योगयताव।
धारणे कृतं कर्मभिः तस्मात्तत्वमसीत्यादेः श्रुतमयेन ज्ञानेन वात्मनः परमात्मभावं गृहीत्वा
तन्मूलयाचोपपत्याव्यवस्थाप्य तदुपासनायां भावनापरोभिधायां दीर्घकालनैरंतर्यवत्सा
ब्रह्मसाक्षात्कारफलायां यज्ञादीनामुपयोगः यथाहुः सतु दीर्घकालनैरंतर्यसत्कारसेवि
तो दृढभूमिरिति ब्रह्मचर्येण तपसा श्रद्धया यज्ञादयश्च सत्काराः अतएव श्रुतिः तमेव धीरो विज्ञा
20 य प्रज्ञां कुर्वीत ब्राह्मण इति विज्ञाय तत्केपि करणेन शाब्देन प्रज्ञां भावनां कुर्वीतेत्यर्थः अत्र
यज्ञादीनामुपयोगः पारिपथिककल्मषनिवर्हणद्वारेणोपयोग इति केचित्‌ पुरुषसंस्कारद्वारे ।
णेत्यन्ये यज्ञादिसंस्कृतो हि पुरुषः आदरनैरंतर्यदीर्घकालैरासेवमानो ब्रह्मभावनामनायासे
नासमूलकाषं तितलोस्य प्रकृतमगात्मा प्रसन्नः केवलो विपाकी भवति अतएव स्मृतिः महाय
ज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः यस्यैते ष्टाश्चत्वारिंशत्संस्कारा इति च अपरे तु ज्ञानेन यथा। ३·
पाकरणेन ब्रह्मज्ञानोपयोगं कर्मणामाहुः अस्ति हि स्मृतिः ज्ञानमिच्छेदप्यकृतसमनो मो २०
क्षे निवेशयेत्‌ इति श्रूयते तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेनेत्यादिश्रुतिभ्यः
तत्तत्फलाय चोदितानामपि कर्मणां संयोगपृथक्त्वेन ब्रह्मभावनां प्रत्यंगमाचक्षते इति त्व

र्जिज्ञासाया अप्ययथाङ्कार्थ इत्यत आह स्वाध्यायानन्तर्यं तु समानं धर्मब्रह्मजिज्ञासयोः अत्र स्वा
ध्यायेन विषयेण तद्विषयमध्ययनं लक्षयति तथा चाध्ययनं धर्मजिज्ञासेत्यनेनैव गतमिति नेद
सूत्रमारब्धव्यं धर्मशब्दश्च वेदार्थमात्रोपलक्षणं तथा धर्मवद् ब्रह्मणोऽपि वेदार्थत्वाविशेषेणावे
दाध्ययनानन्तर्योपदेशसाम्यादित्यर्थः चोदयति ननु इह कर्मावबोधानन्तर्यं विशेषो धर्मजिज्ञा
सातो ब्रह्मजिज्ञासायाः अस्यार्थः विविदिषन्ति यज्ञेनेति तृतीयाश्रुत्या यज्ञादीनामंगत्वेन ब्रह्म
ज्ञाने विनियोगात् ज्ञानस्यैव कर्मतया उद्देश्यत्वेन प्राधान्यात् प्रधानसंबंधाच्चाप्रधानानां पू
दार्थान्तराणां न त्वपि च न वाक्यार्थज्ञानोत्पत्तौ अंगभावो यज्ञादीनां वाक्यार्थज्ञानस्य च वाक्यादेवो
त्पत्तेः न च वाक्यस्य सहकारितया कर्मापेक्षत इति युक्तं अकृतकर्मणामपि विदितपदप
दार्थसंगतीनां समाधिगम्यायत्तानां गुणप्रधानभूतपूर्वापरपदार्थाकांक्षासन्निधि
योग्यतानुसंधानवतामश्रुतेऽपि हेवाक्यार्थप्रत्ययोत्पत्तेः अत्र मन्त्रो वा विधिनिषेधवाक्यार्थप्र
त्ययाभावेन तदर्थानुष्ठानपरिवर्जनाभावप्रसंगः तद्बोधतस्तु तदनुष्ठानपरिवर्जने परस्प
राश्रयं तस्मिन्सति तदर्थानुष्ठानपरिवर्जनं ततश्च तद्बोध इति न च वेदान्तवाक्यानामेव स्वार्थ
प्रत्यायने कर्मापेक्षा न वाक्यान्तराणामिति सांप्रतं विशेषहेतोरभावात् तत्त्वमसीति वाक्यात्
त्वंपदार्थस्य कर्तृभोक्तृरूपस्य जीवात्मनो नित्यशुद्धबुद्धोदासीनस्वभावेन तत्पदार्थेन परमात्मे
न परमात्मना ऐक्यमशक्यो — गिमेव प्रतिपत्तुं आया ततो शुद्धसत्त्वैः योगपतावि रहविनिश्च

वाच.
प्र.
२२

गेभावनाधेयः संभवति ब्रह्मणोऽपराधीनप्रकाशतया तत्साक्षात्कारस्य तत्स्वाभाव्येनानित्यभा-
वोपपत्त्यानुपपत्तेः ततो भिन्नश्च भावनाधेयस्य साक्षात्कारस्य प्रतिभाप्रत्ययवत्संशयाक्रांतत-
याप्रामाण्यायोगात् न हि ध्यस्ततामसीकायस्य बकुलत्वं व्यभिचारो यल्लब्धेन खल्वनुमानाय बुद्धि-
वृद्धिभावयन्तः शीतात्तरस्य शिशिरभरमंथरतरकायदंडस्य ज्वालाजटिलानलसाक्षात्का-
रः प्रमाणान्तरेणासंवाद्यते विसंवादस्य बहुलमुपलंभात् तस्मात्प्रामाणिकसाक्षात्कारल-
क्षणकार्याभावात् नोपासनाया उत्पाद्यं कर्मापेक्षानच कूटस्थनित्यस्य सर्वव्यापिनो ब्रह्मण उ-
पासनातो विकारसंस्कारप्राप्तयः संभवंतीत्याद्येतत् माभूत् ब्रह्मसाक्षात्कार उपायादिरूपमुपा-
सनायाः संस्कार्यस्तु प्रत्यनिर्वचनीयानाद्यविद्याद्वयपिधानापनयनेन भविष्यति प्रतिसीरापिहि-
तानर्तकीव प्रतिसीरापनयनद्वारा रंगव्यापृतेन तत्रकर्मणामुपयोगः एतावांस्तु विशेषः प्रति-
सीरापनये पारिषदानां नर्तकीविषयः साक्षात्कारो भवति इह त्वविद्यापिधानापनयमात्र-
मेवनापरमनुपायमस्ति ब्रह्मसाक्षात्कारस्य ब्रह्मस्वभावस्य नित्यत्वेनानुत्पाद्यत्वात् अथोच्यते
कापुनरियं ब्रह्मोपासना किं शाब्दज्ञानमात्रसंततिः अहो निर्विचिकित्सशाब्दज्ञानसंततिः य- उ.
दिशाब्दज्ञानमात्रसंततिः किमपि यमभ्यस्यमानापि अविद्यामुच्छेत्तुमर्हति तत्त्वविनिश्चयस्त- २२
दभ्यासो वा सवासनं विपर्यासमुन्मूलयेत् न संशयाभ्यासः सामान्यमात्रदर्शनाभ्यासो वा नहि
स्थाणुर्वा पुरुषो वेति आरोहपरिणाहवत् द्रव्यमितिवा शतशोपि विज्ञानमभ्यस्यमानस्य

21

यस्यैव खादिरत्वस्य वीर्यार्थतामेकस्य तूभयत्वे संयोगपृथक्त्वमिति न्यायात् अत एव पारमर्षं सूत्रं
सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति यज्ञतपोदानादि सर्वं तदपेक्षा ब्रह्मभावनेत्यर्थः तस्माद्यदि श्रुत्या
दयः प्रमाणं यदि वा पारमर्षं च सूत्रं सर्वथा यज्ञादिकर्म सध्रीचीनं ब्रह्मोपासनाविशेषेण त्वयवन्मना
यविद्यातद्वासनासमुच्छेदक्रमेण ब्रह्मसाक्षात्काराय मोक्षापरनाम्ने कल्पत इति तदर्थं कर्माण्य
नुष्ठेयानि न चैतानि दृष्टादृष्टसमवाय्यारादुपकारहेतुभूतोपदेशातिदेशक्रमपर्यन्ताङ्गग्रा
मसहितपरस्परविभिन्नकर्मस्वरूपतदधिकारिभेदपरिज्ञानं विनाशक्यान्यनुष्ठातुं न च धर्ममीमां
सापरिशीलनं विना तन्निर्ज्ञानं तस्मात्साधूक्तं कर्मावबोधानन्तर्यं विशेष इति कर्मावबोधेन हि क
र्मानुष्ठानसाहित्यं भवति ब्रह्मोपासनाया इत्यर्थः तदेतन्निराकरोति न कुतः कर्मावबोधात्प्राग
प्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः इदमत्राकूतं ब्रह्मोपासनया भावनापराभिधानया कर्माण्य
पेक्षन्त इत्युक्तं तत्र ब्रूमः किं पुनरस्याः कर्मापेक्षा किं कार्ये यथाग्नेयादीनां परमापूर्वे चिरभाविफ
लानुकूले जननीये समिदाद्यपेक्षा स्वरूपे वा यथाग्नेयस्यैव खादिरवत् पुरोडाशादिद्रव्याग्निदे
वताद्यपेक्षा न तावत्कार्ये तस्याविकल्पासहत्वात् तथा हि ब्रह्मोपासनाया ब्रह्मस्वरूपसाक्षात्
कारः कार्यमभ्युपेयः स चोत्पाद्यो वा स्यात् यथा संयवनस्य पिण्डः विकार्यो वा यथावघातस्य व्री
हयः संस्कार्यो वा यथा प्रोक्षणस्योलूखलादयः प्राप्यो वा यथा गोदोहनस्य पयः न तावदुत्पाद्यः
नवत्वपटादिसाक्षात्कारवज्जडस्वभावेभ्यः पटादिभ्यो भिन्नं इद्धिमाद्याद्यो ब्रह्मसाक्षात्का

वाच. नत्वात् अन्यथा तु चैतन्यच्छायापत्तिं विनांतःकरणवृत्तेः स्वयमचेतनायाः प्रकाशत्वानुपपत्तेः सा
प्र. क्षात्कारयोगात् न चानुमितिभावितवह्निसाक्षात्कारवत् भ्रांतिभावेनास्याप्रामाण्यं तत्र वह्निस्वलक्षण
२२ स्यपरोक्षत्वात् इह तु ब्रह्मस्वरूपस्योपाधिकल्पितस्य जीवस्य प्रागप्यपरोक्षत्वात् नहि शुद्धबुद्धि
त्वादयो वस्तुतस्ततोतिरिच्यंते जीव एव तत्तदुपाधिरहितः शुद्धबुद्धादिस्वभावो ब्रह्मेति गीयते ।
न च तत्तदुपाधिविरहोपि ततोतिरिच्यते तस्माद्यथा गांधर्वशास्त्रार्थज्ञानाभ्यासाहितसंस्कारस
चिवश्रोत्रेंद्रियेण षड्जादिस्वरग्राममूर्छनाभेदमध्यक्षमनुभवति अनुभवत्येवं वेदांतार्थज्ञानाभ्या
साहितसंस्कारो जीवस्य ब्रह्मभावमंतःकरणेनेति अंतःकरणवृत्तौ ब्रह्मसाक्षात्कारे जनयितव्ये
२२ लितदुपासनायाः कर्मापेक्षेति चेन्न तस्याः कर्मानुष्ठानसहभावाभावेन तत्सहकारित्वानुपपत्तेः
न खलु तत्त्वमसीत्यादिवाक्यात् निर्विचिकित्सं शुद्धबुद्धोदासीनस्वभावकर्तृत्वाद्युपेतमपेतब्राह्मणत्वा
दिजातिं देहाद्यतिरिक्तमेकमात्मानं प्रतिपद्यमानः कर्मस्वधिकारमवबोद्धुमर्हति अनर्हश्च कथं
कर्ता वा अधिकृतो वा । यद्युच्येत न निश्चितेपि तत्त्वे विपर्यासनिबंधनो व्यवहारोनुवर्तमानो दृश्यते य
था गुडस्य माधुर्ये विनिश्चयेपि पित्तोपहतेंद्रियाणां तिक्तावभासानिवृत्तिरास्वाद्य थूत्कृत्य त्यागात् उ.
तस्मादविद्यासंस्कारानुवृत्त्या कर्मानुष्ठानं तेन च विद्यासहकारित्वमनुच्छेदनुपपत्तस्तेन च कर्मा २२
विद्यात्मकं कर्मविद्यामुपपद्धिनत्ति कर्मणो वा तदुच्छेदकस्य कुतस्तदुच्छेद इति वाच्यम् सजातीयस्वप
रविरोधिनां भावानां वस्तुतमुपलब्धेः यथा पयः पयोंतरं जरयति स्वयं च जीर्यते यथा वा विषं विषांत

राषएवेतिनिश्चयायपर्याप्तमृतेविशेषदर्शनात् ननूक्तंश्रुतमयेनज्ञानेनजीवात्मनःपरमात्मभा
वंगृहीत्वा युक्तिमयेनव्यवस्थाप्येति तस्मान्निर्विचिकित्सशाब्दज्ञानसंततिरूपोपासनाकर्मसह
कारिण्यविद्याद्वयोच्छेदहेतुः नचासावस्तुत्पादितब्रह्मानुभवात्तदुच्छेदायपर्याप्तासाक्षात्काररू
पोहिविपर्यासःसाक्षात्काररूपेणैवतत्त्वज्ञानेनोच्छिद्यते नत्वपरोक्षावभासिनादिङ्मोहालातच
क्रचलद्वृत्तमरुमरीचिसलिलादिविभ्रमेषुअपरोक्षावभासिष्वपरोक्षावभासिभिरेवदिगादि
तत्त्वप्रत्ययैर्निवृत्तिदर्शनात् नत्वाप्तवचनलिंगादिविनिश्चितदिगादितत्त्वानांदिङ्मोहादयोनि
वर्त्तंतेतस्मात्त्वंपदस्यतत्पदार्थसाक्षात्कारएषितव्यः एतावताहित्वंपदार्थस्यदुःखितत्वशोकित्वादि
साक्षात्कारनिवृत्तिर्नान्यथा नचैषसाक्षात्कारोमीमांसासहितस्यापिशब्दस्यप्रमाणस्यफलम
पितुप्रत्यक्षस्यतस्यैवतत्फलत्वनियमात् अन्यथाकुटजबीजादपिवटांकुरोत्पत्तिप्रसंगात् त
स्मान्निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितमंतःकरणंत्वंपदार्थस्यापरोक्षस्यतत्तदुपाध्याका
रनिषेधेनतत्पदार्थतामनुभावयतीतियुक्तं नचायमनुभवोयेननजन्येत अपितंतःकरणं
स्यैववृत्तिभेदोब्रह्मविषयो नचैतावताब्रह्मणोनापराधीनप्रकाशता नहिशाब्दज्ञानप्रकाश्यंप
ब्रह्मस्वरूपंप्रकाशंनभवति सर्वोपाधिविहीनंस्वयंज्योतिरितिगीयतेनतूपहितमपि यथाह
स्मभगवान्भाष्यकारः नायमेकांतेनाविषयइति नचांतःकरणवृत्तावप्यस्यसाक्षात्कारे
सर्वोपाधिविनिर्मोकः तस्यैवतदुपाधेर्विनश्यदवस्थस्यसर्वान्योपाधिविरोधिनोविद्यमा

वाच॰ प्र॰ २३ हितास्तेऽपि नाधिक्रियेरन् पश्वादिवत् तथा चायं निषिद्धमनुतिष्ठन्न प्रत्यवेयात् तिर्यगादिवदिति भि
न्नकर्मतापातः मैवं न खल्वयं सर्वथा मनुष्याभिमानरहितः किं त्वविद्यासंस्कारानुवृत्त्याऽस्य मात्रयापात
द्यभिमानोऽनुवर्त्तते अनुवर्त्तमानं च मिथ्येति मन्यमानो न श्रद्धत्त उक्तं किमतो यद्येवं एतदतो भवति ॰श्
विधिषु श्रद्धा ह्यधिकारिणामङ्गः ततश्च मनुष्याद्यभिमानेन श्रद्दधानो विधिशास्त्रेष्वधिक्रियते तथा
च स्मृतिः अश्रद्धया हुतं दत्तमित्यादिका निषेधशास्त्रं तु न श्रद्धामपेक्षते अपि तु निषिध्यमानक्रियो
न्मुखं नरं रुन्धदेव प्रवर्त्तते तथा च सांसारिक इव शब्दावगतब्रह्मतत्त्वोऽपि निषेधमतिक्रम्य प्रवर्त्तमानः
प्रत्यवैतीति न भिन्नकर्मदर्शनाभ्युपगमः तस्माद्योपासनायाः कार्य्ये कर्मापेक्षा अत एव नोपासनोत्पन्ना
वपि निर्विचिकित्सशाब्दज्ञानोत्पत्तेरनन्तरकालमनधिकारः कर्मणीत्युक्तं तथा च श्रुतिः न कर्मणा
न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः तत्किमिदानीमनुपयोग एव सर्वथेह कर्मणां तथा च विवि
दिषन्ति यज्ञेनेत्याद्याः श्रुतयो विरुध्येरन् न विरुध्येरन् आरादुपकारकत्वात्कर्मणां यज्ञादीनां तथा हि
तमेतमात्मानं वेदानुवचनेन नित्यस्वाध्यायेन ब्राह्मणा विविदिषन्ति वेदितुमिच्छन्ति न तु विदन्ति व
स्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वादिच्छायाः प्रत्ययार्थतया प्राधान्यात् उ॰
प्रधानेन च कार्यसंप्रत्ययात् न हि राजपुरुषमानयेतिवत्तत्र प्रधानोऽपि राजा पुरुषविशेषणं २३
तया शब्दत उपसर्जनं आनीयते अपि तु पुरुष एव शब्दतस्तस्य प्राधान्यात् एवं वेदानुवचनस्येव य
ज्ञस्यापि इच्छासाधनतया विधानं एवं तपसोऽनाशकस्य कामानशनमेव तपः हितमितमेध्याशि

23

रं ग्राममयाति स्वयं च ग्राममयति यथा वा कतकरजो रजोन्तराविलं पयः प्रक्षिप्तं रजोन्तराणि भिंदन् स्वयमपि
भिद्यमानमनाविलं पयः करोति एवं कर्माविद्यात्मकमपि विद्यांतराण्युपगामयत् स्वयमप्युपगच्छति
अत्रोच्यते सत्यं सदेव सोम्येदमित्युपक्रमात्तत्त्वमसीत्यंताच्छ्रुतिसंदर्भात् ब्रह्ममीमांसोपकरणात् असकृ
दभ्यस्तात् निर्विचिकित्सेयमनाद्यविद्योपादानदेहाद्यतिरिक्तप्रत्यगात्मतत्त्वावबोधजा तेऽपि अविद्यासं
स्काराननुवर्तंते मीमांसारिकाः प्रत्ययाः तद्व्यवहाराश्च तत्प्रविधानप्रपंचव्यवहारस्तन्मयात्मभि
ध्याति मन्यमानो विद्वान् न श्रद्धत्तेऽपि तेनोपहतेंद्रियपरवत् गुडं शृण्वन्नपि तस्य सत्यत्वं तथा चापंक्रि
याकर्तृकरणेतिकर्तव्यताफलप्रपंचमतात्त्विकं विनिश्चिन्वन् कथमधिकृतो नाम विदुषो ह्यधिका
रोऽन्यथा पशुशूद्रादीनामप्यधिकारो दुर्वारः स्यात् क्रियाकर्त्रादिस्वरूपविभागं चाविद्वत्समानमिहावि
द्वानभिमतः कर्मकांडे अत एव भगवान् अविद्वद्विषयत्वं शास्त्रस्य वर्णयांबभूव भाष्यकारः तस्मा
द्यथा राजजात्यभिमानकर्तृके राजसूये न विप्रवैश्यजात्यभिमानिनोऽधिकारः एवं द्विजातिक
र्तृक्रियाकरणादिविभागाभिमानकर्तृके कर्मणि न तदनभिमानिनोऽधिकारः न चानधिकृतेन स
मर्थेनापि कृतं वैदिकं कर्म फलाय कल्पते वैश्यस्तोम इव ब्राह्मणराजन्याभ्यां तेन दृष्टार्थेष्वकर्मे ।
ष्वप्यसक्तः वर्तमानः प्राप्नोतु फलं दृष्टार्थत्वात् अदृष्टार्थेषु तु शास्त्रैकसमधिगम्यं फलमनधिका
रिणि न युज्यत इति नोपासनाकार्यं कर्मापेक्षा स्यादेतत् मनुष्याभिमानवदधिकारिके कर्माणि
विहिते यथा तदभिमानरहितस्यानधिकारः एवं निषेधयोऽपि मनुष्याधिकारा इति तदभिमानर

वाच· मः कारणमुच्यते एवं चाननुष्ठितकर्म्मापि प्रागभवीयकर्मवशात् यो विरक्तस्तस्य संसारासारता
पृ· दर्शननिष्पन्नवैराग्यः कृतं तस्य कर्म्मानुष्ठानेन वैराग्योत्पादोपयोगिना प्रागभवीयकर्मानुष्ठाना
२५ देव तत्सिद्धेः इममेव च पुरुषधौरेयभेदमधिकृत्य प्रववृते भगवती श्रुतिः यदि चेतरथा ब्रह्म
चर्य्यादेव प्रव्रजेदिति तदिदमुक्तं कर्मावबोधात् प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपन्नेति
अत एव न ब्रह्मचारिण ऋणानि संति येन तदपाकरणार्थं कर्म्मानुतिष्ठेत् एतदनुरोधाच्च जायमा।
नो ह वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् इति गृहस्थः संपद्यमान इति व्याख्येयं अन्यथा यदि चेतर
था ब्रह्मचर्यादेवेति श्रुतिर्विरुध्येत गृहस्थस्यापि च ऋणापाकरणं सत्त्वशुद्ध्यर्थमेव जरामर्य
वादो भस्मान्ततावादश्च अयमेष च कर्म्मजडानविदुषः प्रति न तत्वात्मतत्वपण्डितान् तस्मान्न।
24 नन्तर्यमथशब्दार्थो यद्विना ब्रह्मजिज्ञासा न भवति यस्मिंस्तु सति भवतीति भवत्येवं न चेह कर्म्मावबोधः
तस्मान्न कर्मावबोधानन्तर्यमथशब्दार्थ इति सर्वमवदातं स्यादेतत् मा भूदग्निहोत्रयवागूपाकव
दार्थक्रमः श्रौतस्तु भविष्यति गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेदिति जाबालश्रुतेः गार्ह।
स्थ्येन हि यज्ञाद्यनुष्ठानं स्तूयते स्मरन्ति च अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः इष्ट्वा च ई·
शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् निन्दन्ति च अनधीत्य द्विजो वेदाननुत्पाद्य तथात्मजान् अनिष्ट्वा २५
चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः इति अत आह यथा च हृदयाद्यवदानानामानन्तर्यनियमः क्र
तः हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षस इति अथशब्दार्थाभ्यां क्रमस्य विवक्षितत्वात् नत

नो हि ब्रह्मणि विविदिषा भवति न तत्सर्वेषामनश्नतो मरणात् नापि चान्द्रायणादितपःशीलस्य धातु
वैषम्यापत्तेः एतानि च नित्यान्युपात्तदुरितनिबर्हणेन पुरुषं संस्कुर्वन्ति तथा च श्रुतिः स ह वात्मया
जी यो वेदेदं मेनेनाङ्गं संस्क्रियत इदं मेनेनाङ्गमुपधीयत इति अनेनेति प्रकृतं यज्ञादि परामृश
ति स्मृतिः यस्यैतेऽष्टाचत्वारिंशत्संस्कारा इति नित्यनैमित्तिकानुष्ठानप्रक्षीणकल्मषस्य विशुद्ध
सत्त्वस्याविदुष एवमुत्पन्नविविदिषस्य ज्ञानोत्पत्तिं दर्शयत्याथर्वणी श्रुतिः विशुद्धसत्त्वस्ततस्तु
तं पश्यते निष्कलं ध्यायमान इति स्मृतिश्च ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मण इत्यादिका
लं नैनैव च नित्यानां कर्मणां नित्यं हि तेनोपात्तदुरितनिबर्हणेन पुरुषसंस्कारेण ज्ञानोत्पत्तावङ्ग
भावोपपत्तेः न संयोगपृथक्त्वेन साक्षाद्विद्याभावोपपत्तेः कल्पनागौरवापत्तेः तथा हि नित्यकर्मा
नुष्ठानाद्धर्मोत्पादः ततः पापनिवर्त्तने सत्यनित्याशुचिदुःखरूपे संसारे नित्यशुचिसुखख्याति
लक्षणेन विपर्यासेन चित्तसत्त्वं मलिनयति अतः पापनिवृत्तौ प्रत्यक्षोपपत्तिप्रवृत्तिद्वाराऽपा
करणे सति प्रत्यक्षोपपत्तिभ्यां संसारस्यानित्याशुचिदुःखरूपतामप्रत्यूहमवबुध्यते ततो ।
स्यास्मिन्ननभिरतिसंज्ञं वैराग्यमुपजायते ततस्तज्जिहासोपावर्त्तते ततो हानोपायं पर्येषते
पर्येषमाणश्चात्मतत्त्वज्ञानमस्योपाय इत्युपश्रुत्य तज्जिज्ञासते ततः श्रवणादिक्रमेण त ।
ज्जानातीति विद्योपकारकत्वं तत्त्वज्ञानोत्पादं प्रति चित्तसत्त्वशुद्ध्या कर्मणां युक्तं इममेवा
र्थमनुवदति भगवद्गीता आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते योगारूढस्य तस्यैव श

वाच॰
प्र॰
२५

रः नोवल्तु गोदोहनं द्रव्यमपाश्रित्य प्रमाणं स्यात् सूत्रमावर्तयितं ग्रहेति ततव्यापारांतराविष्टं श्रूयते
यतस्तदंगक्रममतिपतेत् प्रणयनाश्रितं च प्रतीयते चमसेनापः प्रणयेत् गोदोहनेन पशुकामस्येति
समभिव्याहारात् योप्यत्राच्यापांप्रणयनं प्रति तस्मात्क्रत्वर्थाप्प्रणयनाश्रितत्वात् गोदोहनस्य
तत्क्रमेण पुरुषार्थमपि गोदोहनं क्रमवदिति सिद्धं क्रतिनिराकरणेनैवेष्टिसोमक्रमवदपि क्रमो
पाल्यो वेदितव्यः योयप्रोषिताधिकृताधिकाराभावेपि क्रमो विवक्षितोन्यथैकफलावच्छेदो भवेत् ।
यथाग्नेयादीनां षण्णामेकस्वर्गफलावच्छिन्नानां यदिवाजिज्ञासप्रयुक्तप्रणेयोधर्मः स्यात् यथा च
तुर्लक्षण्यां श्रूयमाणं प्रस्थकेनचित्केनचिदंशेनैकैकेन लक्षणेन श्रूयते तत्र चतुर्णां लक्षणा
नां जिज्ञासाभेदेन परस्परसंबंधे सति क्रमो विवक्षितस्तथेहाप्येकजिज्ञासत्वया धर्मप्रसजिज्ञास
योः क्रमो विवक्षेत न चैतदुभयमप्यस्तीत्याह फलजिज्ञासाभेदाच्च फलभेदं विभजते प्रभ्युद
यफलं धर्मज्ञानमिति जिज्ञासाभावस्तु तेन ज्ञानतंत्रत्वात् ज्ञानफलं जिज्ञासाफलमिति भावः न
केवलं स्वरूपतः फलभेदः तदुत्पादनप्रकारभेदादपि तद्भेद इत्याह तच्चानुष्ठानापेक्षं प्रसक्ता
नेन चानुष्ठानांतरापेक्षं यथाद्धृज्ञानाभ्यासाज्ञानुष्ठानांतरमपेक्षते नित्यनैमित्तिककर्मानुष्ठा। उ॰
न सहभावस्यापालतत्वादिति भावः जिज्ञास्यभेदमासंनिकमाह भव्यश्च धर्म इति भविता भाव्यः २५
कर्त्रतिरिक्तस्यः भविता च भावकव्यापारनिवर्त्यत्वात् तयात तत्रबद्वत इति ततः प्राक्तनकालेनासी
न्नर्थः भूतं सत्यं सदेकांततः न कदाचिदसदित्यर्थः न केवलं रूपतो जिज्ञास्ययोर्भेदोऽज्ञापक

25

येह क्रमनियमो विवक्षितः श्रुत्यानयैवानियमप्रदर्शनात् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्
गृहाद्वा वनाद्वा इति एतावता हि वैराग्यमुपलक्षयति अत एव यदहरेव विरजेत्तदहरेव प्रव्रजेदि
ति श्रुतिः निंदावचनं चाविशुद्धसत्त्वपुरुषाभिप्रायं अविशुद्धसत्त्वो हि मोक्षमिच्छन्नुत्क्रमस्थानडपा
येः प्रवर्त्तमानो गृहस्थधर्ममपि नित्यनैमित्तिकमनाचरन् प्रतिक्षणमुपचीयमानपाप्माऽधो गच्छ
तीत्यर्थः स्यादेतन्माभूत् श्रौतस्त्वार्थो वा क्रमः पाठस्थानमुख्यप्रवृत्तिप्रमाणकस्तु कस्मान्न भवती।
त्यत आह शेषयोः शेषित्वे प्रमाणाभावात् शेषाणां समिदादीनां शेषिणां चाग्नेयादीनां एकफलव
दुपकारोपनिबद्धानामेकफलावच्छिन्नानामेकप्रयोगवचनोपगृहीतानामेकाधिकारिकर्तृका
णां एकपौर्णमास्यमावास्याकालसंबद्धानां युगपदनुष्ठानाशक्तेः सामर्थ्यात् क्रमप्राप्तौ तद्विशे
षापेक्षायां पाठादयः तद्भेदनियमाय प्रभवंति यत्र तु न शेषशेषिभावो नाप्येकाधिकारावच्छेदो
यथा सौर्यार्यमणप्राजापत्यादीनां तत्र क्रमभेदापेक्षाभावात् न पाठादि क्रमविशेषनियमे प्रमा
णं अवर्जनीयतया तत्रावगतत्वात् न चेह धर्मब्रह्मजिज्ञासयोः शेषशेषिभावे श्रुत्यादीना
मन्यतमत्प्रमाणमस्तीति ननु शेषशेषिभावेपि क्रमनियमो दृष्टः यथा गोदोहनस्य पुरुषार्थस्य ।
दर्शपौर्णमासिकैरंगैः सह यथा वा दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति दर्शपौर्णमाससोम
योः शेषशेषिणोरित्यत आह अधिकृताधिकारे च प्रमाणाभावादिति योजना स्वर्गकामस्य हि दर्श
पौर्णमासाधिकृतस्य पशुकामस्य सतो दर्शपौर्णमासक्रत्वर्थे प्रणयनाश्रिते गोदोहनेऽधिका

वाच. भ्रु. २६ बोधनत्वनिश्चयः समारोपेणापि तदुपपत्तेः तस्मान्न बोधविधिपरा वेदान्ता इति सिद्धं प्रकृतं उपसं
हरति तस्मात्किमपि वक्तव्यमिति यस्मिन्नसति ब्रह्मजिज्ञासा न भवति सतीत भवंती तदेव वक्तव्यमित्यर्थः
तदाह उच्यते नित्यानित्यवस्तुविवेक इत्यादिना नित्यः प्रमाणगम्य आत्मा अनित्या देहेन्द्रियविषयादयः त
द्विषयश्चेद्विवेको निश्चयः कृतमस्य ब्रह्मजिज्ञासया ज्ञातत्वाद्ब्रह्मणः अथ विवेकोऽज्ञानमात्रं न निश्चयस्त
थासत्येष विपर्ययादन्यः संशयः स्यात् तथा च वैराग्यं भावयेत् अभाव यत्नकथं ब्रह्मजिज्ञासाहेतुः
तस्मादेवं व्याख्येयं नित्यानित्ययोर्वस्तुनोरिति नित्यानित्यवस्तुनी तद्धर्मः नित्यानित्ययोर्धर्मिणोस्तद्धर्मो
णोंच विवेको नित्यानित्यवस्तुविवेकः एतदुक्तं भवति माभूदिदं तदृतं नित्यमिति इदं तदनृतमनि
त्यमिति धर्मिविशेषयोर्विवेकः धर्ममात्रयोर्नित्यानित्ययोस्तद्धर्मयोश्च विवेकं निश्चिनोत्येव नित्य
त्वं सत्यत्वं तद्यस्यास्ति तन्नित्यं तथा वाक्यागोचरः अनित्यत्वमसत्यत्वं तद्यस्यास्ति तदनित्यमनृतं तथा
वाचानाख्यागोचरः तदेतेष्वनुभूयमानेषु पुष्पादसमस्यत्ययगोचरेषु विषयविषयिषु यदृतं नि
त्यं सुवं व्यवस्थापयते तद्वाक्यागोचरो भविष्यति यदनृतं भविष्यति तत्प्रत्ययपरीतं तदाप्तस्तदृ
तिसोऽयं नित्यानित्यवस्तुविवेकः आनन्दीयदेहिकाद्वाकर्मणो विशुद्धसत्वस्य भवत्यनुभवोपप उ.
त्तिभ्यां न खलु सत्यमनामनर्किंचिदस्तीति वाच्यं तदभावे तदधिष्ठानस्यानृतस्याप्यनुपपत्तेः अ २६
नवाधिनापि शून्यताया एव तत्त्वात् अपायस्य पुरुषयोरेषस्यानुभवोपपत्तिभ्यां एवं सुनिपुणं
निरूपयतश्चाचसमस्तलोकात्प्राचावीचेज्जन्मसत्वस्थितिप्रलयेतिविपरिवर्तमानं तदाणसुहर्तयामा

26

प्रमाणप्रवृत्तिभेदादपि भेद इत्याह चोदनाप्रवृत्तिभेदाच्च चोदनेति वैदिकं शब्दमाह विशेषेण
सामान्यलक्षणेन प्रवृत्तिभेदं भजते यो हि चोदना धर्मस्येति आज्ञादीनां पुरुषाभिप्रायभेदानां
असंभवादपौरुषेये वेदे चोदनोपदेशः अत एवोक्तं तस्य ज्ञानमुपदेश इति सा च स्वसाध्ये पुरुष
व्यापारे भावनायां तद्विषये च यागादौ स हि भावनाविषयः तदधीननिरूपणत्वात्तदुपत्तेस्तु भावना
याः षित्स्वं वंधन इत्येतस्या धातोर्विषयपदत्वमतस्ते: भावनायास्तद्वारेण च यागादेरपेक्षितोपायतामव
गमयंतीत्युक्तेष्टोपहारत्वेन पुरुषं नियुंजानैव यागादिधर्ममभिववोधयति नान्यथा अत्र चोदना
तत्पुरुषमवबोधयत्येव केवलं न तत्प्रवर्त्तयत्यवबोधयति कुतः अवबोधस्य प्रवृत्तिरहितस्य चो
दनाजन्यत्वात् नन्वात्मा ज्ञातव्यः इत्येतद्विधिपरैर्वेदांतैस्तद्वाक्यतयाऽवबोधे प्रवर्त्तयद्भिरेव पुरुषा
प्रत्यवबोध्यत इति समानतंत्र धर्मे चोदनाभिधेयचोदनानामित्यत आह न पुरुषोऽवबोधे नियुज्य
ते अयमभिसंधिः न तावद्ब्रह्मसाक्षात्कारे पुरुषो नियोक्तव्यः तस्य ब्रह्मस्वाभाव्येन नित्यत्वादका
र्यत्वात् नाप्युपासनायां तस्या अपि ज्ञानप्रकर्षहेतुभावस्यान्वयव्यतिरेकसिद्धत्वात् प्राप्तत्वेनावि
धेयत्वात् नापि शाब्दबोधे तस्याप्यधीतवेदस्य पुरुषस्य विदिततदर्थस्य समधिगतशब्दन्यायत
त्त्वस्याप्रत्यूहमुपपत्तेः एतदेव दृष्टांतमाह यथा ज्ञातार्थेति दार्ष्टांतिके योजयति तद्वदिति अपि चा
त्मज्ञानविधिपरेषु वेदांतेषु नात्मनस्तत्त्वविनिश्चयः स्यात् न हि तदात्मपरत्वे किंतु ज्ञा
नविधिपरायणत्वमत्र तत एव तेषामर्थः न चावबोधस्यावबोध्यनिष्ठत्वादपेक्षिततत्त्वादन्यपरस्यापि

वाच. पृ. २२

मेवानन्तर्येण धर्मजिज्ञासाया इत्याह तेषु हीति न केवलं जिज्ञासामात्रमपि तु ज्ञानमपीत्याह ज्ञातुं चेति
उपसंहरति तस्मादिति क्रमप्राप्तमतःशब्दं व्याचष्टे अतःशब्दो हेत्वर्थः तमेवातःशब्दस्य हेतुरूपम
र्थमाह यस्माद्वेद इति अत्रैवं प्रतिचोद्यते न यथोक्तसाधनसंपन्नानन्तरं ब्रह्मजिज्ञासा भवति सैव
त्वनुपपन्ना इहामुत्रफलोपभोगविरागस्यानुपपत्तेः अनुकूलवेदनीयं हि फलमिष्टं लक्षणत्वात्
फलस्य न चानुरागहेतावस्य वैराग्यं भवितुमर्हतीति दुःखानुषङ्गदर्शनात् सुखेऽपि वैराग्यमि
ति चेत् हन्त भोः सुखानुषङ्गाद्दुःखेऽप्यनुरागो न कस्माद्भवति तस्मात्सुखे उपादीयमाने
दुःखपरिहारे प्रयतितव्यं अवर्जनीयतया दुःखमागतमपि परिहृत्य सुखमात्रं भोक्ष्यते न च
यथा मत्स्यार्थी सशल्कान्सकण्टकान्मत्स्यानुपादत्ते स यावदादेयं तावदादाय निवर्तते यथा वा धा
27 न्यार्थी सपलालानि धान्यान्याहरति स यावदादेयं तावदादाय विनिवर्तते तस्माद्दुःखभयान्ना
नुकूलवेदनीयमैहिकं चामुष्मिकं वा सुखं परित्यक्तुमुचितं न हि मृगाः सन्तीति शालयो नोप्यन्ते
भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते अपि च दृष्टं सुखं चन्दनवनितादिसंगजन्म तदपि ताव
त्क्षणेन दुःखेनाक्रान्तत्वात् अतिभीरुणा मजेन्नापि न त्वामुष्मिकं स्वर्गादि तस्याविनाशित्वात् श्रूय टी. २२
ते हि अपाम सोमममृता अभूमेति तथा चाक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति न च कृत
कत्वहेतुकं विनाशित्वानुमानमत्र संभवति नरशिरःकपालशौचवदागमबाधितविषयत्वात्
तस्माद्यथोक्तसाधनसंपन्नाभावात् न ब्रह्मजिज्ञासेति प्राप्ते एवं प्राप्तमाह भगवान्सूत्रकारः

होरात्रार्द्धमासमासर्त्वयनवत्सरयुगचतुर्युगमन्वंतरप्रलयमहाप्रलयमहासर्गावांतरसर्गसं
सारसागरोर्मिभिरनिशमूह्यमानं तापत्रयपरीतमात्मानं च जीवलोकं चावलोक्यास्मिन्संसारमंड
लेऽनित्याशुचिदुःखात्मकं प्रसंख्यानमुपावर्त्तते ततोस्येह नित्यानित्यवस्तुविवेकलक्षणा
त्प्रसंख्यानादिहामुत्रार्थभोगविरागो भवति अर्थ्यते प्राप्यत इत्यर्थः फलमिति यावत् तस्मिन्वि
रागोऽनाभोगात्मिकोपेक्षाबुद्धिः ततः शमदमादिसाधनसंपत् रागादिकषायमदिरामत्तं मन
स्तेषु तेषु विषयेषूच्चावचमिंद्रियाणि प्रवर्त्तयद्विविधाश्च प्रवृत्तीः प्राणपोषणपफलाभावयत्पुरु
षमतिचारैर्विविधदुःखज्वालाजटिले संसारकुहरे भुजिष्यं करोति प्रसंख्यानाभ्यासलब्धवैराग्य
परिपाकभग्नरागादिकषायमदिरामदं तु मनः प्रकर्षेणावर्जीयते वशीक्रियते सोयमेव वैरा
ग्यहेतुको मनोविजयः शम इति वशीकारसंज्ञ इति वाख्यायते विजितं च मनः तत्तद्विषयनि
योगयोग्यतां नीयते सोयमस्य योग्यता दमः यथा दांतोयं वृषभः प्रवाहं हलशाकटादिवहनयोग्यः
कृतः इति गम्यते आदित्यहृदयेन चाविषयतीति ज्ञाततत्परमतत्त्वश्रद्धाः संसृज्यंते अत एव श्रु
तिः तस्माच्छांतो दांत उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत् सर्वमात्मनि प
श्यतीति तदेतस्य शमदमादिरूपस्य साधनस्य संपत् प्रकर्षः शमदमादिसाधनसंपत् ततो ।
स्य संसारबंधनान्मुमुक्षा भवतीत्याह मुमुक्षुत्वं चेति तस्य च नित्यशुद्धबुद्धमुक्तसत्यस्वभावब्र
ह्मज्ञानं मोक्षकारणं इत्युपपत्तेर्जिज्ञासा भवति धर्मजिज्ञासायाः प्रागूर्द्ध्वं च तस्मात्तेषा

वाच॰ ब्रह्मणो जिज्ञासेत्युच्यते तत्रानेकार्थत्वाद्ब्रह्मशब्दस्य संशयः कस्य ब्रह्मणो जिज्ञासेति अस्ति ब्रह्मश।
प्र॰ ब्दो विप्रतपस्त्वजात्यो यथा ब्रह्महत्येति अस्ति च वेदे यथा ब्रह्मोक्तमिति अस्ति च परमात्मनि यथा ब्रह्मवेद
२८ ब्रह्मैव भवतीति तमिमं संशयमपाकरोति ब्रह्म च वक्ष्यमाणलक्षणमिति यतो ब्रह्मजिज्ञासां प्रतिज्ञा
यत उत्तापनाय परमात्मलक्षणं प्रणयति ततो वगच्छामः परमात्मजिज्ञासैवेयं न विप्रत्वजात्यादि।
जिज्ञासेत्यर्थः षष्ठीसमासपरिग्रहेणेयं कर्मणि षष्ठी किं न शेषलक्षणा संबंधमात्रे च शेष इति ब्र
ह्मणो जिज्ञासेत्युक्ते ब्रह्मसंबंधिनी जिज्ञासेत्युक्तं भवति तथा च ब्रह्मस्वरूपप्रमाणयुक्तिसाधनप्रयो
जनजिज्ञासाः सर्वा ब्रह्मजिज्ञासयावरुद्धा भवंति साक्षात्पारंपर्येण ब्रह्मसंबंधात् कर्मषष्ठ्यां तु
२8 ब्रह्मशब्दार्थः कर्मस्य च स्वरूपमेवेति तत्प्रमाणादयो नावरुध्येरन् तथा चाप्रतिज्ञातार्थचिंता प्रमा
णादिषु भवेदिति ये मन्यंते तान्प्रत्याह ब्रह्मण इति कर्मणीति अत्र हेतुमाह जिज्ञास्येति इच्छायाः प्र
तिपन्नसंबंधो ज्ञानं ज्ञानस्य विज्ञेयं ब्रह्मणो ज्ञानं तेयं विना न निरूप्यते नच जिज्ञासा ज्ञानं विनेति
प्रतिपन्नसंबंधात्प्रथमं जिज्ञासायाः कर्मैवापेक्षते न तु संबंधमात्रं तदंतरेण सति कर्मणि तन्निरूप
णात् नहि चंद्रमसमादित्यं चोपलभ्य कस्यायमिति संबंध्यन्वेषणं भवति तत् ज्ञानमित्युक्ते विषया
न्वेषणं किं विषयमिति तस्मात्प्रथममपेक्षितत्वात् कर्मत्वमेव ब्रह्मणः संबध्यते तेन संबंधिमात्रेणा। ३॰
तस्य जघन्यत्वात् तथा च कर्मणि षष्ठीत्यर्थः ननु सत्यं न जिज्ञास्यमंतरेण जिज्ञासा निरूप्यते जिज्ञा २८
स्यांतरं तस्या भविष्यति अस्य तु शेषितया संबंधः स्यात् इत्यत आह जिज्ञास्यांतरेति निगूढाभिप्रायश्चोद

अतस्तस्यार्थस्याचष्टे भाष्यकारः यस्माद्वेद एवेति अयमभिसंधिः सत्यं मृगाभिलाषुकादयः प्राक्याप
रिहारेण पावककृषीवलादिभिः दुःखं तत्तदनेकविधानेककारणसंपातजमशक्यपरिहारमंततः सा
धनपारतंत्र्यं च क्षयितालक्षणयोर्दुःखयोः समस्तकृतकसाध्याविनाभावनियमात् नहि मधुविषसं
पृक्तमन्नं विषपरित्यागेन मधु भुंजीत शक्यं शिल्पिवरेणापि भोक्तुं क्षयितानुमानोपोद्बलितं च तस्य ।
यो ह कर्मजितिनइत्यादिवचनं क्षयिताप्रतिपादकं अपाम सोमं अमृता इत्यादिकं वचनं मुख्यासंभवे जघन्यवृ
त्तितामापादयति यथाहुः पौराणिकाः आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इति अतश्च ब्रह्मप
देन तत्प्रमाणं वेद उपस्थापितः स च योगपत्या यथेह कर्मजित इत्यादिः सर्वनाम्ना परामृष्यते हेतुः
पंचम्या निर्दिश्यते स्यादेतत् यथा स्वर्गादेः कृतकस्य सावयवस्य क्षयितैवं ब्रह्मणोऽपि स्यात् तथा
ह तथा ब्रह्मविज्ञानादपीति तेनायमर्थः अतः स्वर्गादीनां क्षयिताप्रतिपादकात् ब्रह्मज्ञानस्य च
परमपुरुषार्थताप्रतिपादकादागमाद्यथोक्तसाधनसंपत्तिः ततश्च जिज्ञासेति सिद्धं श्रीः ब्रह्म ।
जिज्ञासापदव्याख्यानमाह ब्रह्मण इति षष्ठीसमासप्रदर्शनेन प्राचां वृत्तिकृतां ब्रह्मणे जिज्ञासा
ब्रह्मजिज्ञासेति चतुर्थीसमासः परास्तो वेदितव्यः तदर्थ्यसमासे प्रकृतिविकृतिग्रहणं कर्तव्य ।
मिति कात्यायनीयवचनेन यूपदार्वादिष्वेव प्रकृतिविकारभूतेषु चतुर्थीसमासनियमात् अप्र
कृतिविकारभूते तु न्येव माद्यौ तन्निषेधात् अश्वघासादयः षष्ठीसमासा भविष्यन्ति अश्वघासादि
षु षष्ठीसमासप्रतीतिविधानात् षष्ठीसमासेऽपि च ब्रह्मणो वाच्यत्व प्राधान्योपपत्तिरिति स्यादेतत्

वाच॰ प्र॰ ३५

ह्मावगतिर्हि पुरुषार्थः किमभ्युदयः नेत्याह निःश्रेयसं विगलितनिखिलदुःखानुषंगपरमानंदघनब्र
ह्मावगतिर्ब्रह्मणः स्वभावइति सैव निःश्रेयसं पुरुषार्थः स्यादेतत् नब्रह्मावगतिः पुरुषार्थः पुरुषव्या
पारव्याप्योहि पुरुषार्थः नचास्याब्रह्मस्वभावभूतायाउत्पत्तिविकारप्राप्तयः संभवंति तथासत्यनित्य
त्वेनतस्याभावानुपपत्तेः नचोत्पत्त्याद्यभावेव्यापारव्याप्यता तस्मान्नब्रह्मावगतिः पुरुषार्थइ
त्यतआह निःशेषसंसारबीजाविद्याद्यनर्थनिवर्हणात् यद्यपिब्रह्मावगतौब्रह्मस्वभावेनोत्पत्त्यादयः
संभवंति तथाप्यनिर्वचनीयानाद्यविद्यावशात्ब्रह्मस्वभावोप्यपराधीनप्रकाशोपिप्रतिभानपिनप्र
तिभातीवपराधीनप्रकाशइवदेहेंद्रियादिभ्योभिन्नोप्यभिन्नइवप्रतिभासतइतिसंसारबीजाविद्याद्य
नर्थनिवर्हणात् प्राप्तमप्राप्तमिवतस्मिन्सतिप्राप्तइवभवतीतिपुरुषेणार्थ्यमानत्वात्पुरुषार्थइति
युक्तं अविद्यादीत्यादिग्रहणेनतत्संस्कारोवक्ष्यते अविद्यादिनिवृत्तिरुपासनाकार्यादंतःकरण
वृत्तिभेदात्साक्षात्कारादितिद्रष्टव्यं उपसंहरति तस्माद्ब्रह्मजिज्ञासितव्यमुक्तलक्षणेनमुमुक्षुणा
नखलुतत्त्वज्ञानंविनासवासनविविधदुःखनिदानमविद्योच्छिद्यते नचतदुच्छेदमंतरेणविग ।
लितनिखिलदुःखानुषंगानंदघनब्रह्मात्मसाक्षात्काराविर्भावोजीवस्य तस्मादानंदघनब्रह्मा ३॰
त्मतामिच्छतातदुपायोज्ञानमेषितव्यं तच्चनकेवलेभ्योवेदांतेभ्योऽपितुब्रह्ममीमांसोपकर २५
णेभ्यइति उद्ध्यानिभेनब्रह्ममीमांसायांप्रवर्त्तते नहवेदांतेषुनदर्थविवक्षायांवानतत्फ
लवदर्थावबोधपरतायांवाध्यायाध्ययनविधेः सूत्रितत्वादथातोधर्मजिज्ञासेत्यनेनैवप्रव

29

यतिनतुशेषषष्ठीपरिग्रहेपीति सामान्यसंबंधस्यविशेषसंबंधाविरोधेनकर्मतायाअविवक्षणेनजि
ज्ञासानिरूपणोपपत्तेरितिमर्मः निरूढाभिप्रायएवंदूषयति एवमपिप्रत्यक्तंब्रह्मणइतिवाच्यस्य
कर्मत्वस्यजिज्ञासयाप्रथममपेक्षितस्यचप्रथमसंबंधार्हस्यचान्वयपरित्यागेनपश्चात्कथंचिदपे
क्षितस्यसंबंधिमात्रस्यसंबंधोजघन्यः प्रथमः प्रथमस्त्वजघन्यइतितुस्याद्‌तन्मायतनत्वप्रत्यक्त
परोक्षाभिधानेचयाथार्थ्यमाप्रामाण्यम्स्फुटत्वास्फुटत्वाभिप्रायंचोदकः स्वाभिप्रायमुद्घाटयति नव्य
पोब्रह्माश्रिताशेषेतिव्याख्यातमेतदधस्तात्समर्थितान्स्वाभिसंधिमुद्घाटयतिनप्रधानपरिग्रह
इति वास्तवंप्राधान्यंब्रह्मणःशेषसंनिदर्शनमतिरोहितार्थं श्रुतिनुगमश्चातिरोहितार्थः तदेव।
मभिमतंसमासेव्यवस्थाप्यजिज्ञासापदार्थमाह ज्ञातुमितिस्यादेतत् नज्ञानमिच्छाविषयः सुखदुः
खावाप्तिपरिहारौवातदुपायोवातद्वारेणेच्छागोचरः नचैवंब्रह्मज्ञानेनावस्त्वेनतदनुकूलमितिवा।
श्रुतिकृतनिवृत्तिरितिवातदुभूयत्वेनापितयोरुपायः तस्मिन्सत्यपितावभेदस्यादर्शनात् अनुवर्त्त
मानस्यदुःखस्यानुवृत्तेः तस्मात्सूत्रकारवचनादिपिकर्मताज्ञानस्येत्यतआह अवगतिपर्यंतमि
तिनकेवलंज्ञानमिष्यते किंत्ववगतिसाक्षात्कारंकुर्वदवगतिपर्यंतंसच्चवाच्याघाइच्छायाः कर्मकस्या
त्फलविषयत्वादिच्छायास्तदुपायेफलपर्यंतंगोचरयतीवेतिशेषः ननुभवत्ववगतिपर्यंतज्ञा।
नंकिमेतावतापीष्टंभवति नह्यन्नपेक्षाणीयविषयमवगतिपर्यंतमपिज्ञानमिष्यतइत्यतःआह
ज्ञानेनेतिप्रमाणेनावगंतुमिष्टंब्रह्मभवतु ब्रह्मविषयावगतिः एवमपिकथमिष्टमित्यतआह ब्र

30

वरा मस्तावदापाततो विचाराद्विनाप्यस्ति अत्र च ब्रह्मणोन्यादिनागमेन तद्विषयमवगमं लक्षयति तद
स्तितत्पमस्तिविमर्शो विचारात् प्रमानिर्णयात् निमेति तत्पितामुदाहरणं तु: एवमपाद्य पतिश्रुद्धेति देहा
द्युपाधिकमपि तु: एवमपाकरोति बुद्धेस्तपराधीन प्रकाशमानानंदात्मतां दर्शयति आनंदप्रकाश
योरभेदात् तत्प्रसादेन तत् विमुक्तो ममा ममेत्येतेश्रुद्धत्वादप: प्रयांते ततस्तु आगदेहाद्यभेदेनतद्धर्मजन्मम
रणादि तु: एवमेवमादिरपत उक्तं मुक्तेति सदेव मुक्त: सदेवकेवलोऽनाद्यविद्यावशात् आत्मानत्पाच
भासत इत्यर्थ: तदेव मनोपाधिकं ब्रह्मणोरूपं दर्शयित्वा अविद्योपाधिकं रूपमाह सर्वज्ञं सर्वशक्ति
समन्वितं तदनेन जगत्कारणत्वमस्य दर्शितं शक्तिज्ञानभावाभावात्तु विधानात् कारणताभावाभाव
यो: कुत: पुनरेवं भूतब्रह्मस्वरूपावगतिरित्यत आह ब्रह्मशास्त्रेषु हीति नन्वेवं स देव सोम्येदमित्या
दीनां वाक्यानां पौर्वापर्यालोचनया उक्तभूतब्रह्मावगति: अपितु ब्रह्मपदमपि निर्वचनसामर्थ्यादि
त्ययमेवार्थ इत्याह ब्रह्मेति निर्वचनमाह बृहत्तेर्धातोरर्थानुगमात् बृंहिकर्मा हि बृंहति रतिशायने वर्तते
तच्चेदमतिशायनमनवच्छिन्नपदांतरावगमितं नित्यशुद्धबुद्धत्वादयस्याप्यनुजानातीत्यर्थ: तदेवं
तत्पदार्थस्य शुद्धत्वादे: प्रसिद्धिमभिधाय त्वंपदार्थस्याप्याह सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धि: सर्वस्य उ·
पांसुलपाद्दस्य हालिकस्यापि ब्रह्मास्तित्वप्रसिद्धि: कुत: आत्मत्वात् एतदेव स्फुटयति सर्वो हीति ३०
प्रतीतिमेवाप्रतीतिनिराकरणेन द्रढयति न नेति न न प्रत्येत्यहमस्मीति किंतु प्रत्येत्येवेति योज
ना न नाहमस्मीति च ज्ञप्तिमा न ज्ञासीदात्मानमित्यत आह यदीति अहमस्मीति न प्रतीयात्

त्रितत्वात् धर्मग्रहणस्य च वेदार्थोपलक्षणत्वेनाधर्मवत् ब्रह्मणोऽप्युपलक्षणात् यद्यपि धर्म
मीमांसावत् वेदार्थमीमांसया ब्रह्ममीमांसा स्यात्तेषु भावयात् तथापि धर्मामीमांसया न तत्प्रमाय
तेनापि ब्रह्ममीमांसाया अध्ययनमात्रानन्तर्यमिति ब्रह्ममीमांसारंभाय नित्यानित्यविवेकाद्यानन्त
र्यप्रदर्शनाय च वेदसूत्रमारंभणीयमित्यपौनरुक्त्यं स्यादेतत् एतेन सूत्रेण ब्रह्मज्ञानप्रत्युपायता
मीमांसायाः प्रतिपाद्यत उक्तं तद्विकल्पासहत्वादिति चोदयति तत्तु न ब्रह्मेति वेदान्तेभ्योऽपौरुषे
यत्वात् स्वतःसिद्धप्रमाणभावेभ्यः प्रसिद्धमप्रसिद्धं वा स्यात् यदि प्रसिद्धं वेदान्तवाक्यसमन्वयेन
निश्चयज्ञानेनाविषयीकृतं ततो न जिज्ञासितव्यं निष्पादितक्रिये कर्मण्यविशेषाधायिनः
साधनस्य साधनत्वापातिपातात् अथाप्रसिद्धं वेदान्तेभ्यस्तर्हि न ह वेदान्ताः प्रतिपादयन्तीति सर्वथा
अप्रसिद्धं नैव शक्यं जिज्ञासितुं अनुभूते हि विषये भवति ज्ञानं सर्वथा ननु सर्वभूतस्वेन चेष्य
माणमपि याकं ज्ञाने प्रमाणभावात् शास्त्रं हि तस्य प्रमाणं वक्तव्यः तथा च वस्तुनि शास्त्रयोनि
त्वादिति स्वेच्छावबोधयति कृतस्य तत्र प्रामाण्यं न च प्रमाणान्तरं ब्रह्मणि प्रक्रमते तस्मात्प्र
सिद्धत्वात् अशक्यस्यापि जिज्ञासनात् अप्रसिद्धस्येच्छाया अविषयत्वात् अशक्यत्वान्न च न ब्रह्म
जिज्ञास्यमित्याक्षेपः परिहरति उच्यते अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं अयमर्थः अगापि
ब्रह्ममीमांसायाः अधीतवेदान्तस्य निगमनिरुक्तव्याकरणादिशीलनविदितपदतदर्थसंबंध
स्य सदेव सोम्येदमग्र आसीदित्युपक्रमात् तत्त्वमसीत्यन्तात् संदर्भात् नित्यत्वाद्युपेतब्रह्मस्वरूपा

विव॰ प्र॰ ३२

विरहात् सृष्ट्यपदेऽपि सर्वोपाध्यारहितस्य पदार्थः कथं तत्त्वमागोचरः कर्ताभोक्ता स्वभावस्यापि प
रिणामितया तत्पदार्थनिमित्तत्वाय संगतिरेव अकर्तृत्वेऽपि भोक्तृत्व एदेव परिणामितयानिमित्तत्वाय सं
गतिः अभोक्तृत्वेऽपि नानात्वेनावच्छिन्नत्वात् अनिमित्तत्वादिप्रसक्तौ अद्वैतहानाच्च तत्पदार्थासंगतिरि
दं वस्त्वेव त्वंपदार्थविप्रतिपत्त्या च तत्पदार्थेऽपि विप्रतिपत्तिर्दर्शिता वेदप्रामाण्यवादिनोऽपि लोकाय
तिकादयः तत्पदार्थप्रत्यर्थमिथ्येति मन्यन्ते वेदप्रामाण्यवादिनोऽप्यौपचारिकं तत्पदार्थमविवक्षि
तं वा मन्यन्ते इति तदेवं त्वंपदार्थविप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिपत्तिं सूचयित्वा साक्षात्तत्पदार्थे वि
प्रतिपत्तिमाह अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् तदिति जीवात्मानं परा
32 मृशति न केवलं शरीरादिभ्यो जीवात्मभ्यो व्यतिरिक्तः स च सर्वस्य जगतः ईष्टे ऐश्वर्यमसिद्धार्थं भावि
कमस्य स्वरूपद्वयमुक्तं सर्वज्ञः सर्वशक्तिरिति अस्यापि जीवात्मभ्यो व्यतिरेकात् न त्वंपदार्थेन सामा
नाधिकरण्यमिति स्वमतमाह आत्मा स भोक्तुरिति परे भोक्तुर्जीवात्मनोऽविद्योपाधिकस्य स ईश्वरः
तत्पदार्थ आत्मा तत ईश्वराद् अभिन्नो जीवात्मा परमाकाशादिव घटाकाशादय इत्यर्थः विप्रतिपत्ती
रुपसंहरन् विप्रतिपत्तिबीजमाह एवं बहव इति युक्तियुक्त्याभासवाक्यवाक्याभाससमाश्रया उ॰
इति योजना ननु संतु विप्रतिपत्तयः तन्निमित्तश्च संशयः तथापि किमर्थं ब्रह्ममीमांसारभ्यत इत्य ३२
तस्याह तत्राविचार्येति तत्त्वज्ञानाद्धि निःश्रेयसाधिगमो नान्यज्ञानादतो विवेक्तुमर्हति अपि चातत्त्वज्ञा
नान्नास्तिक्ये समनर्थप्राप्तिरित्यर्थः सूत्रतात्पर्यमुपसंहरति तस्मादिति वेदान्तमीमांसाया वतर्क

अहंकारास्पदं हि जीवात्मानं चेन्न प्रतीयाद् अहमिति न प्रतीयादित्यर्थः ननु प्रमेयत्वं सर्वो जन आत्मानमहं ।
कारास्पदं ब्रह्मणो ऽन्यत्वं किं प्रमाणमित्यत आह आत्मा च ब्रह्म तदन्वमासामानाधिकरण्यात् तस्मात्तत्प
दार्थस्य शुद्धत्वादेः शक्यत्वात् त्वंपदार्थस्य च जीवात्मनः प्रत्यक्षतः प्रसिद्धेः पदार्थज्ञानपूर्वकत्वाच्च वाक्या
र्थज्ञानस्य त्वंपदार्थस्य ब्रह्मभावावगमस्तत्त्वमसीतिवाक्यादुपपद्यत इति भावः आदौ तत्र प्रथमकल्प
अर्थदोषमाह यदि तर्हि लोकश्रुति अध्यापकाध्येतृपरपराल्लोकः तत्र तत्त्वमसीतिवाक्यात् यदि
ब्रह्मात्मत्वेन प्रसिद्धमस्ति आत्मा ब्रह्मत्वेनेति वक्तव्ये ब्रह्मात्मत्वेनेत्यभेदविवक्षया गमपि तत्त्वं परि
हरति नकृतस्तद्विशेषप्रतिविप्रतिपत्तेः तदनेन विप्रतिपत्तिः साधकबाधकप्रमाणाभावे संशयबी
शायबीजमुक्तं ततश्च संशयात् जिज्ञासोपपद्यत इति भावः विवादाधिकरणं धर्मी सर्वतन्त्रसिद्धान्त
सिद्धोऽभ्युपेयः अन्यथाश्रयासिद्ध्याभिन्नाश्रयावा विप्रतिपत्तयो न स्युः विरुद्धा हि प्रतिपत्तयो विप्रति
पत्तयः न चानाश्रयाः प्रतिपत्तयो भवन्ति अनालम्बनत्वापत्तेः न च भिन्नाश्रया विरुद्धाः न ह्यनि
त्याबुद्धिर्नित्य आत्मेति प्रतिपत्तिः विप्रतिपत्ती तस्मात्त्वंपदार्थस्य शुद्धबुद्धत्वादेर्वेदान्तेभ्यः प्रतीति
त्वंपदार्थस्य च जीवात्मनो लोकतः सिद्धिः सर्वतन्त्रसिद्धान्तः तदाभासतनाया सत्त्वेन तत्तद्विशेष
श्रुयमत्र विप्रतिपत्तयः तस्मात्सामान्यतः प्रसिद्धधर्मिणि विशेषतो विप्रतिपत्तौ संशयः तद्विशेषेषु सं
शयः तत्र त्वंपदार्थे तावद्विप्रतिपत्तीर्दर्शयति देहमात्रमित्यादिना भौतैकेवलं न कर्तृत्वेन
अत्र देहेन्द्रियमनःक्षणिकविज्ञानचैतन्यपक्षेन तत्पदार्थनित्यत्वादयः तत्पदार्थेन शेषब्रह्मणे पर्यपत्ता ।

वाच. प्र. ३२ यतस्सर्वज्ञात्सर्वशक्तेः स्वभावं ब्रह्म जगज्जन्मादिकारणमिति कुतः संभावनेत्यत आह अस्य जगत इति
अचेतनाभ्यां नामरूपाभ्यां व्याकृतस्येति चेतनभावकर्तृकत्वसंभावनया प्रधानाद्यचेतनकर्तृकत्वं निरूपाख्य
कर्तृत्वं च व्यासेधयति यतः खलु नामरूपेण च व्याक्रियते तच्चेतनकर्तृकत्वं (नि)रूपा(ख्य) यथा च
टादि विवादाध्यासितं जगन्नामरूपाभ्यां व्याकृतं तस्माच्चेतनकर्तृकं संभाव्यते चेतनो हि बुद्धावा
लिख्य नामरूपे घट इति नाम्ना रूपेण च कंबुग्रीवादिना बाह्यं घटं निष्पादयति अत एव घटस्य
निर्वर्त्यस्याप्यन्तःसंकल्पात्मना सिद्धस्य कर्मकारकभावो घटं करोतीति यथाहुः बुद्धिसिद्धं तु न
32 तदसदिति तथा वा चेतनो बुद्धावनालिखितं करोतीति न यावत्संभवापितमिति भावः स्यादेतत्
चेतना ब्रह्मा लोकपाला वा नामरूपे बुद्धावालिख्य जगज्जनयिष्यंतीति कृतमत्र सर्वज्ञेन ब्रह्मणेत्य।
त आह अनेककर्तृभोक्तृकस्येति केचित्कर्तारो भवंति यथा सूदर्त्विगादयो भोक्तारः केचिद्भो।
क्तारो यथा श्राद्धवैश्वानरीयेष्ट्यादिषु पितापुत्रादयो न कर्तारः तस्मादुभयग्रहणं देशकालनिमि
त्तक्रियाफलानीतरेतरद्वंद्वः देशादीनि च तानि प्रतिनियतानि चेति विग्रहः तदाश्रयो जग
तः तत्र केचित्खलु प्रतिनियतदेशोत्पादा यथा कृष्णमृगादयः केचित्प्रतिनियतकालोत्पादा कु. ३२
यथा कोकिलादयः केचित्प्रतिनियतनिमित्ता यथा नवाम्बुदध्वनादिनिमित्ता बलाकागर्भाद
यः केचित्प्रतिनियतक्रिया यथा ब्राह्मणानां याजनादयो नेतरेषां एवं प्रतिनियतफला यथा
केचित्सुखिनः केचिद्दुःखिनः एकस्यैव सुखिनस्त एव दुःखिनः सर्वमेतदाकस्मिकारण

एवंतद्विरोधिनश्चापनेयापितर्कोऽध्वरमीमांसायांन्यायेचवेदप्रामाण्यादिप्रामाण्यपरिशोधनादिषुत
उपकरणंयस्याःसातथोक्ता तस्मात्परमनिःश्रेयससाधनब्रह्मज्ञानप्रयोजनाब्रह्ममीमांसारब्धव्ये
तिसिद्धं तदेवंप्रथमसूत्रेणब्रह्ममीमांसारंभमुपपाद्यब्रह्ममीमांसामारभतेजन्माद्यस्ययतः एत
स्यसूत्रस्यपातनिकामाहभाष्यकारः ब्रह्मजिज्ञासितव्यमुक्तं किंलक्षणंपुनस्तद्ब्रह्मेत्यत्रयद्यपिब्रह्म
स्वरूपज्ञानस्यप्रधानस्यप्रतिज्ञापातदंगान्यपिप्रमाणादीनि प्रतिज्ञातानितथापिब्रह्मस्वरूपस्यप्रा
धान्यात्तदेवाक्षिप्यप्रथमंसमर्थ्यते तत्रयथावदनुभूयतेतत्सर्वंपरिमितंप्रविशुद्धमबुद्धंविध्वंसि
नतेनोपलब्धेनतद्विरुद्धस्यनित्यशुद्धबुद्धस्वभावस्यब्रह्मणःस्वरूपंपराकांलक्षयितुं नहिज्ञात
कश्चित्कृतकत्वेननित्यंलक्षयति नचतद्धर्मेणनिमित्तत्वादिनातल्लक्ष्यते तस्मादनुपलब्धचरत्वात्
प्रसिद्धंहिलक्षणंभवति नात्यंताप्रसिद्धं एवंचनशास्त्रोप्यत्रप्रक्रमते अत्यंताप्रसिद्धतयाब्रह्मणो
पदार्थस्याविवक्षार्थत्वात् तस्माल्लक्षणाभावान्नब्रह्मजिज्ञासितव्यमित्याक्षेपाभिप्रायः तमिममा।
क्षेपंभगवान्सूत्रकारःपरिहरति जन्माद्यस्ययतइतिमाभूदनुभूयमानंजगत्तद्धर्मतयातादात्म्ये
नवाब्रह्मणोलक्षणं तदुत्पत्त्याधारभविष्यतिदेशांतरप्राप्तिरिवसवितुर्जन्माद्याद्यतितात्पर्यार्थः सू
त्रावयवान्विभजतेजन्मोत्पत्तिरादिरस्येति लाघवायसूत्रेकृतंजन्मादीतिनपुंसकप्रयोगःकृतः
तद्गुणसंविज्ञानायसमासार्थमाह जन्मस्थितिभंगमितिजन्मनश्चोत्पत्त्यादिक्रमेणनिर्देशाद्वस्तुतःसंदर्भोऽति
यद्व्यापारः स्यादेतत्प्रधानकालयदृच्छालोकपालक्रियायदृच्छास्वभावाभावेषूपप्लवमानेषु

का.च.
भ.
३३

स्थितिभंगग्रहणमित्याह यास्कपरिपठितानामिति नन्वेवमपि उत्पत्तिमात्रं सूच्यतां तन्नान्तरीयकत्वात्स्थि
तिभंगयोरित्यत आह या उत्पत्तिर्ब्रह्मणः कारणादिति त्रिभिरस्योपादानत्वं सूच्यते उत्पत्तिमात्रं
तु निमित्तकारणसाधारणमिति नोपादानत्वं सूचयेत् तदिदमुक्तं तत्रैवेति पूर्वोक्तानां कार्यकारण
विशेषणानां प्रयोजनमाह न यथोक्तेति तदनेन ग्रन्थेन प्रतिज्ञाविषयस्य ब्रह्मस्वरूपस्य लक्षणद्वा
रेण संभावनोक्ता तत्र प्रमाणं वक्तव्यं यथाहुर्नैयायिकाः संभावितः प्रतिज्ञायां पक्षः साध्येत हेतु
ना न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः यथा च वन्ध्याजननीत्यादिरिति उक्तं नाम जन्मादिसंभा
वनाहेतुः यदन्यैर्वैशेषिकादयः उत एवानुमानादीश्वरविनिश्चयमिच्छन्तीति संभावनाहेतुतां द्र
ढयितुमाह एतदेवेति चोदयति नन्विहापीति एतावतैवाधिकरणार्थसमाप्तेर्वक्ष्यमाणाधिक
रणार्थमनुवदन् सुहृद्भावेन परिहरति न वेदान्तेति वेदान्तवाक्यकुसुमग्रथनार्थतामेव दर्शय
33 ति वेदान्तेति विचारस्याध्यवसानं सवासनाविद्याद्वयोच्छेदः ततो हि ब्रह्मावगतेर्निर्वृत्तिराविर्भा
वः तर्हि ब्रह्मणि शास्त्रादृतेनुमानान्तरमनुसरणीयं तथा च कुतो मननं कुतस्तरां तदनुभवः साक्षा
त्कार इत्यत आह सत्सु त्विति वेदान्तवाक्येष्विति अनुमानं वेदान्ताविरोधि तदुपजीवि चेत्यपि द्रष्टव्यं उं.
शास्त्राविरोधित्वात्तदुपजीवित्वाच्च युक्त्या विवेचनं मननं युक्तिश्चार्थापत्तिरनुमानं वा स्यादेतत् ३३
यथा धर्मे न पुरुषबुद्धिसाहाय्यमेवं ब्रह्मण्यपि किं स्यान्न भवतीत्यत आह न धर्मजिज्ञासायामि
वेति श्रुत्यादय इति श्रुतीतिहासपुराणस्मृतयः प्रमाणमनुभवोऽन्तःकरणवृत्तिभेदो ब्रह्मसा।

रचनानिर्माणस्य ज्ञकर्तृत्वे चास्वाभाविकत्वे वा सर्वज्ञसर्वशक्तिकर्तृकत्वे च न घटते परिमितज्ञानशक्ति-
भिर्ब्रह्मरुद्रलोकपालादिभिर्जीवैस्तत्कर्तृत्वाशक्यत्वात् तदिदमुक्तं मनसाप्यचिंत्यरचनारूपस्येति
एकस्यापि हि शरीररचनामात्ररूपं मनसाशक्यं चिंतयितुं दूरेव जगद्रचनायाः किमंग पुनः कर्त्तुमि-
त्यर्थः सूत्रवाक्यं पूरयति तद्ब्रह्मेति वाक्यशेषः स्यादेतत् कस्मात्पुनर्जन्मस्थितिभंगमात्रमिहा-
दिग्रहणेन गृह्यते न तु वृद्धिपरिणामापक्षया अपीत्यत आह अन्येषामपि भावविकाराणां
वृद्ध्यादीनां त्रिष्वेवांतर्भाव इति वृद्धिस्तदवयवोपचयस्तेनाल्पावयवादवयविनो द्वितंतुकादेर-
न्य एव महान्पटो जायत इति जन्मैव वृद्धिः परिणामोपि त्रिविधो धर्मलक्षणावस्थालक्षणा उ-
त्पत्तिरेव धर्मिणो हि हाटकादेर्धर्मलक्षणः परिणामः कटकमुकुटादिः तस्योत्पत्तिः एवं क-
टकादेरपि प्रत्युत्पन्नत्वादिर्लक्षणपरिणाम उत्पत्तिः एवमेवावस्थापरिणामो नवपुराण-
त्वादिरुत्पत्तिः अपक्षयस्त्ववयवह्रासो नाश एव तस्माज्जन्मादिषु षण्णामंतर्भावान्वृद्ध्या-
दयः पृथङ्नोक्ता इत्यर्थः अथैते वृद्ध्यादयो जन्मादिष्वंतर्भवंति तथाप्युत्पत्तिस्थितिभंगमे-
वोपादातव्यं तथा सति हि तत्प्रतिपादको यतो वा इमानि भूतानीति वेदवाक्ये बुद्धिस्थीकृते ज-
न्मूलं ब्रह्म लक्षितं भवति अन्यथा तु जायतेऽस्ति विवर्द्धत इत्यादीनां ग्रहणे तत्प्रतिपादकनि-
रुक्तवाक्यं बुद्धौ भवेत् तच्च न मूलकारणप्रतिपादनपरं महासर्गादूर्ध्वं स्थितिकालेपि त-
द्वाक्योदितानां जन्मादीनां भावविकाराणामुपपत्तेः इति शंकानिराकरणार्थं वेदोक्तोत्पत्ति

वाच॰
प्र॰
३६

हणग्रहणयोरुदितानुदितहोमयोश्च विरोधात् समुच्चयासंभवे तुल्यबलतया च बाध्यबाधकभावा
भावे सत्यगत्या विकल्पः नानाग्निप्रसर्पणे निषेधतद्धारणयोश्च विरुद्धयोस्तुल्यबलतया न विक।
ल्पः किन्तु सामान्यशास्त्रस्य प्रसर्पणेन निषेधस्य धारणविधिविषये विशेषशास्त्रेण बाधः एतदु
क्तं भवति विधिप्रतिषेधयोरेव समताहृशो विषयोः नानात्यागरूप उपनीतो येन पुरुषस्य विधि
निषेधाधीनप्रवृत्तिनिवृत्त्योरपि स्यात् तन्त्रं भवतीति भूते वस्तुनि तु नैयमस्ति विधेरित्याह न तु व
स्त्वेवं नैवमिति तदनेन प्रकारविकल्पो निरस्तः प्रकारिविकल्पं निषेधति अस्ति नास्तीति
स्यादेतत् भूतेऽपि वस्तुनि विकल्पो दृष्टः यथा स्थाणुर्वा पुरुषो वेति तत्कथं न वस्तुविकल्प इत
34 उत्पन्नश्चाह विकल्पनास्त्विति पुरुषबुद्धिरन्तःकरणं तदपेक्षा विकल्पनाः संशयविपर्या।
साः सवासनमनोमात्रयोनयो वा यथा स्वप्ने सवासनेन्द्रियमनोयोनयो वा यथा स्थाणुर्वा पुरुषो
वेति वा विपर्यासः अन्यथा हि न वस्तुनः स्थाणोरन्यस्य पुरुषस्याभिधानात् ननु पुरुषतत्त्वं वा
स्थाणुतत्त्वं वा अपेक्षन्ते समाने धर्मिणि धर्मिदर्शनमात्राधीनजन्मत्वात् तस्मादयथावस्तवो वि
कल्पना न वस्तु विकल्पयन्ति नान्यथयन्ति चेत्यर्थः तत्त्वज्ञानं तु न बुद्धितन्त्रं किन्तु वस्तुतन्त्रमत उ॰
स्ततो वस्तुविनिश्चयो युक्तो न तु विकल्पनाभ्य इत्याह न वस्तुयाथात्म्येति एवमुक्तेन प्रका ३६
रेण भूतवस्तुविषयाणां ज्ञानानां प्रामाण्यस्य वस्तुतन्त्रतां प्रसाध्य ब्रह्मज्ञानस्य वस्तुतन्त्रतामा
ह तत्रैवं सतीति अत्र चोदयति ननु भूतेति यत्किल भूतार्थं वाक्यं तत्प्रमाणान्तरगोचरार्थं त

त्कारः तस्याविद्यानिवृत्तिद्वारेण ब्रह्मस्वरूपाविर्भावः प्रमाणफलं तच्च फलमिव फलमिति गमयि
तव्यं यद्यपि धर्मजिज्ञासायामपि सामग्र्यां प्रत्यक्षादीनां व्यापारः तथापि साक्षान्नास्ति ब्रह्मजिज्ञासायान्तु
साक्षादनुभवादीनां संभवोऽनुभवार्था च ब्रह्मजिज्ञासेत्याह अनुभवावसानत्वात् ब्रह्मानुभवो ब्रह्म।
साक्षात्कारः परमपुरुषार्थो निर्मृष्टनिखिलदुःखपरमानन्दरूपत्वादिति ननु भवतु ब्रह्मानुभवा
र्था जिज्ञासा न तदनुभव एव वाक्याद्ब्रह्मणस्तद्विषयत्वायोग्यत्वादित्यत आह भूतवस्तुविषयत्वाच्च ब्र
ह्मविज्ञानस्य व्यतिरेकसाक्षात्कारस्याविकल्परूपो विषयविषयिभावः नन्वेवं धर्मज्ञानमप्यनुभवावसा
नं तदनुभवस्यापि परमपुरुषार्थत्वात् तदनुष्ठानसाध्यत्वात्स्वरूपार्थस्यानुष्ठानस्य च विनाप्यनुभवं श
ब्दज्ञानमात्रादेव सिद्धेरित्याह कर्तव्ये हीति न चायं साक्षात्कारविषयतायोग्योऽप्यवर्तमानत्वात् प्रव
र्तमानत्वमस्य अनवस्थितत्वादित्याह पुरुषाधीनेति पुरुषाधीनत्वमेव लौकिकवैदिककार्याणामाह
कर्तुमकर्तुमिति लौकिकं कार्यमनवस्थितमुदाहरति यथाश्वेनेति लौकिकेनोदाहरणेन सह वैदि।
कमुदाहरणं समुच्चिनोति तथातिरात्र इति कर्तुमकर्तुमित्यस्योदाहरणमुक्तं कर्तुमन्यथा वाक
र्तुमित्यस्योदाहरणमाह उदित इति स्यादेतत् पुरुषस्वातन्त्र्यात्कर्तव्ये विधिप्रतिषेधानामानर्थक्यं
अतदधीनत्वात् पुरुषप्रवृत्तेरित्यत आह विधिप्रतिषेधाश्चात्रार्थवन्तः स्युः गृह्णातीति प्रति
षेधः उदितानुदितहोमयोर्विधी एवं नानास्थितत्वेन निषेधो ब्रह्मसत्रप्रसक्तद्वारेण विधिरित्येवंजा
तीयका विधिप्रतिषेधा अर्थवन्तः कुत इत्यत आह विकल्पोत्सर्गापवादाश्च यथा ह्योहीतौ यस्माज्ज

वाच॰
प्र॰
३४

35

स्तत्त्वेच शिष्याणां शासनात् शास्त्रमृग्वेदादि अत एव महाविषयत्वान्महत् न केवलं महाविषयत्वे
नास्य महत्त्वमपि तु अनेकाङ्गोपाङ्गोपकरणतयापीत्याह अनेकविद्यास्थानोपबृंहितस्य पुराणन्याय
मीमांसादयो दश विद्यास्थानानि तैस्तया तया द्वारोपकृतस्य तदनेन समस्तशिष्टजनपरिग्रहेणाप्रा
माण्याशङ्कापाकृता पुराणादिप्रणेतारो हि महर्षयः शिष्टास्तैस्तया तया द्वारा वेदान् व्याचक्षाणैस्त
दर्थं चादरेणानुतिष्ठद्भिः परिगृहीतो वेद इति नचायमनवबोधकोन्यथावास्पष्टबोधको येनाप्रमा
णं स्यादित्याह प्रदीपवत्सर्वार्थावद्योतिनः सर्वमर्थजातं सर्वथावबोधयन्नानवबोधको नास्पष्ट
बोधक इत्यर्थः अत एव सर्वज्ञकल्पस्य सर्वज्ञसदृशस्य सर्वज्ञस्य हि ज्ञानं सर्वविषयं शास्त्रस्याप्यभि
धानं सर्वविषयमिति सादृश्यं तदेवमन्वयमुक्त्वा व्यतिरेकमाह नहीदृशस्येति सर्वज्ञस्य गुणः
सर्वविषयता तदन्वितं शास्त्रं अस्यापि सर्वविषयत्वात् उक्तमर्थं प्रमाणयति यद्यद्विस्तरार्थं शास्त्रं
यस्मात्पुरुषविशेषात्संभवति पुरुषविशेषः ततोपि शास्त्रादधिकतरविज्ञान इति योजना अ
थ तेप्यस्मदादिभिर्यत्समीचीनार्थविषयशास्त्रं विरच्यते तत्रास्माकं वक्तृणां वाक्यात्तज्ज्ञानम
धिकविषयं नहि ते ते असाधारणधर्मा अनुभूयमाना अपि शक्या वक्तुं न खल्विक्षुक्षीरगुडादीनां
मधुररसभेदाः शक्याः सरस्वत्यापि आख्यातुं विस्तरार्थमपि वाक्यं न वक्तृज्ञानेन तुल्यविषयमिति
कथयितुं विस्तरग्रहणं सोपनयं निगमनमाह किमु वक्तव्यमिति वेदस्य यस्मान्महतो भूताद्योनेः सं
भवः तस्य महतो भूतस्य ब्रह्मणो निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं च किमु वक्तव्यमिति योजना अ

उ॰
३४

याथ्यनुवादकं दृष्टं यथा नद्यास्तीरे फलानि सन्तीति तथा च वेदान्ताः तस्माद्भूतार्थतया प्रमाणान्तरदृष्टमे
वार्थमनुवदेयुः उक्तं च ब्रह्मणि जगज्जन्मादिहेतुकमनुमानं प्रमाणान्तरं एवं च मौलिकं तदेव परीक्ष
णीयं न तु वेदान्तवाक्यानि तदधीनत्वात्तानीति कथं वेदान्तवाक्यं यथार्थतात्पर्याणामित्यर्थः प
रिहरति नेन्द्रियाविषयत्वादिति कस्मात्तु नेन्द्रियविषयत्वं प्रतीच इत्यत आह स्वभावत इति अत
एव श्रुतिः पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्निति प्रत्यगात्मनस्त्वविषय
त्वमुपपादितं यथा च सामान्यतो दृष्टमप्यनुमानं ब्रह्मणि प्रवर्त्तते तथोपरिष्टान्निपुणतरमुपपा
दयिष्यामः उपपादितं चैतदस्माभिर्विस्तरेण न्यायकणिकायां न च भूतार्थतामात्रेणानुवादतेस्य
परिहारमुपपादयिष्यामः तस्मात्सर्वमवदातं श्रुतिर्यतो वेति जन्मदर्शयति येन जातानि जीवन्ती
ति जीवानां स्थितिं यत्प्रयन्त्यभिसंविशन्तीति तत्रैव लयं अत्र च प्रधानादिसंशयनिर्णयवाक्यं आनन्दा
द्ध्येवेति एतदुक्तं भवति यथा रज्जुवृत्तान्तसहितरज्जूपादाना धारा रज्ज्वां सत्यामस्ति रज्ज्वामेव च ली
यत एवमविद्यासहितब्रह्मोपादानं जगत् ब्रह्मण्येवास्ति तत्रैव लीयत इति सिद्धं श्रीः सूत्रान्तरम
वतारयन् पूर्वसूत्रसंगतिमाह जगत्कारणत्वप्रदर्शनेनेति शास्त्रयोनित्वात् न केवलं जगद्योनित्वा
दस्य भगवतः सर्वज्ञता शास्त्रयोनित्वादपि बोद्धव्या शास्त्रयोनित्वस्य सर्वज्ञतासाधनत्वं समर्थ।
यते महत ऋग्वेदादेः शास्त्रस्येति चातुर्वर्ण्यस्य चातुराश्रम्यस्य च यथायथं निषेकादिश्मशा।
नान्तास्वब्रह्मसमूहकर्त्तोपक्रमप्रदोषपरिसमापनीयास्तनित्यनैमित्तिककाम्यकर्म्मपद्धति प्रचव

वाच॰ प्र॰ ३६ नांयोनेरपिनानेष्ठस्थानेऽत्र पूर्वपूर्वसर्गानुसारेण ताहृशताहृशानुपूर्वीविरचनात् यथाहियागादिब्र
ह्महत्यादयोऽर्थानर्थहेतवो ब्रह्मविवर्तोऽपिन सर्गान्तरे विपर्यस्यंते नहिजातुक्वचित् सर्गेब्रह्महत्या
र्थहेतुरनर्थहेतुश्चाश्वमेधो भवति अग्निर्वानदहति आपो वा दहंतितिन्द्वत् यथात्रसर्गे नियतानु
पूर्व्यावेदाध्ययनमभ्युदयनिःश्रेयसहेतुरन्यथा तदेव वाग्वज्रतयानर्थहेतुः एवं सर्गान्तरेष्व
पीति तदनुरोधात्सर्वज्ञोऽपि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारेण वेदान्विरचयन् अस्वातंत्र्यः
पुरुषास्वातंत्र्यमात्रं वा पौरुषेयत्वं रोचयंते जैमिनीया अपि तच्चास्माकमपि समानमन्यत्राभि
भिनिवेशात् नचैकस्य प्रतिभानेऽनाश्वास इति युक्तं नहि बहूनामपि अज्ञानां विक्तानां वा आश
यदोषवतां प्रतिभाने युक्त आश्वासः तत्त्वज्ञानवतस्तु वीतसमस्तदोषस्यैकस्यापि प्रतिभाने
युक्त एवाश्वासः सर्गादिभुवां ब्रह्मप्रजापतिदेवर्षीणां धर्मज्ञानवैराग्यैश्वर्यसंपन्नानामु
पपद्यते तत्त्वरूपावधारणं तत्प्रत्ययेन चार्वाचीनानामपि तत्र संप्रत्यय उपपन्नः ब्रह्म
णश्चास्य योनित्वेनास्त्वस्य वा पौरुषेयत्वं प्रामाण्यं चेति अथ वर्णकान्तरमारभते यद्वेति पूर्वेणाधि
करणेन ब्रह्मस्वरूपलक्षणसंभवो दर्शितो व्युदस्य लक्षणसंभवमुक्तमेव लक्षणस्यानेनानुमा उ॰
नत्वाशङ्कामपाकृत्यागमोपदर्शनेन ब्रह्मणः शास्त्रं प्रमाणमुक्तं अक्षरार्थस्तु अतिरोहितः ३६
शास्त्रं प्रमाणमस्य ब्रह्मणः प्रतिज्ञामात्रेण तदनेन सूत्रेणोपपादनीयमिति उत्तरं सूत्रमव
तारयति भाष्यकारः कथं पुनरिति किमाक्षेपे शुद्धबुद्धोदासीनस्वभावतयापेक्ष।

ववानेकशाखाभेदभिन्नस्य वेदस्योत्पादिः संभव इत्यंतं तदुपनयः तस्येत्यादि सर्वशक्तित्वं चेत्यंतं निगमनं
अप्रयत्नेनैवेति ईषत्प्रयत्नेन यथा लवणमयवागभूरिति देवर्षयो हि महोपरिश्रमेणापि यन्न शक्तास्त
दयमीषत्प्रयत्नेन लीलयैव करोतीति निरतिशयमस्य सर्वज्ञत्वं सर्वशक्तित्वं चोक्तं भवति अप्रय
त्नेनास्य वेदकर्तृत्वे श्रुतिरुक्ता अस्य महतो भूतस्येति यद्यपि तावद्वर्णानां नित्यत्वमाश्रित्य पक्षेतेऽपवा
दवाक्यादीनां अनित्यत्वमभ्युपेतव्यं आनुपूर्व्यादिभेदवंतो हि वर्णाः पदं पदानि चानुपूर्वीभेदवंति
वाक्यं व्यक्तिधर्मश्चानुपूर्वी न वर्णधर्मः वर्णानां नित्यानां विभूनां च कालतो देशतो वा पौर्वापर्या
योगात् व्यक्तिश्चानित्येति कथं तदुपगृहीतानां वर्णानां नित्यानामपि पदतानित्या पदानामनित्यत
या च वाक्यादीनामप्यनित्यता व्याख्याता तस्मान्नृत्तानुकरणवत्पदाद्यनुकरणं श्रीः यथा हि पाद
प्रांगात्र चलनादिनर्तकः करोति तादृशमेव शिक्षमाणाप्यनुकरोति नर्तकी न तु तदेव व्यनक्ति एवं या
दृशीमानुपूर्वीं वैदिकानां वर्णपदादीनां करोत्यध्यापयिता तादृशीमेवानुकरोति माणवको न तु तामे
वोच्चारयति आचार्यव्यक्तिर्माणवव्यक्तीनामन्यत्वात् तस्मान्नित्यानिमवादीनां न लौकिकवैदिकप
दवाक्यादि पौरुषेयत्वे विवादः केवलं वेदवाक्येषु पुरुषस्वातंत्र्यास्वातंत्र्ये प्रतिपत्तिः यथाकुर्वत्तः प्रति
बंधानः पुरुषाणां स्वतंत्रतात्र सृष्टिप्रलयमनिच्छंतो जैमिनीया वेदाध्ययनं प्रतिप्रसादृश्यपगुरुशि
ष्यपरंपराविच्छेदमिच्छंतो वेदमनादिमाचक्षते वैयासिकास्तु मतमनुवर्तमानाः श्रुतिस्मृतीतिहा
सादिसिद्धसृष्टिप्रलयानुसारेणानाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्यापि परमात्मनो नित्यस्य वेद

वा॰प॰ ३८ गविनियोगाप्रयोगात्मकं प्रवृत्तिलंभात् तद्यथाग्निहोत्रं जुहोतीत्यत्राग्निहोत्रमात्रपरं वाक्यं न तत्र विनियोगा
द्यंशेन संगति संतोष्यन्यतो लब्धत्वात् केवलमविवक्षितत्वात् तस्माद्भावनाविषयो विधिर्न सिद्ध
वस्तुनि भवितुमर्हतीति तदुपसंहरति तस्मादिति अत्रारुचिकारणमुक्त्वा पक्षांतरमुपसंह
रति अथेति एवंच सत्स्वरूपे ब्रह्मणि शास्त्रस्यानारभ्यत्वात् प्रमाणांतरेणमाहश्यामस्य रूपं व्य
वस्थाप्यते न तत् शास्त्रेन विरुध्यते तस्योपासनापरत्वात् समारोपेण चोपासनाया उपपत्ते
रिति प्रकृतमुपसंहरति तस्मादिति सूत्रेण सिद्धांतयति एवं प्राप्त उच्यते तत्तु समन्वयात्
तदेव व्याचष्टे तुशब्द इति तदित्युत्तरपक्षप्रतिज्ञां विभजते तद्ब्रह्मेति पूर्वपक्षव्यावर्तकेण
शब्दः एव इति कथं कुतः प्रकारादित्यर्थः सिद्धांती स्वपक्षहेतुप्रकारभेदमाह समन्वयात्
सम्यगन्वयः तस्मात् एतदेव विभजते सर्वेषु हि वेदांतेष्विति वेदांतानामैकांतिकीं ब्रह्मप
रतां माचित्स्मा सर्वं हि निवाक्यान्युदाहरति सदेवेति यतो वा इमानीति वाक्यं पूर्वमुदा
हृतं जगदुत्पत्तिस्थितिनाशकारणमिति चेह स्मारितमिति न पठितं येन हि वाक्यमुपक्र
मते येन चोपसंह्रियते तदेव वाक्यार्थ इति शाब्दाः यथोपांशुयाजवाक्ये नूचाः पुरोडाशयो उ॰
जामितादोषसंकीर्तनपूर्वकोपांशुयाजविधानेन तत्र इति समाधानोपसंहारे चापूर्वोपांशु। ३८
याजकर्मविधिपरता एकवाक्यताबलादाश्रिता एवमत्रापि सदेव सोम्येदमिति ब्रह्मोपक्र
मात् तत्त्वमसीति जीवस्य ब्रह्मात्मनोपसंहारात् तत्परत्वे वाक्यस्य एवं वाक्यांतराणामपि

37

णीयं ब्रह्मभूतमभिदधतां वेदान्तानामप्रकृतार्थोपदेशिनामप्रयोजनत्वापत्तेः भूतार्थत्वेन च प्रम
णादिभिः समानविषयतया लौकिकवाक्यवत् तदर्थानुवादकत्वेनाप्रामाण्यप्रसंगात् न खलु लौ
किकानि वाक्यानि प्रमाणान्तरविषयमर्थमवबोधयन्ति स्वतः प्रमाणं वेदान्ता अप्यनपेक्षत्वल
क्षणं प्रामाण्यमेषां व्याहन्येत न वैतत्प्रमाणं भवितुं युक्तं न चाप्रयोजनैः स्वाध्यायाध्यय
नविध्यापादितप्रयोजनवत्त्वनियमात् तस्मात्तद्विहितकर्मापेक्षितकर्तृदेवतादिप्रतिपा
दनपरत्वेन वा क्रियार्थत्वं यदि तत्संनिधानात् तत्परत्वेन रोचयन्ते ततः सन्निहितोपासनादि
क्रियापरत्वं वा वेदान्तानामेवं हि प्रत्यक्षाद्यनधिगतगोचरत्वेनानपेक्षतया प्रामाण्यं च प्रयोज
नवत्त्वं च सिद्ध्यतीति तात्पर्यार्थः पारमर्षसूत्रोपन्यासस्तु पूर्वपक्षदार्ढ्याय अनर्थकं वा प्र
योजनत्वमनपेक्षतया प्रामाण्यं स्यादकृतत्वे वानुवादकत्वादिति अत इत्यादिवाक्यग्रहणवाक्य
अशेषविभागभाष्यं न हीत्यासु उपपन्ना वेत्यन्तस्यादेतत् अक्रियार्थत्वेपि ब्रह्मस्वरूपविधिप
रा वेदान्ता भविष्यन्ति तथा च विधिनात्वेकवाक्यत्वादिति सिद्धान्तसूत्रमनुगृहीष्यते नाव
त्वप्रवृत्तप्रवर्तनमेव विधिः उत्पत्तिविधेरज्ञातज्ञापनार्थता तु वेदान्तानां चाज्ञातं ब्रह्मज्ञाप
यतां तथाभावादित्यत आह न च परिनिष्ठितवस्त्विति अनागतोत्पाद्यभावविषय एव हि सर्वो
विधिरूपयोऽधिकारविनियोगप्रयोगोत्पत्तिरूपाणां परस्पराविनाभावात् सिद्धं च तेषां
मसंभवात् तद्वाक्यानां तदर्थं पर्यवसीयते यथाग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादिभ्योऽधिका

वाच॰ ज्ञेनेति स्वाध्यायस्वर्गोविशिष्टो नियोज्यो ऽवगम्यते स च तदेव कार्यमवगच्छतीति यत्स्वर्गानुकूलं तेन च क्रिया
प्र॰ द्वारेण भंगुरायाश्चामुष्मिकाय स्वर्गाय कल्पत इति पारिशेष्यादेवं तत एवापूर्वं कार्यं लिङादीनां संबंध
३८ ग्रह इति चेत् हंत चैत्यवंदनादिवाक्येष्वपि स्वर्गकामादिपदसंबंधात् अपूर्वकार्यप्रसंगः न
चात्र तेषामप्यशाक्यरचनत्वेनापौरुषेयत्वापातः साम्प्रतं दृष्टेन पौरुषेयत्वेन वा तेषामपूर्वार्थत्वप्र
तिषेधे वाक्यत्वादिना लिंगेन वेदानामपि पौरुषेयत्वमनुमितमित्यपूर्वार्थत्वान्न स्यात् अन्यतस्तु
वाक्यत्वादीनामन्यथाभासत्वोपपादनेऽकृतमपूर्वार्थत्वेनाततदुपपादकेन तदुपपादितं चापौरुषेय
38 त्वमस्माभिः न्यायकणिकायामिह तत्त्वबस्तरभयान्नोक्तं तेनापौरुषेयत्वे सिद्धे भूतार्थानामपि वेदां
तानां न सापेक्षतया प्रामाण्यव्याघातः न चानधिगतगंतृतानास्ति येन प्रामाण्यं न स्यात् जीवस्य
सतताप्यतोऽनधिगमात् तदिदमुक्तं न च परिनिष्ठितवस्तुस्वरूपत्वेऽपीति द्वितीयं पूर्वपक्षबी
जं स्मारयित्वा दूषयति यत्तु हेयोपादेयरहितत्वादिति विप्रयर्थावगमात् केवलपरं पर्येण पुरु
षार्थप्रतिलंभः नापंस्रपरिज्जुरिपमितिज्ञानादिवेति सोपमस्यविप्रयर्थज्ञानान्यकर्षः एतदुक्तं
भवति द्विविधं हि ईप्सितं पुरुषस्य किंचिदप्राप्तं ग्रामादि किंचित्पुनः प्राप्तमपि भ्रमवशाद उ॰
प्राप्तमिवावगतं यथा स्वग्रीवावनद्धं ग्रैवेयकं एवं जिहासितमपि द्विविधं किंचिदहीनं जिहासति ३८
यथा वलयितं चरणं फणिनं किंचित्तु हीनमेव जिहासति यथा चरणाभरणं नूपुरे फ।
णिनमारोपितं तत्राप्राप्तप्राप्तौ वा सक्तत्यागे च वासीया यात्तुष्ठानसाध्यत्वात्तदुपायत्वत्ता।

पौर्वापर्यालोचनयावगम्यपरत्वमवगंतव्यं नचतत्परत्वमदृष्टमतिसंभवेऽन्यपरताप्यदृष्टार्थवाक्य
स्यापितं अतिप्रसंगात् नकेवलंकार्यपरत्वात्तेषामदृष्टार्थत्वमुपपन्नाचेत्याह नचतेषामिति सापेक्षता
प्रामाण्यंपूर्वपक्षबीजंदूषयतिनचपरिनिष्ठितवस्तुत्वेपीति अयमभिसंधिः पुंवाक्यदृष्टांतेनहि
भूतार्थतयावेदांतानांसापेक्षत्वमाशंक्यते तत्रैवंभवान्पृष्टोव्याचष्टांकिंपुंवाक्यानांसापेक्षताभूता
र्थत्वेनाहोपौरुषेयत्वेनयदिभूतार्थत्वेनततःप्रत्यक्षादीनामपिपरस्परापेक्षत्वेनाप्रामाण्यप्रसंगः
तान्यपिहिभूतार्थान्येवयथापुरुषबुद्धिप्रभवतयापुंवाक्यंसापेक्षं एवंतर्हितदपूर्वकाणांवेदांतानां
भूतार्थानामपिनाप्रामाण्यंप्रत्यक्षादीनामिवनियतेंद्रियलिंगादिजन्मनांयथाचोक्तंसिद्धंकिलापौरु
षेयत्वेवेदांतानामनपेक्षतयाप्रामाण्यंसिद्ध्यति तदेवतुभूतार्थत्वेननसिद्ध्यतिभूतार्थस्यशब्दानपेक्षे
णपुरुषेणमानांतरतःशक्यज्ञानत्वात् बुद्धिपूर्वविरचनोपपत्तेर्वाक्यत्वादिलिंगकस्यवेदपौरुषे
यत्वानुमानस्याप्रत्यूहमवगतेः तस्मात्पौरुषेयत्वेनसापेक्षत्वंदुर्वारंनतुभूतार्थत्वेनकार्यार्थत्वेतु
कार्यस्यापूर्वस्यमानांतरागोचरतयातदर्थतानतुभूतपूर्वस्यतत्त्वेनसमारोपेणवापुरुषबुद्ध्यना
रोहात् तदर्थानांवेदांतानामशक्यरचनतयापौरुषेयत्वाभावादनपेक्षंप्रामाण्यंसिद्धमितीति
प्रामाण्यायवेदांतानांकार्यपरत्वमातिष्ठामहे अत्रब्रूमःकिंपुनरिदंकार्यमभिमतमायुष्मतोयदशा
क्यंपुरुषेणज्ञातुमपूर्वमितिचेत् हंतकुतस्त्यमस्यलिंगाद्यपेतंतेनालौकिकेनसंगतिसंवेदन
विरहात् लोकानुसारतःक्रियायाएवलौकिक्याःकार्यतायालिङादेरवगमात् स्वर्गकामोय

वाच. प्र. ३९

त्यं ब्रह्मस्वभावश्चैतन्यं नित्यं तथापि क्रियातस्य तनवच्छिन्नस्य तत्तद्विषयोपधानभेदादवच्छे- ५७
देन कल्पितभेदस्यानित्यत्वं कार्यत्वं चोपपद्यते तथा चैवलक्षणमीक्षणेन सर्वविषये ब्रह्म-
णः स्यात्तल्लक्षणं कर्तृत्वमुपपन्नं यद्यपि च कूटस्थनित्यस्याऽपरिणामिनः औदा-

ध्यात् तस्मादचेतनं प्रधानं जगदुपादानमनुवदंति श्रुतय इति पूर्वपक्षः एवं काणादादिमतेपिक
र्त्तृवियोजनीयाः श्रुतयः प्रकृतार्थस्तु प्रधानपक्षेपीति प्रधानस्यापीति अपि कारणावेवकारार्थो ज्ञा
देतत् सत्वसंपन्नाचेदस्य सर्वज्ञता अपि तमः संपन्नाजडमेवास्यकस्मान्न भवतीत्यत आह तेनच
सत्वधर्मेणज्ञानेनेति सत्वंहि प्रकाशशीलं निरतिशयोत्कर्षं सार्वज्ञबीजं यथाहुः निरतिशयं।
सर्वज्ञताबीजमिति यत्खलु सातिशयं तत्क्वचिन्निरतिशयं दृष्टं यथा कुवलामलकविल्वेषु सा
तिशयं महत्वं व्योम्नि परममहदिति निरतिशयं एवं ज्ञानमपि एकद्वित्र्यादिविषयतया सातिशय
मित्यनेनापि क्वचिन्निरतिशयेन भवितव्यं इदमेव चास्य निरतिशयत्वं यदखिलसमस्तवेदित
व्यतत्तदिदं सर्वज्ञत्वं सत्वस्य निरतिशयोत्कर्षे भवति तदुक्तं भवति यद्यपि रजस्तमसी अपि सत्व
पायि पुरुषार्थप्रयुक्तागुणवैषम्यातिशयात् सत्वस्य निरतिशयोत्कर्षे सार्वज्ञं कार्यमनुमेयं तत इति
प्रधानावस्थायामपि तन्मात्रे विवक्षितत्वात् अविवक्षितातमः कार्यं प्रधानं सर्वज्ञमुपचर्यत इ
ति अपि भ्यामवधारणस्य व्यवच्छेद्यमाह नकेवलस्येति नहि किंचिदेकं कार्यं जनयेदपितु बहू
नि चिदात्मा चैकः प्रधानं तु त्रिगुणमिति तत एव कार्यमनुमन्तुमर्हति तत एव कार्यमनुमन्तुमर्हति
नचिदात्मन इत्यर्थः तत्रापि च योगपतामात्रेण चिदात्मनः सर्वज्ञताभ्युपगमो नकार्ययोगादि
त्याह तथापीति नकेवलस्याकार्यकारणस्येति एतस्मिंहावलोकितेन प्रपंचयति प्रागुत्पत्तेरि
ति अपि च प्रधानस्य चेति च त्वर्थः एवं प्राप्त उच्यते इत्युक्तेनैर्नाशब्दं नामरूपप्रपंचलक्षणकार्य

वाच. प्र. ५८

जायत इति तपस्तज्ज्ञानेन प्रव्याकृतनामरूपविषयेण चीयते तद्व्याचिकीर्षावद्भवति यथा कुविं
न्दादिर्व्याकृतं पटादि बुद्ध्वा व्याचिकीर्षत्येवं धर्मवानुत्थितो यथा धर्मोपजननेनोपचित उच्यते व्या।
चिकीर्षायां चोपचये सति ततोऽन्नं नामरूपमदनीयं साधारणं संसारिणां व्याचिकीर्षितमभिजा
यते तस्मादव्याकृतात् व्याचिकीर्षितात् अन्नात्प्राणो हिरण्यगर्भो ब्रह्मणो ज्ञानक्रियाशक्त्यधि
ष्ठानं जगत्सूत्रात्मा साधारणो जायते यथाव्याकृतात् व्याचिकीर्षितात् पटात् अवान्तरकार्यं।
हितंतुकादि तस्माच्च प्राणान्मनआख्यं संकल्पविकल्पाद्यात्मकं करणात्मकं जायते ततो व्याक
रणात्मकान्मनसः सत्याख्यान्याकाशादीनि जायन्ते सत्यशब्दवाच्यानि तेभ्यश्च सत्याख्येभ्योऽनुक्रमेण स
प्तलोका भूरादयस्तेषु मनुष्यादिप्राणिनो वर्णाश्रमक्रमेण कर्माणि धर्माधर्मरूपाणि जायं
ते कर्मसु चामृतं फलं स्वर्गनरकादि तच्च स्वनिमित्तयोर्धर्माधर्मयोः सतोर्न विनश्यतीत्यमृतं
यावद्धर्माधर्मभावीति यावत् यः सर्वज्ञः सामान्यतः सर्ववद्विशेषतः यस्य भगवतः ज्ञानम
यं तपः धर्मः नायासमयं तस्मादुक्तात् ब्रह्मणः पूर्वस्मादेतत्परं कार्यं ब्रह्म किंच नामरूपमन्नं च व्रीहिय
वादि जायत इति तस्मात्प्रधानस्य साम्यावस्थायाः प्रतीहितत्वात् देवतानां च सत्यपि चेतनत्वे स उ. ५८
र्गादेर्विषयानीश्वरत्वासंभवेनोपचारस्यान्याय्यत्वात् मुमुक्षोश्चाऽपयोर्थापदेशानुपप
त्तेर्मुक्तिविरोधित्वाच्चेतनः प्रभृतीनां च मुख्यार्थसंभवेनोपचारस्यायुक्तत्वात् सिद्धत्वात्
संशयेऽव्यक्तस्याभावस्य निःश्रेयसस्थापकत्वात् इह तु मुख्यस्य श्रुत्वा सर्गिकत्वेन निःश्रेयसत्वसंपादना।

58

सोऽन्यं वास्तवं तथाप्यनाद्यनिर्वचनीयाविद्यावच्छिन्नं स्वव्यापारवत्त्वमिव भासत इति कर्तृत्वोपपत्तिः ।
परैरपि च चितिशक्तेः कूटस्थनित्यायाः पाहृतीः प्रतिकर्तृत्वमीदृशमेवाभ्युपेयं चैतन्यसामानाधिक
रण्येन ज्ञातृत्वोपलब्धेः नहि प्राधानिकान्यंतर्बहिःकरणानि त्रयोदश सत्त्वप्रधानान्यपि स्वय
मचेतनानि तत्कृत्यमस्य स्वं वा परं वा वेदितुमुत्सहन्ते नोवत्वंधाः सहस्रमपि पांथाः पंथानं विद
न्ति चक्षुष्मता चेदेकेन दर्श्यते स एव तर्हि मार्गदर्शी स्यात् तत्रः कर्त्ता नेता च तेषां एवं बुद्धिसत्त्वस्य
यमचेतनस्य चितिबिंबसंक्रान्त्या चेदापन्नचैतन्यस्य ज्ञातृत्वं चितिरेव ज्ञात्री स्यात् तत्रान्तर्बहिःकार
णानि त्रियं पसहस्रप्रतिमानि यस्य तत्र ज्ञातॄणि न चास्याश्चितेः कूटस्थनित्याया अस्ति व्यापारयोगः न
च तद्योगोऽपि ज्ञातृत्वं व्यापारवतामपि जडानामज्ञातृत्वात् तस्मादन्तःकरणवर्त्तिनं व्यापारमा
रोप्य चितिशक्तौ कर्तृत्वाभिमानः अन्तःकरणे वा चैतन्यमारोप्य तस्य ज्ञातृत्वाभिमानः सर्वथाभ
वन्नतोऽपि नेदं स्वाभाविकं कञ्चिदपि ज्ञातृत्वमपि तु सांव्यावहारिकमेवेति परमार्थः नित्यस्यात्मनो
ज्ञानं परिणाममुक्तिं च भेदाभेदपक्षमपाकुर्वद्भिरपास्तं कूटस्थनित्यस्यात्मनोऽव्यापारवत एवाभि
न्नज्ञानं धर्म इति चोपरिष्टादपाकरिष्यते तस्मात्तत्त्वतोऽनवच्छिन्नं चैतन्यं तदनाद्यनिर्व
चनीयाव्याकृतव्याचिकीर्षितनामरूपविषयावच्छिन्नं सत् ज्ञानं कार्यं तस्य कर्तेश्वरो ज्ञाता सर्वज्ञः
सर्वथा किंचिति सिद्धं तथा च श्रुतिः तपसा चीयते ब्रह्म ततोऽन्नमभिजायते अन्नात्प्राणो मनः स
त्यं लोकाः कर्मसु चामृतं यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नाम रूपमन्नं च

वाच॰
प्र॰
५६

इडस्यपराश्च तस्य कलाः द्वितीयः पादोऽनन्तवान्नाम तथाग्निः सूर्यश्चन्द्रमा विद्युदिति तस्य कलाम
ज्योतिष्मान्नाम तृतीयः पादः प्राणश्चक्षुः श्रोत्रं वागिति च तस्य कलाः चतुर्थः आयतनवान्नाम
ब्रह्मणः पादस्तदेवं षोडशकलं षोडशावयवं ब्रह्मोपास्यमिति श्रुत्यन्तरे षोडशकलं ब्रह्मेति प्रसिद्धं ।
स्यादेतत् ईक्षतेरिति श्तिपा धातुस्वरूपमुच्यते न चाविवक्षितार्थस्य धातुस्वरूपस्य चेतनोपादा
नसाधनत्वसंभव इत्यत आह ईक्षतेरिति धात्वर्थनिर्देशोऽभिमतो विषयिणा विषयलक्षणा
त् प्रसिद्धत्वेन लक्षणेत्याह यजतेरितिवदिति यः सर्वज्ञ इति सामान्यतः सर्वविदिति विशेषतः
सोऽवीक्षत मनसाधनमुपन्यस्य ईक्षपतिपत्तेर्के सत्वधर्मेणेति पुनः सोऽत्वमतमुत्थापयति न
तृक्तमिति ईक्षयति तदपीति समुदाचरवृत्तिता न भवति सत्व गुणस्यैव षष्ठप्रसंगेन साम्यानुपपत्तेः
न चाव्यक्तेन रूपेणाज्ञानमुपपद्यते रजस्तमसोस्तस्य निबंधकत्वस्यापि सूक्ष्मरूपेण सद्भावादिम
र्थः अपि च चेतनस्य प्रधानस्य वृत्तिवचनो ज्ञानातिशयो चेतनेवृत्तिमात्रे दृष्टचर प्रयोगा इत्याह अपि च
नसाक्षिकेति कथं तर्हि योगिनां सत्वोत्कर्षहेतुकं सर्वज्ञत्वमित्यत आह योगिनां त्विति सत्वांशो
कर्षो हि योगिनां चेतनस्य चक्षुष्मतामुपकरोतीति नाधस्य प्रधानस्येत्यर्थः यदि तु कपिलमतमप
हाय हैरण्यगर्भमतमाश्रीयत इत्यत आह अपि पुनः साक्षिनिमित्तमिति तेषामपि हि प्रकृ
पुरुषोपादानं पुरुषविशेषस्यैव क्लेशकर्मविपाकाशयाऽपरामृष्टस्य सार्वज्ञ्यं न तु प्रधानस्य
चेतनस्य तदपि चाद्वैतश्रुतिभिरपास्तमिति भावः पूर्वपक्षवीजमनुभाषते यस्तु नरतक्तंवृत्स

59

टु॰
५६

वात् अन्यथा किंचित्स्याव संकीर्णदेशनिवासिनो ब्राह्मणस्यापि किरातत्वापत्तेः ब्रह्मैवेदमित्यनाद्यनिर्वाच्या
विद्यासविवेन जगदुपादानं शुक्तिरिव समारोपितरूपरजतस्य मरीचय इव जलस्य एकमेवेदमद्वितीयमेवं
दमसः नन्वचेतनं प्रधानं परमार्थवादि प्रपञ्चहितत् नच प्रधानं परमाणवो वा तदतिरिक्तं सर्वज्ञेश्व
राधिष्ठितं जगदुपादानमिति सांप्रतं तेषां भेदेन कार्यत्वात् कारणात्कार्याणां भेदाभावात् कारण
ज्ञानेन समस्तकार्यपरिज्ञानस्य मृदादिनिदर्शनेनागमेन प्रसाधितत्वात् भेदे च तदनुपपत्तेः साक्षा।
च्चैकमेवाद्वितीयं नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोतीत्यादिभिरतिस्फुटैर्वचोभिर्ब्रह्मातिरि
क्तस्य प्रपंचस्य प्रतिषेधात् चेतनोपादानमेव जगत् भुजंगइवारोपितो रज्जूपादान इति सिद्धांतः
सदुपादानत्वेऽपि सिद्धे जगतः तदुपादानं चेतनमचेतनं चेति संशयापमीमांस्येत अथ यापि तत्सदुपाद।
नत्वमसिद्धं इत्यत आह तत्रेदं शास्त्रवाक्यमित्यादिदर्शयतीमं तेन तथापीक्षितापारमार्थिक प्रथा
न दोत्र स्नानतिरिक्तं ईश्वरो भविष्यति यथा कूर्मैर्न एण गर्भाड्यतः श्रुतिपठिता एकमेवाद्वितीयमिति
वक्तुं शक्यमिति च चेतनं कारणं आत्मन एव बहु भवनमाह तेनाविकारणं चेतनादभिन्नं कार्यमे
वगम्यते यत्र प्याकाशवाय्वादिभूतसृष्टिस्तत्रापि तेजोबन्नानामेव त्रिवृत्करणस्य विवक्षितत्वात् न च
चतेजसः प्राथम्यात् तेजः प्रथममसृजत् एकमेवाद्वितीयं जगदुपादानमित्यतस्त्वंतरमपि पठ
तितथान्यत्रेति अथ स चतुष्पाद् षोडशकलः तस्य प्राची प्रतीची दक्षिणोदीचीति च
तस्त्रः कलाः दिक्संप्रकाशवान्नाम प्रथमः पादः तद्द्वितीयः तथा पृथिव्यन्तरिक्षं द्यौः समु

वाचं
प्र॰
६०

विद्यतेऽनावृतत्वादितिभावः यथाग्निगृहीतायथाप्रदेशंजवनोवेगवत्विहरणवान् ज्ञानबलेन
क्रियाप्रधानस्याचेतनस्यज्ञानबलाभावात्तन्नजगत्क्रियेत्यर्थः अतिरोहितार्थमन्यत् स्यादेतत्
अनात्मन्यात्मोक्तिरुपचरितायुपाधिकृतोभृत्यवत्स्वच्छेदविधमानत्वात्मनिस्वभावसिद्धप्रकाशौचित्ये
दूषयत्याह दृश्यतेचात्मनएवमतइति अभिनिवेशोऽभिमानोमिथ्याबुद्धिमात्रेणपूर्वेणेतिग्र
नेनाभ्यादिनादर्शिता मात्रग्रहणेनविचारासहत्वेननिर्वचनीयतानिरस्ता परिशिष्टंनिगद।
व्याख्यातंश्री॰ तन्निष्ठस्यमोक्षोपदेशादितिशंकोत्तरत्वेनवासूत्रंतद्गौणत्वाप्रधानानिराकरणा
र्थंसूत्रं शंकाचभाष्येउक्तास्यादेतत्तत्रापिवक्ताप्येतितत्रानप्रथमेसूत्रेतमात्रशंकास्वतर्केणाह
पितामितितत्स्यैवबुद्धप्रधानमेव स्थूलतयाज्ञातमत्वेनयाऽसतेस्त्रतर्केतुः अरुन्धतीमिवातीवसू
क्ष्मांदर्शयितुंतन्मनिहितांस्थूलताराकांदर्शयतीयममसावरुन्धतीति अस्यांशंकायामुत्तरंहेय
त्वावचनाच्चेतिसूत्रे चकारोऽनुक्तसमुच्चयार्थः तच्चानुक्तंभाष्येउक्तंयपिवज्ञातकारणेप्र
ज्ञातात्सर्वविज्ञानप्रतिज्ञानंकुर्वतीश्रुतिश्चेतनमेवजगत्कारणंब्रूते यदिस्वाप्ययादात्मवचनस्त
यापिचेतनस्यपुरुषस्याचेतनप्रधानत्वानुपपत्तिः अप्यात्मीयवचनलयापिचेतनेपुरुषाप्य
त्यात्मीयेऽपिचेतनस्यप्रलयानुपपत्तिः नहिमृदात्माघटःआत्मीयेऽपिपायसिप्रलीयतेअ
पितात्मभूतायांमृद्येवनचरन्तमनात्मभूतेहस्तिनिप्रलीप्रलीयतेकिन्तात्मभूतायांशुक्तावेव
त्याह स्वाप्ययात् गतिसामान्यात् गतिरवगतिः तार्किकसमयवदिति यथाहितार्किकाणांसम ६०

उ॰
६०

णोपीति चैतन्यस्य स्वरूपस्य नित्यत्वेपि उपहितं सदनित्यं कार्यं आकाशमिव घटाद्यवच्छिन्नमित्यभिसं ।
धाय परिहरति इदं तावदुक्तवानिति एतत्तोस्य प्रकाशो सवितुरीत्येतदपि विषयावच्छिन्नः प्रकाशः
कार्यमित्येतदभिप्रायं वैषम्यं चोदयति ननु सवितुरिति किंवा सत्वं कर्माभावमभिप्रेत्य वैषम्यमा
हभवांस्तु तत्तद्विवक्षाभावं तत्र यदि विवक्षाभावं तदा प्रकाशयतीत्यनेन मा भूत्तावत् प्रकाशतइ
त्यनेन तत्वास्ति न सत्त्वकर्माविवक्षितं अपच प्रकाशस्वभावं प्रत्यस्तित्वात्तंचं सवितुरिति परिहर
ति नासत्यपि कर्मण्येति असत्यपीत्यविवक्षितेपीत्यर्थः अथवा सत्वं कर्माभावमभिसंधाय वै
षम्यमुच्यते तत्रासिद्धत्वात्कर्माभावस्य विवक्षितत्वात्कर्मण इति परिहरति कर्मापेक्षा ।
यामिति यासां सति कर्मण्येव विवक्षिते श्रुतीनामुपपत्तिस्तासां सति कर्माणि विवक्षिते सुतरा ।
मित्यर्थः मत्प्रसादादिति यस्य भगवत ईश्वरस्य प्रसादान्नस्य नित्यसिद्धस्येश्वरस्य नित्यं ज्ञानं भ
वतीति किमवक्तव्यमिति योजना यत्पाकुर्योगशास्त्रकाराः ततः प्रत्यक्चेतनाधिगमोप्यंतरा
याभावश्चेति तद्भाष्यकाराश्च भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णाति ज्ञानवैराग्यादिनेति
सवितृप्रकाशवदिति वस्तुतो नित्यस्य कारणानपेक्षस्य स्वरूपेणोत्कार्यव्यतिरेकमुक्त्वाप्याह
अपि चाविद्यादिमत इत्यादि आदिग्रहणेन कामकर्मादयः संगृह्यंते न ज्ञानप्रतिबंधकारण
रहितस्येति संसारिणं वस्तुतो नित्यज्ञानत्वेपि अविद्यादयः प्रतिबंधकारणानि संति नत्वीश्व
रस्याविद्यारहितस्य ज्ञानप्रतिबंधकारणसंभवतीति भावः नतस्य कार्यमावरणव्यपगमा

वाच॰
प्र॰
६२

तथा गतिसामान्यमपि सिद्धवदुक्तं न तु साधितमिति तदर्थमुत्तरसंदर्भारंभ इत्यर्थः
स्यादेतत् परस्यात्मनस्तत्तदुपाधिभेदविशिष्टस्याप्यभेदात्तत्कथमुपास्यानाभेदः कथं च फलभे
दः इत्यत आह एक एव तिष्ठति रूपाभेदमुपाधिभेदादुपहितभेदादुपास्यभेदस्तथा च फल
भेद इत्यर्थः क्रतुसंकल्पः न त्वयमेकस्यात्मनः कूटस्थनित्यस्य निरतिशयः सर्वभूतेषु गूढः कथ
मेतस्मिन् भूताश्रये तारतम्यमुत्पद्यत इत्यत आह यद्यप्येक आत्मेति यद्यपि निरतिशयमेकमेव ब्र
ह्मात्मनः ऐश्वर्यं च ज्ञानं च आनंदश्च तथाप्यनाद्यविद्यातमःसमावृतेषु तेषु तेषु प्राणभृद्भेदे
षु क्वचिदस्मादिव क्वचित्तस्मादिव क्वचिदंशतापकृष्टमिव क्वचिदपकृष्टमिव क्वचित्प्रकर्षवत्क्व
चिदंशतः प्रकर्षवदिवावभासते तत्कस्य हेतोरविद्यातमसः प्रकर्षनिकर्षतारतम्यादिति य।
थोत्तमप्रकाशः सवितादिवाप्युदकेऽस्तमेकरूपेणैव प्रकाशेनापूर्यमाणोऽपि दर्पणस्वच्छनिकृष्टप्रका
शेष्ववस्थाविशेषेषु प्रकृष्टप्रकाशवदवभासते तथेदमपीति अपेक्षितोपाधिसंबंधस्योपास्येन
निरस्तोपाधिसंबंधेन ज्ञेयत्वेनेति श्रीः आनंदमयोऽभ्यासात् अत्र पूर्वपक्षमेतावदेकदेशिना
तेनाधिकरणमारचयति तैत्तिरीयकेऽन्नमयमित्यादिना गौणप्रवाहपातेऽपि मुख्यतेन त्वामी स्व
णं मुख्यत्वे तत्भयोत्तरलेप्राप्यहोहि विशिष्यते आनंदमय इति हि विकारे प्राचुर्ये च मयट् स्म उ॰
त्वे मुख्यार्थत्वमिति विकारार्थोऽन्नमयादिपदप्रायपाठादानंदमयपदमपि विकारार्थमेवेति प्र ६२
क्ते न च प्राणमयादिषु विकारार्थतायोगात् स्वार्थिको मयडिति युक्तं प्राणमयादिषु पाठाद्व्यवच्छिन्ना

62

यभेदेषु परस्परपराहतार्थप्रतानेवेवेदांतेषु परस्परपराहतिरपि तु तेषु सर्वेषु जगत्कारणचैतन्या
वगतिसमानेति चक्षुरादीनामिव रूपादिष्विति यथा हि सर्वेषां चक्षुः रूपमेव ग्राहयति न तु नार
सादिकं कश्चिद्दर्शयति कश्चिद्रूपं एवं रसनादिष्वपि रसादिष्वगतिसामान्यदर्शनीयं श्रु
तत्वाच्च तदेतत्तेमत्रईक्षणमात्रं जगत्कारणस्य श्रुतेन तु सर्वविषयं जगत्कारणस्य सर्वेषि
तथा तद्दर्शनं सर्वविषयमवगतं श्रोताश्रुतत्वाणं ततु पनिषदि सर्वईश्वरो जगत्कारणमिति
सूत्रं २ साक्षादुक्तमिति विशेषः ॥ उत्तरसंदर्भमाक्षिपति जन्माद्यस्य यत इत्यारभ्येति ब्रह्मजिज्ञा
सितव्यमिति हि प्रतिज्ञातं तच्च शास्त्रैकसमधिगम्यं शास्त्रं च सर्वज्ञः सर्वशक्तो जगदुत्पत्ति
स्थितिप्रलयकारणं ब्रह्मएवं प्रमाणेन प्रधानादावितिन्यायपतो भूतादिति नचास्तिक
श्चिद्देदांतभागो यस्तद्विपरीतमपि बोधयेदिति चगतिसामान्यादित्युक्तं तत्किमपरमवशि
ष्यते यद्दर्शयन्नुत्तरसूत्रसंदर्भस्यावतारः स्यादिति किमुक्तं नमिति किमाक्षेपो समाधत्ते उ
च्यते द्विरूपं हीति यद्यपि तत्ततो निरस्तसमस्तोपाधिरूपं ब्रह्म तथापि तेन रूपेणावाक्य
मुपदेष्टुमिति उपहितेन रूपेणोपदेष्टव्यमिति तत्र कश्चिदुपाधिर्विवक्षितः तदुपासना
निच कानिचिदभ्युदयार्थानि मनोमात्रमाधनतया पठितानि कानिचित्क्रममुक्त्यर्थानि
कानिचित्कर्मसमृद्ध्यर्थानि कश्चित्तत्र कोप्युपाधिरविवक्षितः यथा चैवान्नमया
दयस्त्वानंदमयांताः पंचकोशाः तदेकस्मिन्नुपाधिर्विवक्षितः कस्मिन्नेति नाद्यापि विवेचितं

वाच॰ तमानंदमयमात्मानमुपसंक्रामतीति पूर्वपक्षबीजमनुभाष्य दूषयति पुच्छमन्नमयादीति न
प्र॰ हि मुख्यार्थरूपप्रतीदर्शनं तत्तदमुख्यार्थरूपप्रतीदर्शनप्रायपठितमप्यमुख्यार्थरूपप्रतीदर्शनं भवति नाद
९२ र्शनात् पूर्वदर्शनानाममदर्शनानुगुण्येन तेन हि रोपितेति चेत् इहाप्यानंदमयपाठांतरस्याभ्यासस्य
वणात् तस्मात्तन्नमयादिस्वर्थान्तरत्वश्रुतेः तस्यैवमानानंदस्य तत्त्वं प्रियाद्यवयवयोगश्चाशीरत्वे
चनिराधारात्वात् तेन भाष्येण समाहिते प्रियाद्यवयवयोगावच्छेदः स्वलवमयो योपि परमात्मनस्त्वेपपा
दितः तथा चानंदमय इति प्राचुर्यार्थतामयट उपपादितेति अपि च मंत्रब्राह्मणयोरुपाद्योपेय
62 भूतयोः संगतिप्रत्तेर्ब्रह्मैवानंदमयार्थो मंत्रे हि पुनः पुनरन्योंतर आत्मेति परब्रह्मणेपतरत्वश्रव
तस्यैव चान्योंतर आत्मानंदमय इति ब्राह्मणेऽप्यभिधानात् परब्रह्मैवानंदमय इत्याह सूत्रकारः
मांत्रवर्णिकमेव च गीयते मांत्रवर्णिकमेव परं ब्रह्म ब्राह्मणेऽप्यानंदमय इति गीयत इति अपि
चानंदमयं प्रकृत्य शरीरात्मनः प्राक्सृष्टिश्रवणात् बहु स्यामिति च तस्य मानानात्वस्य हरा
नंदमयाद्भेदश्रवणाच्चानंदमयः पर एवेत्याह सूत्रं नेतरोऽनुपपत्तेः नेतरो जीव आनंदमयः
तस्यानुपपत्तेरिति भेदव्यपदेशाच्च रसः सरोत्यापमानंदमय आत्मा रसं ह्येवायं लब्ध्वा जीवात्मा उ॰
आनंदी भवति सोयं जीवात्मनो लब्धभाव आनंदमयस्य च लब्धव्यतानाभेद उपपद्यते तस्मादानंद ९२
मयस्य जीवात्मनो भेदे परब्रह्मत्वं सिद्धं भवति चोदयति कथं तर्हीति यदि न लब्धालब्धव्यः क
थं तर्हि परमात्मनो वस्तुतोऽभिन्नेन जीवात्मना परमात्मा लभ्यत इत्यर्थः परिहरति बाढं तथापि

सात्मा भवति प्राणादिविकारेष्वाकाशमिव घटविकारेण न च समस्तपर्यं स्वाधिकृतमनुचितं चतः को
शांतरत्वं न तु सर्वांतरत्वं ततो चिताप्रियादिभागी शारीरो जीवो न ब्रह्म युज्यते न च सर्वांतरतया ब्रह्मैवानं
दमयं न जीव इति सांप्रतं नहीयं श्रुतिरानंदमयस्य सर्वांतरत्वं ब्रूते अपित्वन्नमयादिकोशवत् ।
दृष्टांततयानंदमयकोशस्य न चास्मादन्यस्यांतरस्याश्रवणात् अयमेव सर्वांतर इति युक्तं यद
पेक्षं यस्यांतरत्वं श्रूयते तस्मादेवांतरं भवति नहि देवदत्तो बलवानित्युक्ते सर्वान्सिंहशार्दूलादीन्
अपि प्रति बलवान् प्रतीयते अपितु समानजातीयं नरांतरमपेक्ष्य एवमानंदमयोपि अन्नमयादिभ्यो
ऽन्तरो न तु सर्वस्मात् न च निष्कलस्य ब्रह्मणः प्रियाद्यवयवयोगो नापि शारीरत्वं युज्यत इति संसा
र्येवानंदमयः तस्मादुपहितमेवाज्ञो प्राप्यते न निवर्त्तितं न तद्ब्रसंत्तपतेनेति पूर्वः पक्षः अपिच
यदि प्राचुर्यार्थोपि मयट् तथापि संसार्येवानंदमयो न तु ब्रह्म आनंदप्राचुर्यं हि तद्विपरीतदुःखल
वसंभवे भवति न तु तदत्यंतासंभवे न च परमात्मनो मनागपि दुःखसंभवः आनंदैकरसत्वादि
त्याह न च शारीरस्य मतउ अशारीरस्य पुनः प्रियसंबंधो मनागपि नास्तीति प्राचुर्यार्थोपि मयपक्षोप
पद्यत इत्यर्थः उच्यते आनंदमयप्रावयवस्यतावद्ब्रह्मणः पुच्छस्यांगतया न प्राधान्यमपि तु अपि
न आनंदमयस्यैव ब्रह्मणः प्राधान्यं तथा च तदधिकारे पठितमभ्यस्यमानमानंदपदं तद्बुद्धि
मादधत्तत सैवानंदमयस्याभ्यास इति युक्तं ज्योतिष्टोमाधिकारे स्वसते ज्योतिषि ज्योतिः पदमि
व ज्योतिष्टोमाभ्यासः कालविशेषविधिपरः अपि च समा ह्यानंदमयात्माभ्यासः श्रूयते ए

वाच॰
प्र॰
६३

त्वात्। उक्तानंदमयपदं विकारार्थमत्तु ब्रह्मपदं च ब्रह्मण्येव स्वार्थे त्वआनंदाभ्यासस्य स्वार्थे पुच्छपद
मात्रमवयववचनपरित्विलितमधिकरणपरतया व्याख्यातमिति कृतं तत्र द्वयमेव यत्र विदां कु
र्वंतु तत्र प्रायपाठपरित्यागो मुख्यत्वविचितपलं च नन्। पूर्वस्मिन् तंत्रे पदत्रे प्रायपाठस्य बाधनं २
पुच्छपदं स्वालयो मुख्यं स्वतआनंदमयावयवे गौणमेवेति मुख्यत्व बाधार्थपलं च नन्वअवयवपरता
यां अधिकरणपरतायो अधिकरणपरतायां च तत्र प्रअवयववचनपलेत्वबाधस्य विकारवचन
पलेत्वबाधनेन तत्र ब्रह्मपदस्यआनंदमयस्यआनंदपदमिति चिंतयतेलं च ननं तथिकं तत्स्यान्न
त्वाचितपलं च ननात्प्रसाधीयान् पूर्वः पक्षः मुख्यत्वात्तयान्गुणेनत्वंतरएव पक्षो युक्तः
अपि चानंदमयपदस्य ब्रह्मार्थतेब्रह्मपुच्छमिति न समंजसं नहि नदेवावयवमवयवस्येति प्र
तं आधारपरत्वेन पुच्छपदस्य प्रतिष्ठेत्येतदपि न पपन्नतरं भवति आनंदमयस्यचांतर
त्वमन्नमयादिकोशापेक्षया ब्रह्मणस्त्वांतरत्वमानंदमयादपीत्युक्तमेतदुत्तरितनश्रुतौ। एवं
चान्नमयादिवदानंदमयस्यापि प्रियाद्यवयवयोगो युक्तः वाङ्मनसागोचरे तु परब्रह्मण्यु
पाधिमंतभावात्प्रियाद्यवयवयोगः प्राप्तुर्य च श्लोके शेनव्याख्यापेयाता तथाच मांत्रिवर्णि
कस्य ब्रह्मण एव ब्रह्मपुच्छं प्रतिष्ठेति स्वप्रधानस्याभिधानात् नसेवाधिकारेणानंदमय
स्येति सो कामयतेत्यादावपि क्तयो ब्रह्मविषयानानंदमयविषयाउत्तमर्थसंदेहः तथाम
न्यत। सूत्राणि त्वेवं व्याख्येयानीति वेदसूत्रयोर्विरोधे गुणत्वन्याय्यकल्पनेति सूत्रा।

उ॰
६३

ति सत्यं परमार्थतोऽभेदस्याविद्यारोपिते भेदस्य प्राप्तिमत्त्वं लक्ष्यलक्षणभावउपपद्यते जीवोऽस्य
विषयपापरब्रह्मणोऽभिन्नो दर्शितः नतु जीवादपि तथा चानंदमयपक्षे जीवो न जीवस्याविद्यया
पिहितो भेदो दर्शितइति न लक्ष्यलक्षणभावउत्पर्थः भेदाभेदौ च न जीवपरब्रह्मणोर्विरु
द्धत्वात् स्यादेतत् यथा परमेश्वराद्भिन्नो जीवात्मा दृष्टान्तभवतस्तथैव जीवात्मनोऽपि दृष्टु
र्नैभिन्नः परमेश्वरइति जीवस्यानिर्वाच्यत्वे परमेश्वरोऽप्यनिर्वाच्यः स्यात्तथा च न वस्तुसन्निति
तत्राह परमेश्वरस्त्वविद्याकल्पितादिति रजतं समारोपितं न शुक्तितो भिद्यते न हि तद्भेदे
नाभेदेन वास्तवं निर्वक्तुं शुक्तिस्तु परमार्थसतीति निर्वचनीया इत्यन्ताद्भिद्यत एव अत्रैव स
रूपमात्रे दृष्टान्तमाह यथा मायाविन इति एतदपरितोषेणात्यन्तसरूपं दृष्टान्तमाह यथा
वा घटाकाशादिति शोधमतिरोहितार्थं कृत्स्नमुक्तपरिग्रहार्थमेकदेशिमतं दूषयति उद
न्तिद्वत्तत्त्वमिति एषतावदत्र सर्गोऽयत् ब्रह्मपुच्छं प्रतिष्ठेति ब्रह्मशब्दात् प्रतीयते विशुद्ध
ब्रह्मविकृतत्वानंदमयशब्दतः १ तत्र किं पुच्छपदसमभिव्याहारादन्नमयादिष्विव चास्याप्य
वयवत्वेन प्रयोगात् इहाप्यवयवपरत्वात् पुच्छपदस्य तत्समानाधिकरणं ब्रह्मपदमपि
स्वार्थपरित्यागेन कथंचिदवयवपरं व्याख्यायते आनंदमयपदं चायमन्नमयादिविकार
वाचिशब्दपठितं विकारवाचि वा कथंचित् प्रचुरानंदवाचि वा ब्रह्मण्यप्रसिद्धं कथंचिद्ब्र
ह्मा ब्रह्मणि व्याख्यायते आनंदपदाभ्यासेन च ज्योतिःपदेनेव ज्योतिष्टोमे आनन्दमयोत्त

वाच॰
प्र॰
६५

तस्यप्रधानमिह ब्रह्मपुच्छं तेपत्कोनोतिमिदं यं तत्तद्धर्मोपदेशात् पूर्वस्मिन्नधिकरणेऽपात्तस्य
त्वविशेषब्रह्मप्रतिपत्त्यर्थमनुपासतामानन्दमयपञ्चकोशानुपाधयः स्थिताः न तु विवक्षिताः ब्रह्मैव
तत्प्रधानं ब्रह्मपुच्छं प्रतिष्ठेति तेषामेवोपपत्तिमिति निर्णीतं संप्रति तद्ब्रह्म विवक्षितोपाधिभे
दमुपास्यत्वेनोपदिश्यते नन्वविद्याकर्मातिशयोपलक्षितोऽनेकधा जीवात्मादिस्वपदवेदनीयइति
निर्णीयतेनत्र मर्यादाधारत्वपाणिसंसारिणिपरेनतु तस्मादुपास्यः संसारीकर्माधिकृतोऽर
विः २ हिरण्मयश्रुतिरित्यादिरूपश्रवणात् यएषोन्तरादित्ये यएषोन्तरक्षिणीति चाधारभेदश्र
वणात् येचामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यैश्वर्यमर्यादाश्रुतेश्च संसार्येव कार्यकर
णसंघातात्मको रूपादिसंपन्नउहोपास्यो न तु परमात्मा अशब्दमस्पर्शमित्यादिश्रुतिभिरस्या।
त्वसमस्तरूपस्य स्वेमहिम्नीत्यादिश्रुतिभिरपाकृताधारस्य एष सर्वेश्वर इत्यादिश्रुतिभिरधि
गतनिर्मर्यादैश्वर्यस्य चाकारानुपास्यत्वेनेह प्रतिपत्तं सर्वपाप्मविरहश्चादित्यपुरुषे संभवति
शास्त्रस्य मनुष्याधिकारत्वाद्देवतायाः पुण्यपापयोरनधिकारात् रूपादिमत्त्वान्नपापानुप
पत्त्याचकार्यकारणात्मके जीवउपास्यतेनविवक्ष्यते यदृग्गाथात्मकत्वमपास्य सर्वात्मकत्वं श्रू ६५
यतेतत्कथंचिदादित्यपुरुषस्यैव स्तुतिरित्यादित्यपुरुष एवोपास्यो न परमात्मेति प्राप्ते अ
नाधारत्वेचनित्यत्वंसर्वगतत्वं च हेतुः अनित्यं हि कार्यं कारणाधारमिति नाऽनाधारं नित्य
मपि यदसर्वगतं तत्तस्मादधरभावेनावस्थितं तदेवतस्योत्तरस्याधार इति नाऽनाधारत्व

64

एवमयमानेनत्वानि आनंदमयपर्याहेन तद्वाक्यस्थं ब्रह्मपुच्छं प्रतिष्ठेति पदं तत्र ब्रह्मपदमुपल ।
क्ष्यते एतदुक्तं भवति आनंदमयेत्यादिवाक्ये पदं ब्रह्मपुच्छं प्रतिष्ठेति ब्रह्मपदं तन्नस्य प्रधा
नमेवेति एतद्ब्रह्माधिकरणमितिवदतो ब्रह्मपुच्छमित्याह श्रुतिस्तत्र सहेतोः पूर्वम
वयवप्रधानप्रयोगान्नत्वयोगास्येवद्वन्द्वो संनिधानात्तेनापि चाधिकरणलक्षणोपपत्ते
रिति मांत्रवर्णिकमेव च गीयते यत्सत्यज्ञानमित्यादिना मंत्रवर्णेन ब्रह्मोक्तं तदेवोपायभू
तेन ब्राह्मणेन स्वशाखायामन्येन गीयते ब्रह्मपुच्छं प्रतिष्ठेति अवयववचनत्वेन समंत्रेशाखान्त
ब्राह्मणेन तथा यत्पूर्वमितिउपायोयेम यो मंत्रब्राह्मणयोर्विप्रतिपत्तिः स्यादिति नेतरोऽनु
पपत्तेः अत्रउत आनंदमयप्रभृतिभाष्यस्य स्थाने इतरस्य ब्रह्मपुच्छं प्रतिष्ठेति पठितव्यं भेद
व्यपदेशाच्च अत्रापीतरस्य नानंदमयप्रवृत्तस्य चानंदमयाधिकारे इमस्य च भाष्यस्य स्थाने ब्र
ह्मपुच्छं प्रतिष्ठेति ब्रह्मपुच्छप्रतिष्ठाधिकार इति च पठितव्यं कामाच्च नानुमानापेक्षा अस्मि
न्नस्य च तद्योगं शास्ति आनन्दमयोरपि सूत्रयोर्भाष्ये आनंदमयस्थाने ब्रह्मपुच्छपाठो द्रष्टव्यः
तद्धेतुव्यपदेशाच्च विकारस्यानंदमयस्यैव तु ब्रह्मपुच्छमवयवः कथं पुनः सर्वस्यास्य वि ।
कारजातस्यानंदमयस्य ब्रह्मपुच्छं कारणं श्रूयते तदिदं सर्वमसृजत यदिदं किंचेति श्रुत्या
नन्दानंदमयविकारावयवो ब्रह्मविकारः सत्त्वं वैश्वकारणमुपपद्यते तस्मादानंदमयस्य ।
विकारावयवो ब्रह्मेति तदवयवयोप्यानंदमयो विकार इहतो पास्यत्वेनाविवक्षितः कि

छाव॰ प्र॰ ६५

योमोभेदेनोक्तः सएवांतरादित्यपुरुषोनंतः श्रुतिमात्रेणप्रत्यभिज्ञायमानोभवितुमर्हतीति तस्मात्तेषुनस

नपवुतिधनवंतोविभूतिमंतइत्तिपावत् कस्मात्पुनर्भूतिमत्तंपरमेश्वरपरिग्रहेघटतेउमतत्रा

ह ययद्विभूतिमदिति सर्वात्मकत्वेपिभूतिमत्त्वेवपरमेश्वरस्वरूपाभिव्यक्तिर्नेत्वविघातमः

पिहितपरमेश्वरस्वरूपेष्वविभूतिमत्त्वित्यर्थः लोककामेशितृत्वमपीति प्रसंतपाणर्णानाये

ननिरंकुशमैश्वर्यमित्यर्थः आकाशस्तल्लिंगात् पूर्वस्मिन्नधिकरणेब्रह्मणोसाधारणधर्म

दर्शनान्नविवक्षितोपाधिनोस्येवोपासना नत्वादित्यशरीराभिमानिनोजीवात्मनइतिनिरूपितं

65 इदानींतस्माधारणधर्मदर्शनात्देवोक्ष्यैसंपाद्योपास्यतेनोपदिश्यतेनेनभूताकाशइतिनि

निरूप्यते तत्राकाशइतिहोवाचेतिकिंमुख्याकाशपदानुरोधेनास्यलोकस्यकागतिरितिसर्वाणि

हवाइमानिभूतानीतिज्यायानितिचपरायणमितिचकथंविद्याव्यापत्तौ इतएतदनुरोधे।

नाकाशशब्दोभक्त्यापरमात्मनिव्याख्यापतामिति तत्रप्रथमत्वात्प्रधानत्वादाकाशमुख्य

मेवतः तदनुगुणत्वेनान्यानिव्याख्येयानीतिनिश्चयः २ अस्यलोकस्यकागतिरितिहिप्रश्नोत्त

रेआकाशमितिहोवाचेत्याकाशस्यगतित्वेनप्रतिपादनप्राधान्यात् सर्वाणिहवाइमानीत्यादीनांच उ॰

तद्विशेषणत्वेनगुणत्वात् गुणेतन्यथाप्युपकल्पनेतिबहून्यप्रधानानितदनुरोधेन ६५

नेतव्यानि अपिचाकाशइतिहोवाचेत्युत्तरप्रथमावगतमाकाशमनुपजातविरोधित्वेनतद

परत्वापन्नबुद्धौ यद्देवतदेकवाक्यगतमुपनिपतितंतदुपजातविरोधितदानुगुण्येनने

स्यादुभयमुक्तं । एवं प्राप्ते ऽभिधीयते ऽन्तस्तद्धर्मोपदेशात् सार्वात्म्यसर्वदुरितविरहाभ्यामिहोच्यते
ब्रह्मैवाव्यभिचारिभ्यां सर्वहेतुर्विकारवत् नाम निरुक्तेनेह सर्वपाप्मोदानतया सोदयमुच्यते न
चादित्यस्य देवतायाः कर्मानधिकारेपि सर्वपापविरहः प्रागभवीयधर्माधर्मरूपपाप्मसंभवे सति
न चैतेषां प्राग्भवीयो धर्म एवास्ति न पाप्मेति सांप्रतं विपाककर्मातिशयसमुदाचारेप्यनादिभवप
रंपरोपार्जितानां पाप्मनामपि प्रसक्तानां संभवात् न च श्रुतिप्रामाण्यादादित्यशरीराभिमानिनः स
र्वपाप्मविरह इति द्युतिमुक्तं ब्रह्मविषयत्वेनाप्यस्याः प्रामाण्योपपत्तेः न चाविनियामने हेत्वभावः
तत्र तत्र सर्वपाप्मविरहस्य भूयो भूयो ब्रह्मण्येव श्रवणात् तस्यैव चेह प्रत्यभिज्ञायमानस्य विनियो
मनहेतोर्विद्यमानत्वात् अपि च सार्वात्म्यं जगत्कारणस्य ब्रह्मण एवोपपद्यते कारणाद् भेदात् का
र्यजातस्य ब्रह्मणश्च जगत्कारणत्वात् आदित्यशरीराभिमानिनस्तु जीवात्मनो न जगत्कारणत्वं ।
न च मुख्यार्थसंभवे प्राशस्त्यलक्षणया सार्वात्म्यं कल्पतामुक्ता रूपवत्त्वं चास्य परानुग्रहाय कायनिर्माणं ।
न वा तद्विकारतया वा सर्वस्य कार्यजातस्य विकारजातस्य च विकारवतोऽनन्यत्वात् तादृशरूपभेदे
नोपदिश्यते यथा सर्वगंधः सर्वरस इति न च ब्रह्मनिर्मितं मायारूपमनुवदत् शास्त्रमप्रमाणं भ
वति अपि च तात्पर्यवदिति नाशास्त्रत्वप्रसंगः यत्र तत्र ब्रह्म निरस्तसमस्तोपाधिभेदं तत्र तेनोप
लिप्यते तत्र तु शास्त्रमप्रमाणं न स्पर्शमरूपमव्ययमिति श्रवणेते तस्माद्रूपवत्त्वमपि परमात्मन्युप
पद्यते एतेनैव मर्यादाधारभेदावपि व्याख्यातौ अपि च आदित्यदेहाभिमानिनः संसारिणोन

वाच॰
प्र॰
६६

नसंशयोविपर्ययोवानामनवस्थानेपितस्यस्वविषयेव्यवस्थानात् अन्यथोभयस्थानालंबनत्वापत्तेः
वैयधिकरण्यापत्तेर्वा अपिचोत्तरेपिबह्वसमंजसं तथाहि सर्वाणिहवाइमानिभूतान्याका
शादेवोत्पद्यंतइतिसर्वशब्दः कथंवियदन्यविषयोव्याख्येयः एवमेवकारोप्यसमंजसः न
खल्वपामाकाशमेवकारणमपितुतेजोपि एवमन्नस्यापिनाकाशमेवकारणं अपितुपावक
पाथसीअपिमूलकारणंचवक्तव्यंतुब्रह्मण्येवावधारणमसमंजसं असमंजसंचभूताकाशे
एवंसर्वेषांभूतानांलयोपिब्रह्मण्येव एवंसर्वेभ्योज्यायस्त्वंब्रह्मणएव परमयनंब्रह्मैव तस्मात्सर्वे
षांलोकानामितिप्रश्नेनोपक्रमात् उत्तरेतत्तदसाधारणब्रह्मगुणपरामर्शात् पृष्ठापाश्रगतेः
परमयनमित्यसाधारणब्रह्मगुणोपसंहारात् भूयसीनांश्रुतीनामनुग्रहायमत्यन्नेदेकंकुलस्या
र्थेइतिबह्वरमाकाशपदमात्रमसमंजसमस्तु एवंहिबहुसमंजसंस्यात् नचाकाशस्यप्राधा
न्यमुत्तरेकिंतुपृष्ठार्थत्वादुत्तरस्यलोकसामान्यगतेश्चपृष्ठत्वात् परायणमितिचतस्यैवोप
संहारात् ब्रह्मैवप्रधानं तथाचतद्रूपसदाकाशपदंप्रधानार्थंभवतिनान्यथा तस्मात्ब्र
ह्मैवप्रधानमाकाशपदेनेहोपास्यतेनोपच्छिन्नंनभूताकाशमितिसिद्धं अपिचास्यैवोपक्र
मेश्रुतवत् किलतेसामेसंतवत्तदोषेणशालावत्यस्येति नचाकाशाद्गोगोणेपिविलंबि
तप्रतिपत्तिकस्तत्रतत्रब्रह्मण्येवाकाशशब्दस्यतत्पर्यायस्यचप्रयोगप्राचुर्यात् असंतामप्या
सेनास्यापिसाम्यस्यैवप्रतिपत्तेरविलंबनादितिदर्शनार्थंब्रह्मणिप्रयोगप्राचुर्यंवेदिकंदर्शि

उ॰
६६

66

वक्तव्यस्थानमर्हति नच क्वचिदाकाशशब्दो भक्त्या ब्रह्मणि प्रयुक्त इति सर्वत्र तेन तत्परेण भवितव्यं
नहि गंगायां घोष इत्यत्र गंगापदमनुपपत्त्या तीरपरमिति यादांसि गंगायामित्यत्रापि अनेन त
त्परेण भवितव्यं संभवत्स्वोभयत्र तत्परः नच ब्रह्मण्यप्याकाशशब्दो मुख्योऽनेकार्थत्वस्यान्याय्य
त्वात् भक्त्या च ब्रह्मणि प्रयोगदर्शनोपपत्ते लोके चास्य नभसि निरूढत्वात् तत्पूर्वकत्वाच्च
वैदिकार्थप्रतीतेर्वैपरीत्यानुपपत्तेः तदानुगुण्येन च सर्वाणि हवेत्यादीनि भाष्यकृता स्वयमे
व नीतानि तस्माद्भूताकाशमेवानेनाच्चनेनापदिश्यते न परमात्मेति प्राप्तं एवं प्राप्तेऽभिधी
यते आकाशशब्देन ब्रह्मणो ग्रहणं कुतः तल्लिंगात् तथाहि समानाधिकरण्येन प्रश्नतत्प्र
तिवाक्ययोः पौर्वापर्यपरामर्शात्प्रधानत्वेपि गौणता यद्यप्याकाशपदं प्रधानार्थं तथापि पृ
ष्टं तदेव प्रतिवक्तव्यं नत्वन्यदनुन्मत्तः नह्याम्रान्पृष्टः कोविदारानाचष्टे तदिहास्य लोकस्य का ग
तिरिति प्रश्नो ह्यपमानो नामरूपप्रपंचयातिमात्रविषय इति तदनुरोधात् एव सर्वस्य लोक
स्य गतिः स एवाकाशशब्देन प्रतिवक्तव्यः नच भूताकाशः सर्वस्य लोकस्य गतिः तस्यापि लो
कमध्यपातित्वात् तदेवं तस्य गतिरित्यनुपपत्तेर्न चान्तरे भूताकाशश्रवणं तु भूताकाशका
र्यमेव पृष्टमिति युक्तं प्रश्नस्य प्रपमावगतस्यानुपजातविरोधिनो लोकसामान्यविषयस्योप
जातविरोधिनोत्तरेण संकोचानुपपत्तेः तदनुरोधेनोत्तरव्याख्यानात् नच प्रश्नेन पूर्वप
न्नरूपेणाव्यवस्थितार्थेन उत्तरं व्यवस्थितार्थं न शक्यं नियन्तुमिति युक्तं तन्निमित्तानामता।

वाच॰
प्र॰
६७

मश्रुतिहारयोः सामान्यतो ब्रह्मणोऽप्यग्न्यादित्यस्याग्नेर्वा देवतेऽभिहिते कार्यकरणसंख्यानरूपोऽनन्या
हचर्यात् प्राणोपि कार्यकरणसंख्यानत एव देवता भवितुमर्हतीति निरस्तोप्ययमर्थ इत्तमधिकर
णे पूर्वोक्तः पूर्वपक्षहेतूपोद्बलनाय पुनरुपन्यस्तः तस्माद्वायुविकार एवात्र प्राणशब्दार्थ इति
प्राप्ते एवं प्राप्तेऽभिधीयते श्रुतिवाक्यस्य बलीयस्त्वं मानान्तरसमागमात् अपौरुषेयवाक्येन तत्संग
तिः किं करिष्यति २ नावलुप्तस्वतःसिद्धप्रमाणभावपौरुषेयं वचः स्वविषयविज्ञानोत्पादे वा
न व्यवहारे वा मानान्तरमपेक्षते तेनास्यापौरुषेयस्य निरस्तसमस्तदोषाशंकस्य स्वत एव निश्चाय
कत्वात् निश्चयपूर्वकत्वाच्च व्यवहारप्रवृत्तेः तस्मादस्मदादीनां चक्षुष इव रूपे न लिङ्गेन्द्रियसंवादि
नोपात्तस्येव उद्बोधनादार्ढ्यं वा तेन स्वामिन्द्रियमात्रसंवेदनत्वाभ्रोत्क्रमणे वायुविकारे प्राणे सर्वभू
तसंवेशनोत्क्रमणे वचनततो वाक्यात् प्रतीयते प्रतीतेऽबाधत्वमपि प्राणे ब्रह्मैव भवेन्न वायुविकारः
यदा सुप्तः स्वप्नं न कंचन स्वप्नं पश्यत्यथास्मिन् प्राण एवैकधा भवतीति अत्र वाक्ये प्राणशब्दो
ब्रह्मवचनः न चास्मिन् वायुविकारे सर्वेषां भूतानां संवेशनोत्क्रमणे मानान्तरेण दृश्यते न वै
मानान्तरसिद्धमेवादेहिपसंवेशनोत्क्रमणं वाक्याद्दार्ढ्यात् सर्वभूतसंवेशनोत्क्रमणवाक्यं कथंचि
द्द्विपविषयतया व्याख्यानमर्हति स्वतःसिद्धप्रमाणभावस्य स्वभावहठस्य मानान्तरानुपयो
गात् न चास्य तेनैकवाक्यतापि वा तदपि ब्रह्मपरमेव स्यादित्युक्तं उद्विपसंवेशनोत्क्रमणं तु
अवयुप्रमाणानुवादेनापि घटिष्यते एकदृष्टाणीतेष्वेव दृष्टाणीत उपनिवत् न तु सर्वशब्दार्थः संकोच ॐ
६७

तं भाष्यकृता तत्रैव श्रवणमागतानुगुण्येनोत्तरं नीयते यत्र तदन्यथाकर्तुं शक्यं यत्र तु न शक्यं त
त्रोत्तरानुगुण्येनैव श्रवणमं नीयते तस्मादहर्वाक्योपक्रमगतोपीति ॥ अतएव प्राणः ॥ उद्गीथे प्रस्तोत
र्या देवता प्रस्तावमन्वायत्तेत्युपक्रम्य श्रूयते कतमा सा देवतेति प्राण इति होवाचोषस्तिश्चा
क्रायणः उद्गीथोपासनप्रसंगेन प्रस्तावोपासनमप्युक्तमित्युद्गीथ इत्युक्तं भाष्यकृता प्र
स्ताव इति हि साम्नो भक्तिविशेषः तमन्वायत्ताऽनुगता प्राणो देवता अत्र प्राणशब्दस्य ब्र।
ह्मणि च वायुविकारे च प्रयोगदर्शनात् संशयः किमयं ब्रह्मवचन उत वायुविकारवचन
इति तत्र अतएव ब्रह्मलिंगाद्देव प्राणोपि ब्रह्मैव न वायुविकार इति प्रोक्ते पर्यवसितेनेव्या
नार्थमेतदिति कोधिकरणांतरस्यारंभार्थः तत्रोच्यते अर्थपुनरेकगम्यं हि ..... इति उक्तो यु
तिमेवाद्रियामहे मानांतरावगम्येतु न तदृशा तद्भावस्थितिः २ ब्रह्मणो वा सर्वभूतकारणत्व
माकाशस्येव वाय्वादिभूतकारणत्वे प्रतिनाऽगमात् इतेमानांतरं प्रभवति तत्र पौर्वापर्यप
र्यालोचनया पञ्चार्थसमंजसं भ्रायामः सएवार्थ ताप्प्रगृह्यते मन्यते चेतरः ? इह तु संवेश
नोद्गमने भूतानां प्राणे प्रयुच्यमाने किं ब्रह्म प्रत्युच्यते यद्वा वायुविकारं प्रतीति विषये य
द्यपि पुरुषः स्वपिति प्राणं तर्हि वागप्येतीत्यादिकायाः श्रुतेः सर्वभूतसारेंद्रियसंवेशनो
द्गमनप्रतिपादनद्वारा सर्वभूतसंवेशनोद्गमनप्रतिपादिकायाश्रुतेरानुगुण्य हलब्ध
सामर्थ्यायाबलात्संवेशनोद्गमने वायुविकारस्य प्राणस्यैव न ब्रह्मणः अपि चात्रोक्ते

वाच॰
सू॰
६८

स्याप्योरूपत्वान्न श्रुतो भवतीति यथाल्पफलत्वं च स्ववाक्ये श्रूयते न जातज्वलनापरनामा कौक्षेयोग्निर्विना तेजो
ब्रह्मणि संभवति न चैकोद्देशपन्योतिः साङ्कर्ष्यामृते वा सान्नेन सो ब्रह्मण्युपपद्यते न चोष्मघोषपल्लिंगदर्श
न श्रवणसौं दर्यान्नेन सोऽन्यत्र ब्रह्मण उपपद्यते न च महाफलं ब्रह्मोपासनमल्पीयसे फलाय कल्पते
ऽौदर्यं तत्तेजस्सः ऽप्यस्ववासं तेजउपाध्यनमेतत् फलान्तरूपं युज्यते तदेतन्नैजोलिंगं एतत्तु योद्दलना
यच्चनिरस्तमपि मर्यादाधारवत्त्वमपरस्मत्तं उद्दतं त्रिरामकारणाभावात् न च मर्यादावत्त्वं तेजोरा
शेर्नसंभवति तस्यासौ मर्यादेः सावयवत्वेन तदेकदेशस्य मर्यादासंभवात् तस्य चोपास्यत्वेन विधाना
68 त् ब्रह्मणस्त्वनवयवस्याऽवयवोपासनानुपपत्तेः अवयव कल्पनायाश्च मस्तागतावनवकल्पना
त् न च पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति ब्रह्मप्रतिपादकं वाक्यांतरं यदतः परो दिवो ज्योति
रिति ज्योतिःशब्दं ब्रह्मणि व्यवस्थापयतीति युक्तं नहि संनिधानमात्राद्वाक्यांतरेण वाक्यांतरगता
श्रुतिः सा त्वार्थाज्ज्वया प्रच्यावयितुमर्याति न च वाक्यांतरे अधिकरणत्वेन यो श्रुतादिव इति मर्या
दा श्रुतो शक्या प्रामभित्यातं अपि च वाक्यांतरस्यापि ब्रह्मार्थत्वं प्रमाध्यमेवनायापि सिद्धमिति न
तत्पर्यंतेन निर्यत्वं ब्रह्मपरत्वपापरतः परऽइति वाक्यं भान्वं तस्मात्तेजएव ज्योतिर्न ब्रह्मेति प्राप्ते ते उ॰
नः कथन चलावेत मः कृथनं प्रतिपत्तो पन्यासेन प्रतिपत्त्यान्तरे हृत्वा प्रति पत्तिर्भवती स्यैतदर्थं ६८
वत्तदृत्तेनिरोधकमिममर्थः वरकत्वेन प्राहत्वात्प्राहनत्वकार्यस्यापीति समाधत्ते कटेश्रीव्रते अ
स्तुत हीति यत्तु तेजस्त्वचन्नाभ्यामसंपृष्टं तदचिरेष्टं तमुच्यते आहेताद्गृध्यतितेनतिनहि

महेति तस्मात्प्रत्यगात्मभक्तिश्रवणाद्ब्रह्मैवाभिधेयं ब्रह्मदृष्ट्योपासीनस्य न वा पुनर्विकारदृष्ट्येति सिद्धं तथा
चोपासकस्य श्रवणान्निःकर्मसमृद्धिर्वा फलं भविष्यतीति वाक्यशेषबलेनेति वाक्यान्तरसंनिधान
द्बलमित्यर्थः उदाहरणानन्तरं तन्निगदव्याख्यानेन भाष्येण दूषितं सू॰ ज्योतिश्चरणाभिधाना
त् इदमामनंति अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु
लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति यज्ज्योतिरतो दिवो द्युलोकात्परं दी
प्यते विश्वतः पृष्ठेषु विश्वस्योपरि यः संबंधि चिह्नं निरवयविश्वप्रपञ्चोऽनवयवेन संसारमंडलेनू
नत इति दर्शयितुमाह सर्वतः पृष्ठेषूत्तमेषु न वेदस्तत्त्वमसामात्रं ग्राह्यमिति सर्वोत्तममित्याह अ
नुत्तमेषु नास्य मत्तोऽन्य उत्तमः उत्तमेत्यर्थः इदं वाव तद्यदिदमस्मिन्पुरुषेंतर्ज्योतिः तच्चक्षुयासे
णशारीरेणोष्मणा श्रोत्रयासेन च पिहितकर्णेन घोषेण लिंगेनानुमीयते तत्र शरीर
स्पोष्मणः त्वचा दर्शनं दृष्टिः घोषस्य च श्रवणं श्रुतिः तयोश्च दृष्टिश्रुत्योर्ज्योतिष एव तल्लिंगो
नतदनुमानादिति अत्र संशयः किं ज्योतिःशब्दः तेज उत ब्रह्मेति किं तावत्प्राप्तं तेज इति कुतः
गौणस्य ब्रह्मग्रहणविषये मुख्यग्रहणस्यौत्सर्गिकत्वाद्वाक्यस्य तेजसो लिंगोपलंभनात् वा
क्यांतरेण नियमात् तद्रूपाश्रितिसंभितः २ बलवद्बाधकोपनिपातेन वाक्यशेषाश्रवणेषा
द्यौस्थव्याप्यंतप्रत्याख्यानमत्र प्रतिष्ठापितो तदिह ज्योतिःपदस्य मुख्यतेजोवचनत्वे बाधक
स्तावत्स्ववाक्यशेषे नास्ति प्रत्युत तेजोलिंगमेव दृश्यत इति च कौक्षेयज्योतिःसारूप्याच्च च

वाच॰
प्र॰
६९

सानीति ब्रह्मण्येवावगमयितव्यानि गमितानि च भाष्यकृता तत्र ज्योतिर्ब्रह्म विकार इति ज्योतिषा
ब्रह्मैवोपलक्ष्यते अथवा प्रकाशमात्रवचनो ज्योतिःशब्दः प्रकाशश्च ब्रह्मेति ब्रह्मणि मुख्य इति ज्यो
तिर्ब्रह्मेति सिद्धं प्रकृतहानाप्रकृतप्रक्रियेति प्रसिद्ध्युपेतानां पूर्ववाक्यगतं प्रकृतं सन्निहितं अप्र
सिद्धं तु वाक्यमप्रकृतं अत एवाकं कल्पयत इति संदंशन्यायमाह न केवलमिति परस्यापि ब्रह्म
णो नामप्रतीकत्ववदिति कौक्षेयकं हि ज्योतिर्जीवभावेनानुप्रविष्टस्य परमात्मनो विकारो जीव
भावेनानुप्रविष्टस्य परमात्मनो विकारो जीवाभावे देहस्य शोभात् जीवस्य तत्प्रोष्यान्तापते न
स्यात्प्रतीकस्योपासनमुपपन्नं शेषं निगदव्याख्यातं भाष्ये छंदोभिधानान्नेति चेन्न तथा चेतोर्प्प
णनिगदात् तथा हि दर्शनं पूर्ववाक्यस्य हि ब्रह्मार्पणत्वेन सिद्धस्याद् न देवं न तु तद्ब्रह्मार्थमपि तु
गायत्र्यर्थं गायत्री वा इदं सर्वं भूतं यदिदं किं चेति गायत्री प्रकृत्येदमुच्यते त्रिपादस्यामृतं दि
वीति न तावाकाशत्वांल्लिंगादिमनेनैव गतार्थमेतत् तथा हि तावानस्य महिमेत्यस्याक्षरं च ब्रह्मच
तुष्पादुक्तं सेव चतदेतद्वचाभ्यनूक्तमित्यनेन संगमिताथोऽब्रह्मलिंगं एवं गायत्री वा इदं सर्वमि
त्यत्र न मन्त्रिवेशमात्रस्य गायत्र्यानसर्वात्मकत्वमुपपद्यते न च भूतपृथिवीशरीरहृदयवाक्प्राण
त्मत्वं गायत्र्याः स्वरूपेण संभवति न च पंचब्रह्मपुरुषसंबंधित्वमस्ति गायत्र्याः तस्माद्गायत्री
द्वारा ब्रह्मण एवोपासनं गायत्र्या इति पूर्वेणैव गतार्थत्वादनारंभणीयमेतत् न च पूर्वस्मात्य
स्मारणे स्वत्रं संदर्भे यतावाद्दुपपत्रे चात्यते अत्रपधिकाशंका तथा हि गायत्रीद्वारा ब्रह्मोपासनेति

69

उ॰
६९

तत्र कश्चिदप्युपपद्यते सर्वासर्वात्मिकापास्तत्रित्वत्वेन संबंधोपयोगादित्यर्थः एकदेशिनः शंकामाह
इदमेवेति आत्मेव्याप्तिनिराकरोति तेन प्रयोजनं नांतरेति एकैकांत्रित्वं तं करवाणीति तेनः प्रभृत्युपा
समात्रविषया श्रुतिर्न संकोचयितुं युक्तेत्यर्थः एवमेकदेशिनि दूषिते परमसमाधानात्पूर्वपक्षी
भूते अस्तु तर्हि त्रित्वत्वं तमेवेति भागिनी युक्ता यद्यपि आधारवत्त्वश्रुतिः ब्रह्मण्यपि कल्पि
तोपाधिनिबंधना कथंचिदुपपद्यते तथापि यथा कार्ये ज्योतिष्यतिशयेनोपपद्यते न तथात
त्वेमन उक्तं उपपद्यते तरामिति शाकृतं कृते जातं कार्यमिति यावत् एवं प्राप्त उच्यते सर्वनाम
प्रसिद्धार्थप्रसाध्यार्थविषयात्तत्त्वेन प्रसिद्धापेक्षत्वात् पूर्ववाक्यस्थमनुकर्षतीति तद्बलात्तेन ने
मानि तेजोलिंगान्यपि पूर्वं ब्रह्मण्येव प्रधानं हि ब्रह्म हेदनत तत्रत औत्सर्गिकं तावद्यदः प्रसि
द्धार्थानुवादकत्वं यद्विधिविभक्तिमपि अपूर्वार्थावबोधनसमभावात् प्रच्यावयति यथा यस्मा
हिताग्नेरग्निर्गृहात् दहेत् यस्याभयं हविरार्त्तिमार्च्छेदिति यत्र पुनस्तत्प्रसिद्धमन्यतो न कथंचि
द्वाप्यते तत्र वचनानि त्वपूर्वत्वादिति सर्वनाम्नः प्रसिद्धार्थत्वं बलादपनीयते यथा यदाग्नेयोऽष्टाक
पालो भवतीति तद्धि पद्दतः परोदिवो ज्योतिरिति पञ्चम्या सामर्थ्यात् मुमर्थादेनापि ज्योतिषा प्र
सिद्धेन भवितव्यं न तस्य प्रमाणान्तरतः प्रसिद्धिरस्ति पूर्ववाक्ये च द्युसंबंधे त्रिपाद्ब्रह्म प्रसिद्धमि
ह प्रसिद्ध्यपेक्षायां तदेवं संबध्यते न च प्रधानस्य प्रातिपदिकार्थस्य ततेन प्रत्यभिज्ञाने तद्धि
शेषणस्य विभक्त्यर्थस्यान्वतामात्रेणान्यता युक्ता एवं च लक्षणाकाण्यस्थानि तेजोलिंगान्यसमंज

वाच॰ मंत्र्यमानस्मात् योऽयमाह्वस्माद्ब्रह्मण्येव वर्त्ततइति दर्शयति अथ परस्याहेतितथाहिषडक्षरैःपा
प्र॰ दैर्मंत्रस्य गायत्री चतुष्पदैवं ब्रह्मापि चतुष्पात् सर्वाणि हि भूतानि स्थावरजंगमान्यस्यैकःपादः दिवि
७० द्योतनवति चैतन्यरूपे स्वात्मन्यमृतं त्रिपादिति यावत् त्रयःपादाः अथवा दिव्याकाशो ऽत्रयः पादास्तथाहि श्रुतिः
इदं वाव तद्यो ऽयं बहिर्धा पुरुषादाकाशः तद्धितस्य जागरितस्थानं जाग्रत्तु विल्वयं वाह्यान्न वेद न
चाऽयं वाव सयो ऽयमंतः पुरुषआकाशः शरीरमध्यइत्यर्थः तद्धितस्यहि जागरित(ता)स्वप्नस्था
नं तथा ऽयं वाव सयो ऽयमंतर्हृदयआकाशः हृदयपुंडरीकइत्यर्थः तद्धितस्य पुरुषस्य सुषु
प्तस्थानं तदेतत्त्रिपादस्यामृतं दिवीत्युक्तं तदेव चतुष्पात्त्वमस्मात् गायत्रीशब्देन ब्रह्मोच्यत इ
ति अस्मिन् पक्षे ब्रह्मैवाभिहितमिति ब्रह्मपरत्वादभिहितमित्युक्तं षड्विधेति भूतपृथिवीश
70 रीरहृदयवाक्प्राणाइतिषट्प्रकाराः गायत्र्याख्यस्य ब्रह्मणः श्रूयंते पंच ब्रह्मपुरुषाइति च हृ
दयस्यषिषु ब्रह्मपुरुषाइतिश्रुतिर्ब्रह्मसंबंधेता पांविवक्षितानामसंभवति अयमर्थः हृदयस्या
स्यावत्तयं चदेवसुषयः पंच हि छिद्राणि तानि च देवैः प्राणादित्यादिभी रक्ष्यमाणानि स्वर्गो
प्राप्तिद्वाराणीति देवसुषयः तथाहि हृदयस्यास्य यत् प्राङ्मुखं छिद्रं तत्स्थो यो वायुः विशेषः उ॰
प्राणः तेन हि प्राणेन प्रयाणकाले संचरते स्वर्गंलोकं सएव चक्षुः सएव चादित्यइत्यर्थः ७०
आदित्यो ह वै वा ऽस प्राणइति श्रुतेः अथयो ऽस्य दक्षिणः सुषिः तत्स्थो वायुविशेषो व्यानः
ततसंबद्धं श्रोत्रं तच्चंद्रमाः श्रोत्रेण सृष्टा दिशश्चंद्रमाश्चेति श्रुतेः अथयो ऽस्य प्रत्यङ्मुखः

कोऽर्थः गायत्रीविकारोपाधिनो ब्रह्मण उपास्यत्वेनेति न च तदुपाधिनस्तदवच्छिन्नस्य सर्वात्मत्वं तद्रूपा
धेरवच्छेदात् नहि घटावच्छिन्नं नभोऽनवच्छिन्नं भवति तस्मादस्य सर्वात्मकत्वादिकं स्तुत्यर्थं तदिदं
गायत्र्या एवात्र स्तुतिः कथञ्चित्स्वरूपेणाज्ञा वाग्वै गायत्री वाग्वा इदं सर्वं भूतं गायति त्रायते चेत्यादिश्रु
तिभ्यः तथा च गायत्री वा इदं सर्वमित्युपक्रम्य गायत्र्या एव हृदयादिभिर्व्याख्याय चैषा चतुष्प
दा षड्विधा गायत्रीत्युपसंहारो गायत्र्यामेव समञ्जसो भवति ब्रह्मणि तु सर्वमेतदसमञ्जसमिति
यद्वै तद्ब्रह्मेति च ब्रह्मशब्दः छन्दोविषय एव यथैतां ब्रह्मोपनिषदमित्यत्र वेदोपनिषदुच्यते न
स्याद्गायत्रीछन्दोऽभिधानात् न ब्रह्मविषयमेतदिति एवं प्राप्तेऽभिधीयते न कुतः तथा चेतोऽर्प
णनिगदात् गायत्र्याख्यच्छन्दोद्वारेण चेतोऽर्पणं चेतःसमाधानं ब्राह्मणवाक्येन निगद्यते ।
एतदुक्तं भवति न गायत्री ब्रह्मणोऽवच्छेदिका उपलक्षणमेव नीलत्वं येन तदवच्छिन्नमन्यत्र न स्या
त्तस्यावच्छेदविरहात् किन्तु यदेव तद्ब्रह्म सर्वात्मकं सर्वकारणं तत्स्वरूपेणाशक्योपदेशमि
ति तद्विकारगायत्रीद्वारेणोपलक्ष्यते गायत्र्याः सर्वच्छन्दोव्याप्त्या सवनत्रयव्याप्त्या वा द्वि
जातिद्वितीयजन्मजननीतया च श्रुतेर्विकारेषु मध्ये प्राधान्येन द्वारत्वोपपत्तेः न चान्यत्रोपल
क्षणाभावेन नोपलक्ष्यं प्रतीयते नहि कुण्डलेनोपलक्षितं कण्ठरूपं कुण्डलवियोगेऽपि पश्चात्
प्रतीयमानमप्रतीयमानं भवति तद्रूपप्रत्ययमात्रोपयोगादुपलक्षणानामनवच्छेदकत्वा
त् तदेवं गायत्रीशब्दस्य मुख्यार्थत्वे गायत्र्या ब्रह्मोपलक्ष्यत इत्युक्ते सम्भवति तु गायत्रीशब्दः

वा॰ प॰ ७२ संभवः वस्तुतत्वं वचनात्करणव्यापारकर्तृत्वं यद्यपि परमात्मनि स्वरूपेण न संभवति तथापि निरुप
ाधिसिद्धवद्ब्रह्मलिंगाविरोधात् जीवद्वारेण ब्रह्मण्येव कथंचिद्व्याख्येयं जीवस्य ब्रह्मणोऽभेदा
त् तथा च श्रुतिः यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि इति वाग्वदनस्य ब्रह्म।
कारणमित्याह शरीरधारणमपि यद्यपि मुख्यप्राणस्यैव तथापि प्राणव्यापारस्य परमात्माय
त्तत्वात् परमात्मन एव यद्यपि चार्वैंद्रदेवताया विग्रहवत्त्वलिंगमस्ति तथापीन्द्रधामगतं प्रत
र्दनं प्रतीन्द्र उवाच मामेव विजानीहीत्युपक्रम्य प्राणोऽस्मि प्रज्ञात्मेति आत्मनि प्राणशब्दसमभिव्या
रप्रज्ञात्मसंज्ञास्योपपद्यते देवतानामप्रतिहतज्ञानशक्तित्वात् सामर्थ्यातिशयाच्चेन्द्रस्य हितत
मपुरुषार्थहेतुत्वमपि मनुष्याधिकारत्वात् शास्त्रस्य देवानुप्रमप्रवृत्तेर्भ्रूणहत्यादिपापाप्रकाम
र्गोस्याप्युपपत्तेः लोकाधिपतेश्चेन्द्रस्य लोकपालत्वात् तथानंदादिरूपत्वं च स्वर्गस्यैवानंदत्वात्
आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इति स्मृतेस्त्वामृतत्वमिन्द्रस्य तत्वाप्युपमहत्तमित्याद्याविग्रह
वत्वेन स्तुतित्वेनैवोपपद्यते तथापि परमपुरुषार्थस्यापवर्गस्य परमब्रह्मज्ञानादन्यतोऽनवा
प्तेः परमानंदरूपस्यमनाद्यस्यामृतत्वस्याजरत्वस्य च ब्रह्मरूपाव्यभिचारात् अध्यात्मसंबंधभू। उ॰
म्नश्च पराचीनेऽनुपपत्तेः इन्द्रस्य देवतायाः आत्मनि प्रतिबुद्धस्य चरमदेहस्य वामदेवस्येव प्रार ७२
ब्धविपाककर्माशयमात्रं भोगेन क्षपयतो ब्रह्मण एव सर्वमेतत्कल्पत इति विग्रहवदिन्द्र।
जीवप्राणवायुपरित्यागेन ब्रह्मैवात्र प्राणशब्दप्रतीयत इति विग्रहवदिन्द्रजीवप्राणवायु

72

सुषिः तस्थो वायुविशेषो ऽपानः स च वाक्तत्संबंधात् वाग्वा अग्निरिति श्रुतेः अथ यो ऽस्योद
दङ्ङुत्तरसुषिः तस्थो वायुविशेषः समानः तत्संबद्धं मनस्तत्पर्जन्यो देवता अथ यो ऽस्योर्ध्वः
सुषिः स उदानः पादतलादारभ्य ऊर्ध्वं नयनात् स वायुस्तदाधार आकाशो देवता ते वा एते पंच
सुषयः पलसंबद्धाः पंचहार्दब्रह्मणः पुरुषः नगरस्य द्वारसंनिवेशमात्रे संभवंति किं
तद्ब्रह्मण्येवेति यथालोक इति यदाधारत्वं सूत्र्यं दिवस्तदा कथंचिन्मर्यादावाचकत्वं ययो हि
यथेनो वृक्षाग्रे वर्त्तनो ऽलिसततः परतोप्यस्त्येव अर्वाग्भागातिरिक्तमध्यपरभागस्थस्यापि तस्य
वृक्षात् परतो वस्थानात् एवं वा स्वर्गभागातिरिक्तशरीरहार्दसुभागात्स्यस्य ब्रह्मणो वा
स्वात्सुभागात्परतो ऽवस्थानमप्युपपन्नं यदा तु मर्यादैव मुख्यतया प्राधान्येन विवक्षिता त
दा लक्षणया धारत्वं व्याख्येयं यथा गंगायां घोष इत्यत्र सामीप्यादिति तदिदमुक्तमपर
स्याहेति अत एव दिवः परमपीत्युक्तं प्राणस्य त्वाद्गमात् अनेकलिंगसंदेहे बलवत्त्व
स्य किं भवेत् लिंगिनो लिंगाभिमन्त्रचिंत्यते श्रागर्चिंतितं २ सूत्रेषु प्राणजीवदेवताब्रह्मणा
मनेकेषां लिंगानीह बहूनि संल्लवंते तत्कृतमदत्त लिंगं लिंगाभासं च कतमदिति अत्र वि
चार्यते न चाप मर्त्यो ऽत एव प्राण उत्पत्त्र विचारितः स्यादेतत् हितमधुरूपायोपसिद्धिश्च
निखिलतृणहत्यादिपापापरामर्षश्च प्रज्ञात्मत्वं चयानंदादिकं तन्मुख्यप्राणे संभवं
ति तथा घसाधुकर्मकारयतितिमायापिजीवितप्रज्ञात्मत्वं कथंचिद्वेदितव्यमात्र

वाच- दर्शनं समस्ता वितितद्ज्ञानक्रियाशक्तिभेदेन बुद्धिप्राणयोः प्रत्यगात्मोपाधिभूतयोर्निर्देशः प्रत्यगात्मानमेवोपल
प- क्षयति अतो वोपलक्ष्यस्य प्रत्यगात्मस्वरूपस्याभेदमुपलक्षणाभेदेनोपलक्षयति प्राण एव प्रज्ञात्मेति तस्मादनन्यथा
७२ सिद्धब्रह्मलिंगानुरोधतः एकवाक्यबलात् प्राणजीवलिंगोपपादनं इति ग्रहः न ब्रह्मवाक्यं भवितुमर्हतीति ने
षसंदर्भो ब्रह्मवाक्यमेव भवितुमर्हतीति किं तु यथायोगं किंचिदत्र जीववाक्यं किंचिन्मुख्यप्राणवाक्यं किंचिद्ब्र
ह्मवाक्यमित्यर्थः प्रज्ञासाधनप्राणांतराभ्रमादिति प्राणांतराणींद्रियांतराणि तानि हि मुख्ये प्राणे प्रतिष्ठिता
नि जीवमुख्यप्राणयोरित्युपक्रममात्रं उभाविति तु पूर्वपक्षतत्त्वं ब्रह्मत्वपूर्वं न ब्रह्मेति न ब्रह्मैवेत्यर्थः दश।
नां भूतमात्राणामिति पंचशब्दादयः पंच पृथिव्यादय इति दश भूतमात्राः पंच बुद्धीन्द्रियाणि पंच बुद्धय इ
ति दश प्रज्ञामात्राः तदेवं त्वमतेन व्याख्याय प्राचां वृत्तिकृतां मतेन व्याचष्टे अपि चेति पूर्वं प्राणस्यैकस्योपास
72 नं परं जीवस्यापरं ब्रह्मण इति उपासनात्रैविध्ये न वाक्यभेदप्रसंगो दूषणमुक्तं इह तु ब्रह्मण एकस्यैवो
पासात्रयविशिष्टविधानात् न वाक्यभेद इत्यभिमानः प्राचां वृत्तिकृतां तदेतदालोचनीयं कथं न वाक्यभे
द इति यत्सोमेन यजेतेत्यादौ सोमादिगुणविशिष्टयागविधानं तत्र गुणविशिष्टस्यापूर्वस्य कर्मणोऽप्रा
प्तस्य विधिविषयत्वात् इह तु सिद्धरूपं ब्रह्म न विधिविषयो भवितुमर्हति भावार्थत्वात् भावार्थस्य विधिवि
षयत्वनियमात् वाक्यांतरेभ्यश्च ब्रह्मावगतेः प्राप्तत्वात् तदनूद्य प्राप्तोपासनाभावार्थो विधेय इति तस्य च भेदा
त् विधात्रित्वे लक्षणे वाक्यभेदोऽतिस्फुट इति भाष्यकृता नोद्भावितः स्वव्याख्याने नैवोक्तप्रायत्वादिति सर्व
मवदातं ११ इति श्रीवाचस्पतिमिश्रविरचिते श्रीमत्शंकरकृतशारीरकमीमांसाभाष्यविभागे भामत्यां
प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः लिखितं नरायण भट्टकाश्मीरीक पिप्पल मध्ये संवत् १८७२

उ. ७२

परित्यागेन ब्रह्मैवात्र प्राणशब्दं प्रतीयत इति पूर्वपक्षाभावात् अनारम्भमेतदिति अत्रोच्यते
यावै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः सह ह्येतावस्मिन्शरीरे वसतः सहोत्क्रामत इति पस्ये
व प्राणस्य प्रज्ञात्मनाउपास्यत्वमुक्त्वा तस्यैव प्राणस्य प्रज्ञात्मना सहोत्क्रमणमुच्यते न च ब्रह्मण
भेदे द्विवचनेन च सहभावो न चोत्क्रमणं तस्मात्वायुरेव प्राणः जीवश्च प्रज्ञात्मा सह प्रवृत्तिनि
वृत्त्याभक्त्या एकत्वमनयो रूप्यचर्यते यो वै प्राण इत्यादिना आनंदाजरामरापहतपाप्मत्वादयश्च
ब्रह्मणि प्राणे भविष्यंति तस्मात् यथायोगं त्रयाणां वा उपास्याः न चैष वाक्यभेदो दोषमावहति वा
क्यार्थावगमस्य पदार्थावगमपूर्वत्वात् पदार्थानां चोक्तेन मार्गेण सत्वात् तस्मात् उपास्यभेदा
उपास्यात्रैविध्यमिति पूर्वः पक्षः सिद्धांतस्तु सत्यं पदार्थावगमो वाक्यार्थावगमः न तु पदा
वगमपराण्येव पदानि अपितैकवाक्यार्थावगमपराणि तमेव त्वेकं वाक्यार्थं पर्यावगमम
तरेण न यथानुवर्तित कर्तुमिमित्तं तदर्थमेव तमप्यवगमयंति तेन पदानि विशिष्टैकार्थाव
बोधनस्वभावान्येव बलवद्बाधकोपनिपाता ज्ज्ञानार्थबोधनपरतां नीयंते यथाक्रः संभव
त्येकवाक्यत्वे वाक्यभेदश्च नेष्यत इति तेन पदार्थायोपांशुयाजवाक्ये जामितदोषोपक्रमत्वाति
समाधानोपसंहारे चैकवाक्यता यथा प्रजापति रूपांशुयष्टव्य इत्यादयो नष्टपाविषयः किं
त्वर्थवादा इति निर्णीतं तथेहापि मामेव विजानीहीत्युपक्रम्य प्राणोस्मि प्रज्ञात्मेत्युक्त्वा अंते
स एष प्राण एव प्रज्ञात्माऽऽनंदोऽजरोऽमृत इति उपसंहारात् ब्रह्मण्येवैकवाक्यतावगतौ सत्यां
जीवमुख्यप्राणलिंगे अपि तदनुगुणतया नेतव्ये अन्यथा वाक्यभेदप्रसंगात् यत्तु पुनर्भे

वा॰ब॰
ब्र॰स्ि॰
७३

सर्वमिमादिवाक्यशेषगुणोविधिः तथाचसर्वंखल्विदंब्रह्मेतिवाक्यं प्रथमं पठितमपिब्रह्मपर्यालोच
नयापरमेवतदर्थोपजीवित्वात् एवंचसंकल्पविधिः प्रथमोनिर्विषयसन्नपर्यवस्यन्विषया
पेक्षः स्वप्रथमनिर्दिष्टोनविध्यंतरेणोपजीवितुंशक्योनुपपादकत्वात् तस्मात्शांततागुणवि
धानात् पूर्वमेव मनोमयः प्राणशरीरइत्यादिभिर्विषयोपनायकैः संबध्यते मनोमयत्वादि
नकार्यकारणसंघातात्मनोजीवात्मनएवनिरूढमितिजीवात्मनोपास्येनोपरतोपासनानुप ।
प्त्याद्ब्रह्मणःसंबद्धुमर्हतीति उपास्तिविशिष्टगुणव्यवायात् नचसर्वंखल्विदमितिवाक्यंब्रह्मपरं श्र
ुतिश्रामहेतपश्चित्यादर्थवादः शांतताविधिपरः सूर्येणानुहोतीतितेनसन्नंक्रियतइतिवत् नचास्म
परादपिब्रह्मप्रपिहिततत्पार्श्वीक्रियतइतिप्रश्नः मनोमयत्वादिभिर्जीवस्य प्रसिद्धैर्जीवविष
यसमर्पणेनानपेक्षितत्वात् सर्वकर्मत्वादिचजीवस्यपर्यायेणाभविष्यति एवंवाक्यैकत्वम
नुपपन्नं परमात्मानंतुपरमेपस्यतदनुपपत्तिः प्रथमावगतेनचाक्षेपत्वेनत्याय
त्वंतदनुगुणेनयाव्याख्येयं व्याख्यातंचभाष्यकृता एवंकर्मकर्तृव्यपदेशः सप्तमीप्र
थमांतता अभेदेपिजीवात्मनिकर्मत्वंचितुभेदोपचारेणराहोःशिरइतिवत् द्रष्टव्या एतद्ब्र
ह्मेतिचजीवविषयं जीवस्यापिदेहादिबृंहणत्वेनब्रह्मत्वात् एवंसत्यसंकल्पत्वादयोपिप पृ॰ ७३
रमात्मवर्तिनोजीवेपिसंभवंति तदव्यतिरेकात् तस्माज्जीवएवोपास्यत्वेनात्रविवक्षितोन
परमात्मेतिप्राप्तेपठ्यप्राप्तेभिधीयते समासः सर्वनामार्थः सन्निकृष्टमपेक्षते तद्धितार्थो

73

श्रीगणेशाय नमः अथ द्वितीयपादस्यारंभः पूर्वोक्तमर्थं स्मारयति वक्ष्यमाणोपयोगितया ।
प्रथमे पाद इति उत्तरत्र हि ब्रह्मणो व्यापित्वनित्यत्वादयः सिद्धवद्धेतुतयोपदेक्ष्यंते न चैते ।
साक्षात्सूत्रेणोपपादिता इति कथं हेतुभावेन शक्या उपदेष्टुमिति शंकते उक्तेः समस्तजगत्कार
णस्येति यद्यप्येतेन सूत्रेणैवोक्ताः तथापि ब्रह्मणो जगज्जन्मादिकारणत्वोपपादनेनार्थिकार
णसिद्धं तन्यायेनोपपत्तिमत्त्वा इति उपपन्नत्वेषामुत्तरत्र हेतुभावेनोपन्यास इत्यर्थः अर्थांत
रप्रसिद्धानां चेति यत्रार्थांतरप्रसिद्धानां चेति यत्रार्थांतरप्रसिद्धा एवाकाशप्राणज्योति ।
रादयो ब्रह्मणि व्याख्यायंते तदव्यभिचारिलिंगश्रवणात् तत्र केवलकथा मनोमयादीनां अ
र्थांतरे प्रसिद्धानां पदानां ब्रह्मगोचरत्वनिर्णयः पूर्वपक्षाभिप्रायेण दर्शयिष्यामः सर्वत्र
प्रसिद्धोपदेशात् इदमाम्नायते सर्वं खल्विदं ब्रह्म तज्जलानिति यतस्तस्माद्ब्रह्म ।
णो जायत इति तज्जं तस्मिन्नेव लीयत इति तल्लं तस्मिन्नानिति स्थितिकाले चेष्टत इति तद
नं जगत् तस्मात् सर्वं खल्विदं जगत् ब्रह्म यतः कः कस्मिन् रज्यते कस्य वा किं द्वेष्टीति रागद्वे
षरहितः शांतः सन् उपासीत अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिन्लोके पुरु
षो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यादि तत्र संशयः
किमिह मनोमयत्वादिभिर्धर्मैः शारीर आत्मोपास्यत्वेनोपदिश्यते आहोस्वित् ब्रह्मेति किं
तावत्प्राप्तं शारीरो जीव इति कुतः क्रतुमित्यादिना कोनविहितां क्रतुभावनां अनूद्य

वाच. तदा भुजंगस्याभावात् किं तद्रूपवत् भुजंगाद्यारोपणं तु न नास्ति वास्तवी रज्जुः तदिह समारोपि
प्र. द्वि. तज्जीवरूपेणावस्थितं ब्रह्मरूपवद्युज्यते न च ब्रह्मस्वरूपैर्निर्मलत्वादिभिर्धर्मैस्तद्वज्जीवस्तद्वान् भवितु
७४ मर्हतीति न यत्तदानीमसंभवात् तस्माद्ब्रह्मलिंगदर्शनात् जीवे च तदसंभवात् ब्रह्मैवोपास्यं न जी
व इति सिद्धं एतदुपलक्षणं च सर्वं खल्विदं ब्रह्मेति वाक्यमुपन्यस्तमिति यथाप्यपौरुषेयपद इति
शास्त्रयोनित्वेपीश्वरस्य पूर्वपूर्वकृष्टिरचितसंदर्भापेक्षरचनत्वेनास्वातंत्र्यादपौरुषेयत्वाभिधानं
तथा च स्वातंत्र्येण विवक्षानास्तीत्युक्तं परिग्रहपरित्यागौ च उपादानानुपादाने उक्तौ न नूपादेयत्व
मेव अयमपोहेयत्वमाग्रहेनुपादेयत्वस्याग्रहादेरविवक्षितत्वेन च भ्रमप्रमादादावपि संमार्गप्रसंगात् तस्मा
74 दनुपादेयत्वेपि ग्रहणाद्धेयत्वेनापरिगृहीतो विवक्षितः तदुक्तं तत्रैकत्वं यच्छेदकत्वेनावर्जितम्।
विवक्षितं इष्टानिष्टं च भक्तितः तदिदमुक्तं वेदवाक्यतात्पर्याभ्यामवगम्यते इति यस्य संवेद
वाक्यं तत्तेनोपात्तं विवक्षितं अतस्तदन्यदुपात्तमविवक्षितमित्यर्थः स्यादेतत् यथा सत्यसंकल्प
त्वादयो ब्रह्मण्युपपद्यंते एवं शारीरेप्युपपत्स्यंते शारीरस्य ब्रह्मणो भेदात् शारीरगुणा इव म
नोमयत्वादयो ब्रह्मणीत्यत आह सूत्रकारः अनुपपत्तेस्तु न शारीरः यत्तद्योवामः समारोप्य उ.
धर्माः समारोपविषये संभवंति न तु विषयधर्माः समारोप्ये इति तस्यैतदुत्थानं अत्राह चोदकः ७४
कः पुनरयं शारीरो नामेति न तावद्भेदः प्रतिषेधात् भेदव्यपदेशाच्च भेदाभेदावेकत्र तात्विको
भवितुमर्हतो विरोधादित्युक्तं तस्मादेकमिह तात्विकमतात्विकं चेतरत् तत्र पौर्वापर्येण द्वैत

२

पिसामान्येनापेक्षायांनिवर्तकः तस्मादप्येतत्ब्रह्मणःसमन्वयपरत्वादपि तथाचसत्यसंकल्पप्रभृ
तीनांयथार्थता भवेदेतदेवंयदिप्राणपुरीरवउमादीनांप्राणत्वाज्जीववाचकत्वंभवेत् नत्वेतदस्ति
तथाहि प्राणःशरीरमस्येतिसर्वनामार्थेबहुव्रीहिः सन्निहितंचसर्वनामार्थसंज्ञापयतदभिधा
नंपर्यवस्येत् तत्रमनोमयपदं पर्यवसिताभिधानंतदभिधानपर्यवसानापात्ततदेवतुमनो।
विकारोवामनःप्राचुर्यंवाकिमर्थमित्यपेक्षायांनिर्विकल्पते तथ्यत्वैषपाठः समवेतार्थोभवति
ससमासार्थः नचैषजीवएवसमवेतार्थोनब्रह्मणीति तस्यप्राणोऽसमनाउमादिभिस्तद्धि
रहप्रतिपादनादितिप्रयुक्तं तस्यापिसर्वविकारकारणतयाविकाराणांचस्वकारणादभे
दात्तेषांचमनोमयत्वाब्रह्मणस्तत्कारणस्यमनोमयत्वोपपत्तेः स्यादेतत्जीवस्यसाक्षा
त्मनोमयत्वादयोब्रह्मणस्तुतद्द्वारा तत्रयथोपसंहारस्यबुद्धिस्थत्वात्तदेवोपास्यमस्तुन
पुनर्दूरस्थंब्रह्माब्रह्मलिंगानिचजीवस्यब्रह्मणोऽभेदात्तज्जीवेप्युपपन्नानितेतदेतत्संप्र
धार्यकिंब्रह्मलिंगैर्जीवानांतदभिन्नानामस्तुनद्दृष्टा तथाचजीवस्यमनोमयत्वादिभिः
प्रथममवगमात् तस्यैवोपास्यत्वं उक्तंजीवस्यब्रह्मलिंगावगमात्तदभिन्नस्यापिजीवलिंगैर्ब्रह्म
तद्वत् तथाचब्रह्मलिंगानांदर्शनात्तेषांचजीवेऽप्यनुपपत्तेर्ब्रह्मैवोपास्यमिति यथाहितुपश्यामः मा
णिक्यस्यरूपेणविषयोरूपवान्भवेत् विषयस्यतद्रूपेणसमारोपितेनरूपवत् समारोपितस्यहिरूपे।
णभुजंगस्याभीषणत्वादिनारज्जुरूपवती नतुपुनारज्जुरूपेणभिराम्यताद्रिनाभुजंगोरूपवान्

वा॰र॰ ष्यात् न च प्रस्तुतस्य परमात्मनो भोक्तृतास्ति अनश्नन्नन्यो अभिचाकशीतीति श्रुत्या भोक्तृताप्रति
प्र॰ द्वि॰ षेधात् जीवात्मनस्तु भोक्तृताभिधानात् तयोरन्यः पिप्पलं स्वाद्वत्तीति तत्र यदि भोक्तृत्वमत्र
७५ तेन तत्रोक्तं संशयं जीवात्मैव प्रतिपत्तव्यः ब्रह्मक्षत्रादि वास्य कार्यकरणसंघातो भोगाय
रा तेन तस्यैवात्माद्यत्वं संभवति भोग्यं अपि तु संहर्तृता भोक्तृता ततस्त्वपाणेभ्य अग्निर्जीवपर ।
मात्मनां प्रश्नोपन्यासोपलब्धेः संहर्तृत्वस्याविशेषात् भवति संशयः किमत्ताग्निराहोस्विज्जीव
उताहो परमात्मेति अत्रौदनस्य भोग्यत्वेन लोके प्रसिद्धं भोक्तृत्वमेव प्रथमं बुद्धौ विपरिवर्तते
चरमं तु संहर्तृत्वमिति भोक्तैवात्ता तथा च जीव एव न जायते म्रियते इति च तस्यैव स्तुतिः संहा
75 रकालेपि संस्कारमात्रेणैतस्यावस्थानात् उत्तीर्णत्वे च तस्य सत्त्वात् तस्माज्जीव एवात्तेहो
पास्य इति प्राप्ते यदि तु संहर्तृत्वमत्तृत्वं तथाप्यग्निरत्ता अग्निरन्नाद इति श्रुतिप्रसिद्धिभ्यां
एवं प्राप्तेऽभिधीयते अत्तात्र परमात्मा कुतः चराचरग्रहणात् उभे यस्यौदन इति च मृत्यु
र्यस्योपसेचनं इति च श्रूयते तत्र यदि जीवस्य भोगायतनं तथा तत्साधनं तथा वा कार्यकर
णसंघातः स्थितो न तस्यौदनः न ह्योदनो भोगायतनं नापि भोगसाधनमपि तु भोग्यः न उ॰
च भोगायतनस्य भोगसाधनस्य वा भोग्यत्वं संभवति न चात्र मृत्युरुपसेचनं तथा कल्पते न ७५
च जीवस्य कार्यकरणसंघातो ब्रह्मक्षत्रादिरूपो भक्ष्यः कस्यचित् क्रूरसत्त्वस्य व्याघ्रादेः
कस्यचिद्भवेन्न तु सर्वः सर्वस्य जीवस्य तेन ब्रह्मक्षत्रविषयमपि जीवस्यात्तृत्वं न व्याप्नोति कि

रा

प्रतिपादनपरत्वात् वेदान्तानां द्वैतग्राहिणश्च मानान्तरस्याभावात् तद्बाधनाच्च तेनाद्वैतमेव पर
मार्थः तथा चानुपपन्नेत्यत्र शारीरदुःखाद्युपभोगस्तादर्थ्यमित्यर्थः परिहरति सत्यमेवं तत्र पर एवात्मा
देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्यते अनाद्यविद्यावच्छेद
लब्धजीवभावः पर एवात्मा स्वतोऽभेदेनावभासते तादृशानां च जीवानामविद्या ननु निरु
पाधिनो ब्रह्मण एव न चाविद्यायां सत्यां जीवात्मविभागः सति च जीवात्मविभागे तदाश्रयाविद्ये
त्यन्योन्याश्रयमिति सांप्रतं अनादित्वेन जीवाविद्ययोर्बीजांकुरवदनवक्लृप्तेरयोगात् न च सर्व
ज्ञस्य सर्वशक्तेश्च स्वतन्त्र- कुतोऽस्मात् संसारिता यो हि परतन्त्रः सोऽन्येन बंधनागारे प्रवेश्यते न
तु स्वतन्त्र इति वाच्यं नहि तद्रागादस्य जीवस्य संभवति ततो बंधनागारवेशिता येनानुपपद्येत किं
त्वियमनादिः पूर्वपूर्वकर्माविद्यासंस्कारनिबंधनानुयोगमर्हतीति न चैतावता ईश्वरस्या।
नीशता नह्युपकरणाद्यपेक्षिता कर्तुः स्वातंत्र्यं विहंति तस्माद्यत्किंचिदेतदपीति विशे
षादिति व्यक्तव्यविशेषोपाधिविधानमात्रमिति कंचिद्विशेषं प्रतिपादयितुं तथाप्यविद्याकल्पितः
सुखादिसंभोगोऽप्यविद्यात्मन एव जीवस्य युज्यते नतु निर्मुक्तनिखिलाविद्यानन्दात्मनस्सु
द्धबुद्धस्वभावस्य परमात्मन इत्यर्थः सोपमतिरोहितार्थं अत्ता चराचरग्रहणात् कठवल्ली
ष्वपठ्यते यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स इति अ
त्र चादनीयौदनोपसेचनसूचितः कश्चिदत्ता प्रतीयते अत्तृत्वं च भोक्तृता वा संहर्तृता वा।

वाच॰ लक्षणं हि कर्तृत्वं तच्च पानं प्रति पापयितुरप्यस्तीति सोपि कर्त्ता अतएवाहुः यः कारयति स करोत्येवे-
प्र॰द्वि॰ ति एवं करणस्यापि स्वातंत्र्यविवक्षया कथंचित्कर्तृत्वं यथा काष्ठानि पचन्तीति तस्मान्मुख्यत्वेप्य-
७६ विरोध इति तदेवं संशयं समाधाय पूर्वपक्षं गृह्णाति बुद्धिक्षेत्रज्ञाविति नियतधारत्वाद्बुद्धि-
४ जीवसंभविनी नहि लोके शाखाकल्पमपि तु प्रकाशसर्वगो परमात्मनि न चापि पिबन्ताविति वत्प्रविष्टप-
दमपि लाक्षणिकं प्रयुक्तं सति मुख्यार्थत्वे लाक्षणिकार्थोपयोगात् बुद्धिजीवयोश्च गुहाप्रवेशो-
पपत्तेः अपि च सुकृतस्य लोक इति सुकृतलोकवर्त्तित्वस्यानेन कर्मगोचरानतिक्रम उक्तः बु-
द्धिजीवौ च कर्मगोचरमनतिक्रान्तौ मनतिक्रान्तौ जीवो हि भोक्तृतया बुद्धिश्च भोगसाधनतया
76 धर्मस्य गोचरौ स्थितौ न तु ब्रह्म तस्मात्तदापन्नत्वात् किं च छायातपाविति तमःप्रकाशावुक्तौ
न च जीवः परमात्मनो भिन्नस्तमःप्रकाशरूपत्वात् बुद्धिस्तु जड इति तत्पानम इति शावकोपदेशं तस्मा-
द्बुद्धिजीवावेवात्र कथ्येते तत्रापि प्रेते विचिकित्सापनुत्तये बुद्धेर्भेदेन परलोकी जीवो दर्शितो
य इति बुद्धिरुच्यते एवं प्राप्तेऽभिधीयते ऋतपानेन जीवात्मनि निश्चितेऽस्य द्वितीयतया ब्रह्मणै-
व सरूपेणान्तर्बुद्ध्याविरूपया प्रथमं सद्वितीयतया ब्रह्मण एवावगते सति गुहाप्रपन्नं चरमं व्या- उ॰
ख्येयमविरोधतः गोः सद्वितीयेत्युक्ते सजातीयेनैव गवान्तरेणावगम्यते न तु विजातीयेना- ७६
श्वादिना तदिह चेतनो जीवः स्वरूपेण चेतनान्तरेणैव ब्रह्मणा सद्वितीयः प्रतीयते न त्वचेत-
नया विरूपया बुद्ध्या तदेवमृतं पिबन्ताविति प्रथममवगते ब्रह्मणि तदनुरोधेन चरमं गु-

४

मंत्रोर्मृत्यूपसेचनश्चान्नं चराचरं न चौदनपदात् प्रथमावगतभोग्यत्वानुरोधेन यथासंभवमत्
त्वं योत्पन्न इति युक्तं न ह्योदनपदं श्रुत्याभोग्यमाह किंतु लक्षणापानत्वाद्धाणिकत्वानुरोधे
न मृत्युसर्गस्योपसेचनमिति च ब्रह्मक्षत्रे चेति च श्रुती संकोचमर्हतः न च ब्रह्मक्षत्रे एवात्र विव
क्षिते मृत्यूपसेचनेन प्राणभृन्मात्रोपस्थापनात् प्राणिषु प्राधान्येन च ब्रह्मक्षत्रोपन्या
सस्योपपत्तेः अत्यनिवृत्तेरप्यावृत्वात् अनर्थत्वाच्च तथा च चराचरसंहर्तृत्वं परमात्मन एव
वनाग्नेर्नापि जीवस्य तथा च न जायते म्रियते वा विपश्चिदिति ब्रह्मणः प्रकृतस्य न हानं भवि
ष्यति कठवल्लीवेदपाठस्मरतिवत् दर्शनेनोपपत्स्यते जीवस्य तु सर्वलोकप्रसिद्धस्य न दर्शन
ता तस्मादत्ता परमात्मैवेति सिद्धं गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् संशयमाह तत्रेति ।
पूर्वपक्षप्रयोजनमाह यदि बुद्धिजीवाविति सिद्धांतप्रयोजनमाह अथ जीवपरमात्माना
विति श्रोत्रमार्गिकस्य सम्यग्ज्ञानवत्वात् पूर्वसिद्धांतपक्षासंभवेन पक्षांतरं कल्पयिष्यत इति
मन्वानः संशयमाक्षिपति अत्राह द्वेनेति ऋतं चैवं सत्यमवश्यंभावीति यावत् समाधत्ते
अत्रोच्यत इति अथ यथान्माधिकाराद्गोतात्मानावशक्यावकल्पयितुं तदिह बुद्धेश्चैतन्ये
न परमात्मनश्च भोक्तृत्वनिषेधेन जीवात्मैवैकः पाता परिशिष्यत इति सृष्टीकृपदधाती
तिवत् द्विवचनानुरोधादपि वक्तव्यः एतावतार्थस्यापि वक्तव्यो लक्षपतस्वार्थमजहत उत्तरेत
रस्य तु सोऽपि वदपिवत्परो भवतीत्यर्थः अत्तत्वावागुण्याएवतथापि न दोष इत्याह पक्ष इति स्वातंत्र्य

वाच॰ करोतीत्येतावतैवविद्योपसंहाराज्जीवस्यब्रह्मात्मपरत्वात्पूर्वलत्वमतउत्पाहतावत्ताचेति चोद
प्र॰ टि॰ यति कथंपुनरित्ति परिहरति उच्यते तेन पश्यतीति इति अनश्नन्जीवोब्रह्माभिचाकशीतीति
११ सूक्तेकेन यदि जीवोब्रह्मात्मानानश्नन्तिकथंतस्मिन्भोक्तृत्वावगमः चैतन्यसमाना
५ धिकरणंहिभोक्तृत्वमवभासतइति तन्निरासायाहश्रुतिः तयोरन्यः पिप्पलंस्वाद्वत्तीति
एतदुक्तंभवति नेदंभोक्तृत्वंजीवस्यतत्त्वतोऽपितुबुद्धिसत्त्वस्याविद्यारूपपरिणतंचेति
छायापत्त्याउपपन्नंचैतन्यमिवभुंक्ते नततत्त्वतोजीवः परमात्माभुंक्ते तदेतदध्यासभा
ष्यकृतव्याख्यानं तदनेनकृतार्थितोक्तादिनाश्रुत्यन्तरउपपन्ने: नन्वत्रस्तद्रमोयदेषादिमनेनैतज्ञ
77 नार्थं संनिवेत्वब्राण्यमृतत्वादयोब्रह्मधर्माः प्रतिबिंबजीवदेवतास्वसंभविन तस्मात्ब्रह्म
धर्मोपदेशात्ब्रह्मैवात्रविवक्षितं साक्षाद्ब्रह्मणोह्युपादानात्उच्यते एषदृश्यतउत्येतस्य
सत्त्वेऽपिप्रयुज्यतेपरोऽक्षंब्रह्मणएतयाप्रतिबिंबेतुप्रयुज्यते उपक्रमवशात्पूर्वमितरस्योपवर्णनंकृ
तंन्यायेनयेनैवसर्वत्वानुप्रयुज्यते ऋतंपिबंताविमत्रहिजीवपरमात्मानौप्रथममवगता
वितितदनुरोधेनगुहाप्रवेशादयः पश्चादवगताव्याख्याताः तद्वदिहापियएषोऽक्षिणिपुरु उ॰
षोदृश्यतइतिप्रथमंतस्याभिधानात्प्रथममवगतेश्छायापुरुषेतदनुरोधेनामृतत्वाभयत्वा ११
दयः स्तुत्याकृपचित्व्याख्येयाः तत्रचामृतत्वंकतिपयक्षणावस्थानात् अभयत्वमचेतनत्वा
त् पुरुषत्वंपुरुषाकारत्वात् आत्मत्वंकनीनिकाव्यापनात् ब्रह्मरूपत्वमुक्तरूपामृतत्वा। ५

हाश्रयत्वं शालग्रामे हरिरितिवत् व्याख्येयं वक्ष्यते हि गुहाश्रयत्वं ब्रह्मणः श्रुतप्रकाशकृः तदिदम् ।
न्ते तद्दर्शनादिति तस्य ब्रह्मणो गुहाश्रयत्वस्य श्रुतिषु दर्शनादिति एवं च प्रथमागतब्रह्मानु
रोधेन सुकृतलोकवर्त्तित्वमपि तस्य लक्षणया छत्रिन्यायेन गमयितव्यं ऋतपातृत्वमपि जी
वस्याविद्याश्रयत्वाद् ब्रह्मणश्च शुद्धप्रकाशस्वभावस्य तदनाश्रयतया पायितव्यं इममेवन्यायं
द्वासुपर्णेत्यत्राप्युदाहरणीकृत्वा चिंतया योजयति एष एव न्याय इति अत्रापि किं बुद्धिजी
वा उत जीवपरमात्मानाविति संशय्य करणरूपाया अपि बुद्धेरेधांसि पचंतीतिवत् कर्त्तृत्वोप
चारात् बुद्धिजीवाविह पूर्वपक्षयित्वा सिद्धान्तयितव्यं सिद्धान्तश्च भाष्यकृता स्फोरितः तद्द
र्शनादिति च समानेऽपि वृक्षे पुरुषो निमग्न इत्यत्र मंत्रे चेतनावल्लभ्यकर्त्तृत्वसंभवति करणेक
र्तृत्वोपचारायोगात् इति कृत्वा चिंतामनुद्घाटयति अपर आहेति सत्त्वबुद्धिः शंकते सत्त्वश
ब्द इति सिद्धान्तार्थब्राह्मणं व्याचष्ट इत्यर्थः निराकरोति तन्नेति येन स्वप्नं पश्यतीति येने
ति कारणमुपदिशति ततश्च भिन्नं कर्त्तारं देहे तं योऽयं शारीर उपद्रष्टेति अस्तु तर्हि सा
धिकरणस्य पूर्वपक्ष एव ब्राह्मणार्थः न च न विरोधो न्यायस्याभासत्वादित्यत आह ना
द्यस्य पूर्वपक्षं भजत इति एवं हि पूर्वपक्षमस्य भजेत यदि हि तेन तत्संसारिणि पर्य
वस्येत् तस्य तु ब्रह्मरूपतायां पर्यवसानं पूर्वपक्षमपि स्वीकरोतीत्यर्थः अपि च तावेतौ
सत्त्वक्षेत्रज्ञौ न ह वा एवंविदि किंचन रज आध्वंसत इति रजोविद्याऽनाध्वंसनमेवंविदि

वाच॰ तइति तमपहरतिश्रुतिः यद्यप्यस्मिन् सर्पिर्वोदकं वासिंचति वर्त्मनी एव गच्छतीति वर्त्मनी पक्ष्म
प्र॰द्वि॰ स्थाने एतदुक्तं भवति निर्लेपस्येश्वरस्य निर्लेपं चक्षुरेव स्थानमनुरूपमिति तदिदमुक्तं तथापरमे।
७८ श्वरानुरूपमिति संयद्वामादिगुणोपदेशाश्च तस्मिन् ब्रह्मणि कल्प्यते घटते समवेतार्थत्वात् प्रति
६ बिंबादिषु तु असमवेतार्थः वननीयानि संभजनीयानि शोभनानि पुण्यफलानि वामानि संयन्ति संग
च्छमानानि वामान्यनेनेति संयद्वामः परमात्मा तत्कारणत्वात् पुण्यफलोत्पत्तेः तेन पुण्यफला
नि संगच्छंते स एव पुण्यफलानि वामानि नयति लोकमिति वामनीः एष उ एव भामनीः भामा
नि भानानि नयति लोकमिति भामनीः तदुक्तं तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं वि
78 भातीति स्थानादिव्यपदेशाच्च आशंकोत्तरमिदं सूत्रं प्राणंकामाह कथंपुनर्विति स्थानित्वं हि
स्थानं महदुःखपापपादसामर्थ्यः तत्कथममस्य चक्षुरधिष्ठानं परमात्मनः परममहत इति शं
कार्थः परिहरति अत उच्यत इति स्थानान्यादयो येषां ते स्थानादयः नामरूपप्रकाराः तेषां व्यप
देशात् सर्वगतस्यैकस्थाननियमेनावकल्प्यते न तु नानास्थानत्वेन नभसउवनानासूचीपाशादि
स्थानत्वं विशेषतस्तु ब्रह्मणस्तानि उपासनास्थानानीति तैरस्य युक्तो व्यपदेशः अपि च प्रकृत उं॰
त्वसभादपि ब्रह्मैवात्र प्रत्येतव्यं न तु प्रतिबिंबजीवदेवता इत्याह सूत्रकारः सुखविशिष्टाभिधा ७८
नादेव च एवं खलु उपाख्यायते उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमु ६
वास तस्य ह द्वादश वर्षाण्यग्नीन् परिचचार तस्य आचार्यो अन्यान् ब्रह्मचारिणः स्वाध्यायं

दित्योगात् एवं वामनीत्वादयोऽप्यस्मिन्नेवकथंचिन्नेतव्याः कं च खं चेत्यादि तु वाक्यमग्नीनां ना
चार्यवाक्यं नियंतुमर्हति आचार्यस्तु ते गतिं वक्तेत्यगतिमात्रताभिप्रायं नत्वज्ञपरिशिष्टाभिप्रायं त
स्मादक्ष्याधारः एवान्यो वा स्यादिति पूर्वपक्षः संभवमात्रेणात्र जीवदेवतयोरुपन्यस्तो बाधकं तत्रोप
दर्शनाय च एष दृश्यत इत्यप्यत्राभावात् श्रुतस्तूर्ध्वोपदेशादित्यनेन निराकृतत्वात् एवं प्राप्ते
उच्यते य एष इति अनिर्दिष्टाभिधाने हि सर्वनामपदे सतीप्रायस्य संनिहितस्यार्थस्य भवेत्तामभिधानं
यी संनिहिताश्च प्रकरणान्मादित्यादौ लोचनपावत्वात्सर्वमभिदधातितावत्सर्वनामभ्यां नार्थस्तु योऽप्य
भिधीयत इति कुतस्तद्दर्शयन्नापरोक्षता प्रकरणान्मस्य शब्दो न सर्वनामनिरपेक्षो यस्य सतो जीवो वा पर
मात्मनि वा वर्तत इति न च तयोरक्षत्वपि प्रत्यक्षदर्शनमिति निरपेक्षप्रकरणपदस्थापितार्थानु
रोधेन य एष इति च दृश्यत इति यथासंभवं व्याख्येयं व्याख्यातं च सिद्धवदुपादानं शास्त्राद्यपेक्षं
विद्वद्दृष्टप्रयोजनार्थमित्यनेन विद्युपः पाठात्तदुपलब्धिरेव हृदतया प्रमत्तवदुपवर्ण्यते प्र
शंसार्थमिति मर्षः अपि च तदेव अक्षरं संप्रपद्यमानमनुगुणं तपाणीयते पत्रैतच्छाकं अस्य च उक्तममृतत्वा
दयोऽपि तद्वत् अक्षाणामयात्मनेतं नहि स्वमनाद्वाणवस्थानमात्रममृतत्वं भवति तथा सतीति किं नाममना
मृतं स्यादिति तार्थममृतपदमभयाभयेऽपि चेतनधर्मो नाचेतने संभवतः एवं वामनीत्वादयोऽप्यम
न्यत्रासंभवेन तु यथायोग्याः प्रसक्तव्यपदेशाश्चोपपादितः तदिदमुक्तमुपपत्तेरिति एतदमृतमभ
यमेतद्ब्रह्मेत्येवमादिशंका ननु सर्वगतस्येश्वरस्य कस्मात् विशेषेण चक्षुरेव स्थानमुपदिश्य

वाच॰ प्र॰ द्वि॰ ७९ काम्यामिति श्रुतिः स्यात् नचैतद्दृष्टं लौकिकप्रमाणप्रमाणसाधनपारतंत्र्यं ह्यपि स्मृतावामयस्तेन स
हवर्त्तत इति साम्यप्रस्तावे तदेवं व्यतिरेके दोषमुक्त्वा उभयथापि येयुत्तमाह उत्तरे तत्र विशेषितो वि
ति तदर्थयोर्विशेषितत्वाशङ्कावपि विशेषितात्तु च्यते सावधारणत्वं समानाधिकरण्ये हि विंशद्वाभू
१ ताकाशमर्थं परित्यज्य ब्रह्मणि गौणप्रयोगेन वर्त्तेते तादृशा वाक्येन खं विशेष्यमाणं सामर्थ्यात्
व्यावृत्तं निरामयं भवति तस्मादुपपन्नमुभयोपादानं ब्रह्मणश्चाध्यासस्य प्रयोजनमाह तत्र
द्वितीय इति ब्रह्मपदं कंपदस्योपरि प्रयुज्यमानं शिरः एवं खंपदस्यापि ब्रह्मपदं शिरो ययोः कं
खंपदयोः ते ब्रह्मशिरसी तयोर्भावो ब्रह्मशिरस्त्वं प्रस्तुतप्रस्तुते किमायातमित्यत आह तदेवंता
वतोपक्रम इति नत्वग्निभिः पूर्वं निर्दिष्टयता ब्रह्म पत्यर्थोद्दिष्टो ल्यायाचार्यवाक्ये पितदेवानुवर्तनी
यमिति तत्र तदस्मत आह आचार्यस्तु ते गतिं वक्तेति च गतिमात्राभिधानमिति यद्यप्येते भिन्न
वक्तृकाण्यौ वाक्ये तथापि पूर्वेणैव त्राएकवाक्यतां गमिते गतिमात्राभिधानात् किमुक्तं भवति
तेभ्यः ब्रह्मविद्यास्माभि रुपदिष्टा तद्विदस्तु गतिर्नोक्ता तां च किं विदधिकमाध्येयं पूरयिताचा
चार्यो वक्ष्यतीति तदनेन पूर्वोमवद्धार्यते तयोर्विवक्षावारितेति अथैवमग्निभिरुपदिष्टे प्रोषित आ उ॰ ७५
चार्यः कालेनाजगाम आगतं तु वै स्योपकोसलमुवाच ब्रह्मविद इव ते मुखं प्रसन्नं भाति को नु त्वा
मनुशशासेति उपकोसलस्त्वज्ञोऽग्निभीतस्त्वं कोनु मामनुशिष्यात् भगवन् प्रोषिते त्वयी त्यापातो
ऽयथा पनिर्वध्यमानो यथावदग्नीनामनुशासनमवोचत् तदुपश्रुत्य चाचार्यः स्वचिरं किंचिदुप १

ग्राह पिता समावर्त्तयामास तमेवैकमुपकोशलं समावर्त्तं प्रति प्रजायाया च तत्समावर्त्तनाप्राप्य

र्थितोपि तद्वचनमवधीर्य आचार्यः प्रोषितवान् ततोऽतिदूनमानसमग्निपरिचरणकृशम्।

तमुपकोसलमुपेत्य त्रयोऽग्नयः परिचरणपराधीनचेतसः श्रद्दधानायास्मै हृष्टभक्ताय सम

मेत्य ब्रह्मविद्यामूचिरे प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति अथोपकोसल उवाच विजानाम्यहं प्राणो

ब्रह्मेति सहिम्न आत्मा विभूतिमत्तया ब्रह्मरूपाविर्भावात् ब्रह्मेति किं तु कं च खं च ब्रह्मेत्येतन्न वि

जानामि न हि विषयेन्द्रियसंपर्कजं सुखमनित्यं लोकसिद्धं खं च भूताकाशमचेतनं ब्रह्म भ।

वितुमर्हतीति अथैनमग्नयः प्रत्यूचुः यद्वाव कं तदेव खं तदेकमिति एवं संभूयोक्ता प्रत्येकं

च स्वविषयां विद्यामूचुः पृथिव्यग्निरन्नमादित्य इत्यादिना पुनस्त एनं संभूयोचुः एवं संभू

योक्ता प्रत्येकं च स्वविषयां विद्यामूचुः पृथिव्यग्निरन्नमादित्य इत्यादिना पुनस्त एनं संभूयोचुः

एषा सोम्य तेऽस्मद्विद्या प्रत्येकमुक्ता स्वविषया विद्या आत्मविद्या चास्माभिः संभूय पूर्वमुक्ता

प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति आचार्यस्तु ते गतिं वक्ता ब्रह्मविद्येयमस्माभिर्गतिमात्रं

तु प्रवर्षिष्यतेनोक्तं न तु विद्याफलप्राप्तये जाबालस्त्वाचार्यो वक्ष्यतीत्युक्त्वा अग्नय उपरेमिरे

एवं विवक्षिते यद्वाव कं तदेव खं यदेव खं तदेव कमित्येतद्व्याचष्टे भाष्यकारः तत्र खं पाष्टु

ति प्रतीकाभिप्रायेणेति अग्रेयं तत्र प्रथमपक्षाश्रयां तत्र लोपः प्रतीकः यथा ब्रह्मशब्दः पर

मात्मविषयो नामादिषु प्रयुज्यते इदमेव ततब्रह्मत्वेयं पनामेति तपदमेव तद्ब्रह्मपद्भूता

वाच. प्र. द्वि. ८० ८ ण्याच स्मृतिः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदं तस्मै
नोपाख्यानव्याख्यानेन श्रुतोपनिषत्कगत्यभिधानाच्चेममपि संव्याख्यातं अनवस्थितेरसंभ
वाच्च नेतरः यच्चोक्तं छायात्मेति निमेषवत् श्रुतं अनिमेषच्छायापुरुषेणावकल्पते कल्पनागौर
वं चास्मिन् पक्षे प्रसज्येत उपास्यत्वेन च समुपासनकाल इति तथा विज्ञानात्मनोपीति विज्ञा
नात्मनो हि न प्रदेशे उपासनाऽऽम्नायते दृष्टचरी ब्रह्मणस्तु तत्र तत्र श्रुत पूर्वेत्यर्थः भीषाभि
मानाद्ब्रह्मणः शेषमतिरोहितार्थं अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् स्वक
र्मोपार्जितं देहं तेनान्यच्च नियच्छतीति तत्तादृशशरीरस्तु नात्मान्तर्यामितां भजेत् प्रवृत्तिनिवृ
त्तिलक्षणं हि कार्यं चेतनस्य सशरीरस्य शरीरेन्द्रियादौ वाऽशरीरेण वा वास्यादौ दृष्टं नाश
रीरस्य ब्रह्मणो भवितुमर्हति न हि ज्ञानवटांकुरः कुटजबीजाज्जायते तदनेन जन्मा।
यमत उक्तमेतदप्यपास्तं वेदितव्यं तस्मात्परमात्मनः शरीरेन्द्रियादिरहितस्यान्तर्यामि
तायाः असंभवात् प्रधानस्य वा पृथिव्याद्यभिमानवत्या वा देवताया अणिमाद्यैश्वर्ययो
गिनो योगिनो वा जीवात्मनो वान्तर्यामितास्मात् तत्र यद्यपि प्रधानस्यादृष्टत्वाश्रुत उ.
त्वामतत्वाविज्ञाततत्वानि संति तथापि तस्याचेतनस्य द्रष्टृत्वश्रोतृत्वविज्ञातृत्वानाश्रुता ८०
नामभावात् अनात्मत्वाच्चैष त आत्मेति श्रुतेरनुपपत्तेः न प्रधानस्यान्तर्यामिता पृथ्व्य ८
पिपृथिव्याद्यभिमानिनो देवस्यात्मत्वमस्ति अदृष्टत्वादयस्त्वस्य द्रष्टृत्वादिभिरुपपद्य

कोमलं समुपपन्नानदृष्ट्वा ईदृशः प्रत्युवाच सोम्य किल तुभ्यमग्नयो न ब्रह्म साकल्येनावोचन् तदहं
तुभ्यं साकल्येन वक्ष्यामि यदनुभावमाहात्म्यात् यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवं
विदि पापं कर्म न श्लिष्यत इति एवमुक्तवन्तमाचार्यम् आहोपकोसलः ब्रवीतु मे भगवानिति त
स्मै स होवाचाचार्योऽर्चिरादिकां गतिं वक्तुमनाः य एतेऽग्निभिः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति
तस्यापि श्रवणप्राय एषोऽक्षिणि पुरुषो दृश्यत इत्यादि एतदुक्तं भवत्याचार्येण येयं त्वं
ब्रह्मादित्यस्थानं संयद्वाम वामनी भामनीत्येवं गुणकं प्राणसहितमुपासते ते सर्वेऽप्यपहत।
पाप्मानोऽन्यत्कर्म कुर्वन्तु मा वा कार्षुः अर्चिरभिमानिनीं देवतामभिसंभवन्ति प्रति
पद्यन्ते अर्चिषोऽहः अहर्देवतां प्रतिपद्यन्ते अह्न आपूर्यमाणपक्षं शुक्लपक्षदेवतां ततः
षण्मासान् येषु मासेषु उदङ्ङादित्य एति सविता ते षण्मासा उत्तरायणं तद्देवतां प्रतिप।
द्यन्ते तेभ्यो मासेभ्यः संवत्सरं देवतां ततः आदित्यम् आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्र
स्थितांस्तान् पुरुषः कश्चिद्ब्रह्मलोकादवतीर्य अमानवो मानव्यां सृष्टौ भवो ब्रह्मलो।
भवति यावत् एतादृशः पुरुष एनान् सत्यलोकस्थं कार्यं ब्रह्म गमयति स एष देवपथो
देवैरर्चिरादिभिर्नेतृभिरुपलक्षित इति देवपथः स एव ब्रह्मणा गन्तव्येनोपलक्षित इति
ब्रह्मपथः एतेन पथा प्रतिपद्यमानाः सत्यलोकस्थं ब्रह्म इमं मानवं मनोः सर्गं किंभूत
आवर्तं जन्मजरामरणपौनःपुन्यमावृत्तिः तत्कर्तीयावर्तं मानवो लोकः तं नावर्तन्ते न

वाच॰ प्र॰ द्वि॰ ८२ ९ रणमनुमानाभासेनागमविरोधिनाशक्यमपह्नोतुं तथाच सर्वं विकारजातं तदविद्याशक्तिपरिणा-
मः तस्यशरीरेंद्रियादिस्थानेवर्त्तइतिमस्यापयमूपृथिव्यादिदेवतादिकार्यंकरणेस्थानेवपृथिव्या
दिदेवतादीनुपश्यक्रोतिनियंतेति नचानवस्थानहिनियंत्रंतरंतेननियम्यते किंतुयोजीवोनियंता।
लोकसिद्धः सपरमात्मैवोपाध्यवच्छेदकल्पितभेदः तथाप्यापतउभयमस्कृतावोदितं ततकुतो
नियंत्रंतरं कुतश्चानवस्था। तथाचनान्योतोस्तिद्रष्टेत्याद्याअपिश्रुतयउपपन्नार्थाः परमार्थ
तोंतर्यामिणोन्यस्यजीवात्मनोद्रष्टुरभावात् अविद्याकल्पितजीवपरमात्मभेदाश्रयास्तुना
82 नृत्तेयभेदश्रुतयः प्रमत्तादीनिप्रमाणानिसंसाराश्चभवोविधिनिषेधशास्त्राणिच एवंचाधि
देवादिष्वेकस्यैवांतर्यामिणः प्रत्यभिज्ञानं समंजसंभवति यः सर्वांल्लोकान् यः सर्वाणि
भूतानीत्यत्रयउत्त्येकवचनमुपपद्यते अमृतत्वंचपरमात्मनिसमंजसमनान्यत्र यथात्मनिति
ष्ठन्निमादावभेदेपिभेदोपचारस्त्वेकेनभविष्यतिति तस्मात्परमात्मांतर्यामीनजीवादिरितिसिद्धं
पृथिव्यादिस्तनमपितेनमधिदैवं यः सर्वेषुलोकेषिमधिलोकं यः सर्वेषुवेदेष्वितिअधिवेदं
यः सर्वेषुयज्ञेष्वधियज्ञं यः सर्वेषुभूतेष्विमधिभूतं यः प्राणेष्वात्मात्मनमध्यात्मं संज्ञापायअप्र द्वि॰
सिद्धत्वादिस्तुपक्रममात्रं पूर्वं पक्षः दर्शनादिक्रियायाः कर्त्तरिहृत्तिविरोधात्कर्त्तर्यात्मनिवृत्ति ८२
विरोधादित्यर्थः अहश्यत्वादिगुणकोधर्मोक्तेः अथपरायपयातदक्षरमधिगम्यते यत्तद
द्रेश्यंवद्धीद्रियाविषयः अयासंकर्मेद्रियागोचरः अगोत्रंकारणरहितं अवर्णंब्राह्मण ९

तेषामीशेंद्रियादियोगश्च पृथिव्येव यस्यायतनमग्निर्लोको मनो ज्योतिरित्यादिश्रुतेः तथापि तस्य प्र
तिनियतनियमनाद्यः सर्वांल्लोकानंतरो यमयति यः सर्वाणि भूतान्यंतरो यमयतीति श्रुतिविरो
धादनुपपत्तिः योगी तु यद्यपि लोकभूतवशित्वया सर्वान्लोकान्सर्वाणि च भूतानि नियंतुम
र्हतीति तत्र तत्रानेकविधदेहेंद्रियादिनिर्माणेन स एकधा भवति त्रिधा भवतीत्यादिश्रुतिभ्यः त
थापि जगत्व्यापारवर्ज्जं प्रकरणादिति वक्ष्यमाणेन न्यायेन विकारविषये विद्यासिद्धानां व्या
पाराभावात् सोऽपि नांतर्यामी तस्मात्पारिशेष्यात् जीव एव चेतनो देहेंद्रियादिमान् द्रष्टृत्वादि
योपपन्नः स्वयमहत्वपादिः स्वात्मनिवृत्तिविरोधात् मृतस्य देहनाशेऽप्यनाशात् अन्यथामुष्मिक
फललोपभोगाभावेन कृतविप्रणाशाकृताभ्यागमप्रसंगात् आत्मनिति — न्निति चाभेदेऽपि।
कथंचिद्भेदोपचारात् स भगवः कस्मिन्प्रतिष्ठितः स्वे महिम्नीतिवत् य आत्मानं वेदेति च स्वात्म
निवृत्तिविरोधाभिप्रायं यस्यात्मा शरीरमित्यादि च स्वे स्वे महिम्नीतिवद्योजनीयं यदि पुनरात्म
नोऽपि नियंतुरन्यो नियंता भवेत् वेदिता वा ततस्तस्याप्यन्य इत्यनवस्था स्यात् सर्वलोकभूतनियं
तृत्वं च जीवस्यादृष्टद्वारा तदुपार्जितौ हि धर्माधर्मौ नियच्छतः तदुत्पन्नपाद्द्वारा जीवो नियच्छतीत्ये।
कवचनं च जात्यभिप्रायं तस्मात् जीवात्मैवांतर्यामी न परमात्मेत्येवं प्राप्तेऽभिधीयते देहेंद्रि
यादिनियमेनास्य देहेंद्रियांतरं तत्कर्मोपार्जितं जगत् श्रुतिस्मृतीतिहासपुराणेषु नावद
त्र भगवतः सर्वज्ञस्य सर्वशक्तेः परमेश्वरस्य जगद्योनित्वमवगम्यते न तत्पृथक्जनसाधा

वा·च· भाष्यं साङ्ख्यप्रतिपादनपरं स्यादेतत् स्मार्तेप्रधाननिराकरणेनैव एतदपि निराकृतप्रायं तत्
ब्र·टि· कुतोस्य शंकेत्यत आह अपि च पूर्वं ब्राह्मणादीति मतिबाधकेप्रमाणानाभ्युपगमे इह तु बाधकं नाम्नो
८२ न्मर्थः तेन तदेतत्तेमायादावुपवर्णितं ब्रह्मणो जगद्योनित्वं विद्याणांकणाभ्युपगतेन इह तद्वि।
याणान्तरेवं जगद्योनित्वसंभवेनद्वारद्वारिभावो न युक्त इति प्रधानमेवात्र वाक्ये जगद्योनि
१० रुच्यत इति पूर्वपक्षः अपययोनिशब्दो निमित्तकारणपरः तथापि ब्रह्मैव निमित्तं न तु जीवात्मे
ति विनिगमनायां न हेतुरस्तीति संशयेन पूर्वपक्षः अत्रोच्यते अक्षरस्य जगद्योनिभावमु
क्वासन्नतरं यः सर्वज्ञ इति श्रुत्या सर्वस्य सङ्च्यते तेन निर्देशसामान्यात् प्रत्यभिज्ञानतः स
82 हं अक्षरं सर्ववित्हि भूयोनिर्जीवेतन्न भवेत् अक्षरात्परतःपर इति इति श्रुतिस्त्वव्याकृतेमता अनु
तेपत्तस्वकार्यातित्वेनाव्याकृतमक्षरं नेहतिरोहितमिवास्ति किंचित् पत्तसारूप्याभावान्न
विद्यात्मपरिणामः प्रपंच इति अक्षराविवर्तस्तु प्रपंचो यं ब्रह्मणोपरिणामिनः अनादिवा
सनोद्भूतो न सारूप्यमपेक्षते न चावस्तुवासनासारूप्यनिबंधन एव सर्वो विभ्रम इति नियमानि
मित्तमात्रि आत्तरादपि हि कामक्रोधभयोन्मादस्वप्नादेर्मानसाद्युपचयास्तत्सारूप्यानपेक्ष ३.
त्वस्य तस्य विभ्रमस्य दर्शनात् अपि च हेत्वमतिविभ्रमेतद्भावादस्तु योगोऽनुपपत्तेः अनाद्यवि ८२
द्यातद्वासनाप्रवाहपतितत्वेनानुपोगमर्हति तस्मात्परमात्मविवर्ततया प्रपंचस्य योनि
र्भुजंग इव रज्जुविवर्ततयोनितयोनिः न तु तत्परिणामितया तस्मात्तद्धर्मसर्ववित्त्वसर्वशक्ति १०

त्वादिहीनं न केवलमिंद्रियाणामविषयः बुद्धींद्रियाणामप्यगम्यं तमंतीत्याह अचक्षुःश्रोत्रमिति बु
द्धीन्द्रियाणामुपलक्षणमेतत् अपाणिपादमिति कर्म्मेन्द्रियाणां नित्यं विभुं प्रभुं सर्वगतं सुसूक्ष्मं
दुर्विज्ञानत्वात्स्यादेतत् नित्यं सत्किं परिणामिनित्यमित्याह तदव्ययं कूटस्थनित्यमित्यर्थः
परिणामो विवर्त्तो वा सरूपस्योपलभ्यते चिदात्मना तस्य तद्रूप्यं जडात्मनो नोपपद्यते जडप्रधा
नमेवातो जगद्योनिः प्रतीयतां योनिशब्दो निमित्तं चेतनतो जीवन्निराक्रिया परिणममानस
रूपायवहि परिणामादृष्णापरयोर्भिन्नाभिन्नाला परिणामालूतातंतवः तत्स्वरूपाः तथा विवर्तो
अपि विवर्त्तमानस्वरूपाणेव न तु विरूपाः यथा रज्जुविवर्त्तो धारागादयो रज्जुसरूपाः न ज्ञानरत्ता
कुंजर इति विपर्यासति न चेह मार्थिक्ड परिणामो भवति लूतातंतवः तत्कस्य हेतोः अमंतव्य र ।
प्यात् तस्मात्प्रधानमेव जडं जडस्य जगतो योनिरिति युज्यते सविकारानप्युक्तमिति चेतदक्ष
रं यः सर्वज्ञः सर्ववित् इति चाक्षरात्परात्परस्याव्यक्तात्परतः पर इति श्रुतेः न
हि परस्मादात्मनो विकारजातमेव प्रधानाद्धि तेष्वन्यदक्षरं संभवति अतः
प्रधानात्परतः परः परमात्मा सर्ववित् भूतयोनिस्त्वक्षरं प्रधानमेव तच्चसाक्ष्याभिम
तमेवास्तु अपपत्या प्राभाणिकत्वात् अस्तु तर्हि नामरूपबीजशक्तिभूतमव्याकृतं भूतसू
क्ष्मं प्रधीपतेहि तेन कारजातमिति प्रधानं ततत्वत्तु जडमनित्यं चाप्यजडस्यनामरूपप्र
पंचस्योपादानं न युज्यते साक्ष्यात् न तत्विदात्मा नित्यो वाच्यो विकारो हिमः अचेतनानामिति

वा.च. शेषं श्रोतव्यत्वस्यैवेत्युक्तं स्यू चयति जायमानवर्गोऽप्यपतितत्वाद्यि मूर्द्धादिरूपवन्तः सति जायमा
प्र.टि. नत्वसंभवेनाकस्मात्तनककाल्पकस्यानप्रक्ते प्रकरणात्किंत्वितहि स्युयोनेः संनिधिस्य जायमाना
८३ संनिधेस्सु प्रकरणं बलीय इति जायमानपरित्यागेन विश्वयोनेरेव प्रकरणिनो रूपाभिधा
नमितिचेत् न प्रकरणिनः शरीरेन्द्रियादिरहितस्य विग्रहवत्वविरोधात् न चैतावतामूर्द्धा
११ दिश्रुतयः प्रकरणविरोधात् स्वार्थत्यागेन सर्वात्मतामात्रपरा इतियुक्तं श्रुतेरत्यंतविप्र
कृष्टार्थात् प्रकरणाद्बलीयस्त्वात् सिद्धं च प्रकरणिनोऽसंबंधे जायमानस्याप्यपतितत्व
जायमानग्रहणे कारणमुपन्यस्तमाध्यकृता तस्मात् हिरण्यगर्भ एव भगवान् प्राणात्म
ना सर्वभूतांतरः कार्यो निर्दिश्यत इति मात्रं पतततु किमिदानीं सूत्रमनन्वयमेव नेत्या
ह अस्मिन्नुपन्न इति प्रकरणात् वैश्वानरः साधारणशब्दविशेषात् प्राचीनशाल
वत्सुयज्ञेन्द्रद्युम्नजनबुडिलाः समेत्य मीमांसां चक्रुः को न आत्मा किं ब्रह्मेति आत्मेत्य
नेजीवात्मनि प्रतस्य यो माभूदित्यत उक्तं किं ब्रह्मेति ते च मीमांसमाना निश्चयमनधि
गच्छंतः केकेयराजं वैश्वानरविद्याविदमुपसेदुः उपसद्य चोचुः न आत्मानमेवेमं वै उ.
श्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीत्युपक्रम्य द्युसूर्यवाय्वाकाशवारिपृथिवी ८३
नामितिश्च यमर्प्यः वैश्वानरस्य भगवतो यो मूर्द्धा सुतेजाश्चक्षुर्विश्वरूपः सूर्यः प्राणो वायुः पृथग्वर्त्मात्मा
पृथग्वर्त्मा यस्य वायोः स पृथग्वर्त्मा स एव आत्मा स्वभावो यस्य स पृथग्वर्त्मात्मा संदेहो देहस्य मध्यमो भागः ११

नोक्तेर्लिंगात् पनदद्देशपणमित्यत्रायं सैवोपदिश्यपनेते पत्वेन न तु प्रधानं जीवात्मा उपास्यत्वेनेति
सिद्धं न केवलं लिंगात् अपि तु परा विश्वेति समाख्याबलाद् अप्येतद् एव प्रतिपत्तव्यमित्याह अपि
च द्वौ विशेषौ इति लिंगान्तरमाह कस्मिन्नु भगवद् इति भोग्याभोग्याभ्यां व्यतिरिक्ते भोक्तरि अ
वहिश्रेता जीवात्मा भोग्यविषयेभ्यो व्यतिरिक्त इति न तत् ज्ञानेन सर्वं ज्ञातं भवति समा ।
ख्यान्तरमाह अपि च सप्तत्रयं विंशं स एवं विद्या प्रतिष्ठामिति सवासे तेऽपि दृष्टापत्र रूपायश्छाद
योति सर्वं ते यान्ति इति अस्यापि न इति स्वाः अत एवाह त्काके ते पत्ररूपा रूप्यते ऽनेनेति ।
रूपं पत्रो रूपमुपाधिर्येषां ते पत्ररूपाः तत्र घोरस्यार्तितेजः कण्ठपत्रनेनोपाधिनाश्चति
कस्माद् प्रचूत इति यत्नोपाधिपत्रर्तितेजः एवं पञ्चमान्नोपि पत्नोपाधिरेव एवं पत्नोपन्नु ।
नौघान्तसंपोषाद् इति स्मरणात् तपतेऽ धात्वस्याप्तरूपाः पोष्टितिगाद्दिष्टकर्मपत्रः प
दासुपोपत्र उत्पर्षः तत्र कर्मविवरं स्वर्गाद्युवरफलत्वात् अपि पंतिषाप्नुवंति नहि दृष्टांत
दार्ष्टान्तिकयोरित्यक्षराभिप्राय विशेषणभेदव्यपदेशाभ्यां च नेतरौ विशेषणं हि द्वं व्याच
ष्टे विशिनष्टि हीति शारीरादिमुपलक्षणं प्रधानादिमपि द्रष्टव्यं भेदव्यपदेशं व्याचष्टे
तथा प्रधानादपीति एतदेतत् किमागमिकं सांख्याभिमतं प्रधानं तथा च वक्ष्यः समञ्जस
मानादिमतस्याह नात्र प्रधानं नाम किंचिदिति रूपोपन्यासाच्च तदेतत्परमतेनात्रोपस
माधानामाभ्यां व्याख्यायस्वमतेन व्याचष्टे अन्ये पुनर्[illegible]पंत इति पुनः पाठोऽपि पूर्वस्माद्धि ।

वाच· र्थेनह्यनिश्चितार्थोव्यवस्थाप्यतेनानिश्चितार्थेननिश्चितार्थःकर्मैवचब्रह्मापिसर्वस्याकारणत्वमेकमेव
प्र·टि· नचद्युमूर्द्धत्वादिकंजाठरभूताग्निदेवताजीवात्मनामन्यतमस्यापिसंभवतिनचसर्वलोकाश्रय
८४· फलभागितानचसर्वपाप्मप्रदाहइतिपारिशेष्यात्परमात्मैववैश्वानरइतिनिश्चितेकुतःपुनरि
यमाशंकाशब्दादिभ्योन्तःप्रतिष्ठानाच्चेतिचेदिति उच्यते तदेवोपक्रमानुरोधेनान्यथानीयतेयत्र
१२ तुशक्यंप्रशक्यौचवैश्वानराग्निशब्दौन्यथानेतुमितिशंकितुरभिमानः अपिचांतःप्रतिष्ठितत्वं
प्रादेशमात्रत्वंचसर्वव्यापिनोऽपरिमाणस्यचब्रह्मणःसंभवतः नचप्राणाहुत्यधिकरणतात्र
स्यत्रजाठराग्नेर्युज्यते नचगार्हपत्यादिहृदयादिता ब्रह्मणःसंभवतीतस्माद्यथायोगंजाठरभू
84 ग्निदेवताजीवानामन्यतमोवैश्वानरो नतुब्रह्म तथाचब्रह्मात्मशब्दावुपक्रमगतावप्यन्यथा
नेतव्यौ द्युमूर्द्धत्वादयश्चस्तुतिमात्रं अथवाऽग्निशरीरायादेवतायाऐश्वर्ययोगात्द्युमूर्द्धत्वा
द्यउपपद्यंतेइतिशंकितुरभि संधिः अत्रोत्तरं नकुतः तथादृष्ट्युपदेशात् अत्राचरमसमन
न्यथासिद्धं प्रथमावगतमसमंजसं यत्र नतत्रचरमस्यान्यथासिद्धिः प्रतीकोपदेशेनवात्मनोब्रह्मे
तिवत्तद्रूपाद्युपदेशेनवाऽमनोमयःप्राणशरीरोभारूपइतिवत्तदुपपत्तेः कुतस्तावद्वैश्वानरः। उ·
ग्निशब्दयोःब्रह्मवचनत्वात् नानन्यथासिद्धिः तथाचब्रह्मोपास्यप्रत्ययस्याश्रयात्तोजाठरवैश्वा ८४
नराह्वयेतेयेयाणवा जाठरवैश्वानरोपाधिनिवाब्रह्मणिउपास्यवैश्वानरधर्माणांब्रह्मधर्माणां
वसमावेशउपपद्यते असंभवादितिसूत्रावयवंव्याचष्टे यदिचेहपरमेश्वरोनविवक्ष्यतेति १२

सआकाशो बहुलः सर्वगतत्वात् वस्तिरेव रयिः आपः यतोऽद्भ्योऽन्नमन्नाच्च रयिर्धनं तस्मादापो
रयिरुक्ताः तासां च मूत्रीभूतानां वस्तिः स्थानमिति वस्तिरेव रयिरित्युक्तं पादौ पृथ्वी तत्र प्रतिष्ठाना
त् तदेवं वैश्वानरावयवेषु द्युसूर्यानिलाकाशजलावनिषु मूर्द्धचक्षुः प्राणसंदेहवस्तिपादेषु ।
एकैकस्मिन् वैश्वानरबुद्ध्या विपरीततयोपासकानां प्राचीनशालादीनां मूर्द्धपातचक्षुर्भ्रंशप्रा
णोत्क्रमणदेहशीर्णतावस्तिभेदपादश्रोषीभावरूपेणोपासनानां निंदया मूर्द्धादिसमस्तभा
वमुपदिश्याम्नायते यस्त्वेतमेवं प्रादेशमात्रमभिविमानमिति सर्वेषु लोकेषु द्युप्रभृतिषु स
र्वेषु भूतेषु स्थावरजंगमेषु सर्वेष्वात्मसु देहेंद्रियमनोबुद्धिजीवेषु अन्नमत्ति सर्वसंबंधि फल
मान्नोतीत्यर्थः अथास्य वैश्वानरोपासकस्य भोक्तुर्भोजनस्याग्निहोत्रतां संपिपादयिषयाह श्रुतिः
उर एव वेदिः वेदिसारूप्यात् लोमानि बर्हिः आस्तीर्णबर्हिःसारूप्यात् हृदयं गार्हपत्यो हृदया
नंतरं मनोऽन्वाहार्यपचनः आस्यमाहवनीयः अत्र हि तदन्नं हूयते ननु कोन आत्मा किं ब्रह्मे
त्युपक्रमे आत्मब्रह्मशब्दयोः परमात्मनि रूढत्वेन तदुपक्रान्तयोर्बुद्ध्या वैश्वानरादयः शब्दास्त
दनुरोधेन परात्मन्येव कथंचिन्नेतुं युज्यंते नतप्रथमावगतौ ब्रह्मात्मशब्दौ चरमावगतवैश्वा
नरादिपदानुरोधेनान्यथयितुं युज्येते यद्यपि च वाजसनेयिवैश्वानरविद्योपक्रमे वैश्वानरं ह
वै भगवान् संप्रति वेद तं नो ब्रूहीत्यत्र नात्मब्रह्मशब्दौ श्रूयेते तथापि तत्समानार्थच्छांदोग्यवाक्य
तदुपक्रममिति तेनानिश्चितार्थेन तद्विरोधेन वाजसनेयिवाक्यार्थो निश्चीयते निश्चिता

वाच॰ शाखाकाण्डमूलस्कंधसमुदाये प्रतिष्ठिता शाखा तन्मध्यपतिता भवतीत्यर्थः समाधानांतरमाह
प्र॰ द्वि॰ अपि चेति अंतःप्रतिष्ठितं माध्यमस्य तेन साक्षित्वलक्षणं पतितएतदुक्तं भवति वैश्वानरः परमात्मा
८४ चराचरप्रपंचस्य मध्येऽस्तीति पूर्वपक्षिणोऽनुपायमनुन्मूलपतितमिति निखिलेनैवेति विश्वात्मकत्वात् वैश्वान
रः परमात्मा विश्वेषां वाऽयं नरः तद्विकारत्वाद्विश्वप्रपंचस्य विश्वे नरा वा जीवात्मानोऽस्येत्यात्मा।
२३ नेति अभिव्यक्तेरित्याश्मरथ्यः साकल्येनानुपलंभाउपासकानामनुग्रहायानंतोपि परमे
श्वरः प्रादेशमात्रमात्मानमभिव्यनक्तीत्याह अतिमात्रस्यापीति अतिक्रांतो मात्रां परिमाणं अ।
तिमात्रः उपासकानां कृते उपासकार्थमिति यावत् व्याख्यांतरमाह प्रदेशेषु चेति संपत्तेरिति
जैमिनिः मूर्द्धानमुपक्रम्य चिबुकांतो हि कायप्रदेशः प्रादेशमात्रः तत्रैव त्रैलोक्यात्मनो वै
85 श्वानरस्यावयवान् संपादयन् प्रादेशमात्रं वैश्वानरं दर्शयति अत्रैव जाबालश्रुतिसंवादमा।
ह सूत्रकारः आमनंति चैनमस्मिन् अविमुक्तोऽविद्योपाधिकल्पितावच्छेदो जीवात्मा निस
र्वल्वविमुक्तः तस्मिन् प्रतिष्ठितः परमात्मा तादात्म्यात् अत एव श्रुतिः अनेन जीवेनात्म
नेति अविद्याकल्पितत्वभेदमाश्रित्याधाराधेयभावः वरणाभ्रूः शेषमतिरोहितार्थं ॥ उ॰
इति श्रीवाचस्पतिमिश्रविरचितशारीरकभाष्यविभागे भामत्यां प्रथमस्याध्याय ८४
स्य द्वितीयपादः २३
संवत् १८६२ मिती भाद्रपदशुद्धी १० वार शनिश्चर लिखितं नरायण भट्ट काश्मीरी

पुरुषमपि चैनमधीयत इति सूत्रावयवं व्याचष्टे यदि केवल एवेति न तत्रासोपाधितयानापि प्रती
कतयेत्यर्थः न केवलमंतः प्रतिष्ठं पुरुषमपीत्यपेरर्थः अत एव यत्पुरुष इति पुरुषमनूद्यत
वैश्वानरो विधीयते तथा सति पुरुषे वैश्वानरदृष्टिरुपदिश्यते एवं च परमेश्वरदृष्टिर्हि
जाठरे वैश्वानर इहोपदिश्यत इति भाष्यं विरुध्येत श्रुतिविरोधश्च स यो हैतमेवमग्निं वैश्वा
नरं पुरुषं पुरुषविधं पुरुषेंतः प्रतिष्ठितं वेदेति वैश्वानरस्य हि पुरुषत्ववेदनमत्रानूद्यते
न तु पुरुषस्य वैश्वानरत्ववेदनं तस्मात्स एषोग्निर्वैश्वानरो यदिति यद्यः पूर्वेण संबंधः पुरु
ष इति तत्र च पुरुषहृदये रूपदेश इति युक्तं अत एव न देवताभूतं च अत एवोक्तेभ्यः श्रुतिस्मृ
तिवर्गगतद्युमूर्धत्वादिसंबंधसर्वलोकाश्रयफलभागित्वसर्वपाप्मप्रदाहात्मब्रह्मपदोपक्र
मेभ्यो हेतुभ्य इत्यर्थः यो भानुना पृथिवीं द्यामुतेमामिति मंत्रवर्णोपि न केवलोस्य प्रकाशवि
भवमात्रस्य भूताग्नेरिममीदृशं महिमानमाह अपि तु ब्रह्मविकारतया तादृप्यादिति भावः
साक्षादप्यविरोधं जैमिनिः यत्तु कृतं मूर्धादिषु चिबुकांतेषु पुरुषावयवेषु द्युप्रभृतीन् पृ
थिवीपर्यंतान् त्रैलोक्यात्मनो वैश्वानरस्यावयवान् संपाद्य पुरुषविधत्वं कल्पितं तदभिप्रायेणे
दमुच्यते पुरुषविधं पुरुषेंतः प्रतिष्ठितं वेदेति अत्रावयवसंपत्त्या पुरुषविधत्वं कार्यकरण
समुदायरूपपुरुषावयवमूर्धादिचिबुकांतः प्रतिष्ठानाच्च पुरुषेंतः प्रतिष्ठितत्वं समुदा
यमध्यपतितत्वात्तदवयवानां समुदायिनां अत्रैव निदर्शनमाह यथा वृक्षे शाखामिति

भाम· निःसंदेहमात्मनि भवतीति श्रुतेः यदि त्वात्मशब्दाभिधेयत्वं न विद्यत इति न परितुष्यति भवत्तर्हि ।
प्र·ती· शारीरः तस्य भोक्तृत्वात् द्युप्रभृतीनामायतनत्वात् यदि पुनरस्य द्युभ्वाद्यायतनस्य सार्वज्ञ
८९ श्रुतेरत्रापि न परितुष्यसि भवतु ततो हिरण्यगर्भ एव भगवान् सर्वज्ञः सूत्रात्मा द्युभ्वाद्यायतनं त
२ स्य हि कार्यत्वेन पारवत्त्वं वामृतत्वं परब्रह्मणो भेदश्चेमादि सर्वमुपपद्यते अयमपि वायुना
वै गौतम सूत्रेणेति श्रुतिमुपन्यस्यता सूचितः तस्माद्द्युप्रभृतीनामायतनमिति प्राप्ते
ऽभिधीयते द्युभ्वाद्यायतनं परब्रह्मैव न प्रधानाव्याकृतं वा पुनः शारीरो हिरण्यगर्भाः कुतः
स्वशब्दात् आत्मशब्दादमृतत्वस्य साधनाद्वाद्यमेतता पूर्वपक्षे हि समुच्चयार्थः सेतुशब्दो हि
नेष्यते न हि मृदादिमयो मृजः पारावारमध्यवर्ती पाथसां विधारको लोकसिद्धः सेतुः प्र
86 धानं वाऽव्याकृतं वा प्राणो जीवो वा सूत्रात्मा वाभ्युपपद्यते किं तु पारवत्तामात्रपरो लाक्षणिकः
सेतुशब्दोऽभ्युपेयः सोऽस्माकं पारवत्त्वावर्जं विधारणत्वमात्रेणापि गममात्रात् स्वं पारिम
त्यं द्युभ्वाद्यायतनस्य प्रवर्त्स्यति जीवानाममृतत्वप्राप्तिसाधनत्वं वात्मज्ञानस्य पारव
त्तं च लक्षयिष्यति अमृतशब्दश्चाभावप्रधानो यथा ह्येकयोर्द्विचनैकवचने इत्यत्राद्वि उं·
त्वैकत्वे ह्येकशब्दार्थो नान्यथा ह्येकेष्विति स्यात् तदिदमुक्तं भाष्यकृता अमृतत्वसाधन ८९
त्वादिति तथा चामृतस्येति च सेतुरिति च द्युभ्वाद्यायतने उपपद्यते अत्र च स्वशब्दादि
तितत्रोच्चारितं आत्मशब्दादिति च सदायतना इति सत्शब्दादिति च ब्रह्मशब्दादिति २

श्रीगणेशाय नमः ॥ द्युभ्वाद्यायतनं स्वशब्दात् । द्युहते पतेन ब्रह्मोपदिश्यते तत्र पारवत्त्वेन सेतु
त्वात् भेदव्यपदेशात् प्रधानगतः द्युभ्वाद्यायतनं प्रकृतं नामृतं ब्रह्म किं हि चित् पारावारमध्यपाती हि
सेतुः तस्मात् मलवर्द्धियमानो नलविधारको लोके दृष्टः नतबन्धनहेतुमात्रपरः निगडादि
वदपि प्रयोगप्रसंगात् नवानवच्छिन्नं ब्रह्म सेतुभावमनुभवति नवामृतं सन् ब्रह्मामृतस्य सेतु
रिति प्रयुज्यते न च ब्रह्मणोऽन्यदमृतमस्ति यस्यायं सेतुः स्यात् न चाभेदे षष्ठ्याः प्रयोगो दृष्टपूर्वः त
दिदमत्रामृतस्यैष सेतुरिति श्रवणादिति अमृतस्येति श्रवणात् सेतुरिति श्रवणादिति यो
जना तत्रामृतस्येति श्रवणादिति विशदतया न व्याख्यातं सेतुरिति श्रवणादिति व्याचष्टे ।
पारवत्त्वादिति तथा च पारवतममृतव्यतिरिक्तं सेतावततिश्च यमाणो प्रधानं वा संसारिपरिकल्पितं भे
देन तत्रैव स्वकार्यो यदि हि तमर्यादतया पुरुषं पापादवगच्छन् भवति पारवत् भवति च द्यु ।
भ्वाद्यायतनं तत्प्रकृतित्वात् प्रकृत्यापतनतां च विकाराणां भवति चाम्नायात्मशब्दस्य स्व
भाववचनत्वात् प्रकाशप्रदीपवत् भवति तासत्ताभयपवर्गोपयोगितद्भावे प्रधानात्
विवेकेन पुरुषस्यानवधारणादपवर्गानुपपत्तेः यदि तस्मिन्प्रमाणाभावेन न यदि तत्प्रति
प्रस्तु तर्हि नामरूपबीजशक्तिभूतमव्याकृतं भूतसूक्ष्मं द्युभ्वाद्यायतनं तस्मिन् प्रामाणिके स
र्वं प्रमाणमुपपत्तेः एतदपि प्रधानोपन्यासेन सूचितं प्रपतनाच्चात् द्युसमिक्तो द्युभ्वाद्यायतन
मादि यमेन तत्तो वा पुरुषाः पुनात्वेयोऽतमसूत्रेण पंचलोकाः परमलोकः सर्वाणि च भूता

वाच. मोहश्च विषादः शोकः परं हिरण्यगर्भाख्यवरं पश्यतद्गुह्यन्तपोरको न तस्मिन्ब्रह्माणि पतदृष्टं दर्श
ब्र. सू. नं तस्मिन्नतदर्शनमिति यावत् यथा वर्मणि छिद्रेपि न हंसीति वर्मार्पणमिति गम्यते नामरूपादिप्र
८२ पित्र विद्यायभिप्रायं कामा येस्य हृदि स्थिता स्तामिताइतिकामाइत्यविद्याद्युपलक्षयति नानुमान।
मतच्छब्दात् नानुमानमित्युपलक्षणं नाव्याकृतमित्यपि द्रष्टव्यं हेतोरुभयत्रापि साम्यात् प्राण
२ भृच्च चेनातच्छब्दत्वं हेतुरनुकृष्यते स्वयं च भाष्यकृत हेतुमाह नचोपाधिपरिच्छिन्नस्येति न सम्भ
कृत्स्नं भवति नानुमानमित्यर्थः भोगपते न सापतनत्वमिति किं स्यादेतत् यदि अतच्छब्दादित्यत्रापि
हेतुरनुकृष्यो हेतोः कस्मात् उभययोगकरणं यावतान प्राणभृदनुमानेऽप्येकएव योगः कस्मान्न
87 कृतइत्यतआह पृथगिति भेदव्यपदेशादित्यादिना हि प्राणभृदेव निषिध्यते न प्रधानं तच्चैक
योगकरणेऽनुवर्तितानं स्यादिति प्रकरणात् नावत्तु हिरण्यगर्भादिषु तातेषु सर्वज्ञत्वं भवति
किं तु ब्रह्मण्येवेति स्थित्यदनाभ्यां च यदि जीवो हिरण्यगर्भो वायुर्वा यायापतनं भवेत ततः त
स्वकृतमः अनश्नन्नन्योभिचाकशीति परमात्माभिधानमाकस्मिकं प्रसज्येत न च हिरण्यगर्भादसौ
नः तस्यापि भोक्तृत्वात् न च जीवात्मेव युग्मायायापतनं तथा च स्मरणवात्रकल्प्यते तत्कपनाय च ब्रह्म उ.
पि कल्प्यते अन्यथा सिद्धेतेपि जीवात्मकथनमाकस्मिकं स्यादिति वाच्यं यतोनधिगतार्थावबोधन ८२
स्वरसेनाम्नायेन प्राणभृन्मात्रप्रसिद्धजीवात्माधिगमयोपात्तत्वात् नवगतमलौकिकं ब्रह्मावबोधि २
तदुक्तिस्वभावितं पद्यापि यम्युपनिषत्कृतेन व्याख्यानेनेति तत्रानश्नन्नन्यो अभिचाकशीति

चब्रह्मसायुज्यादिति च सूचयति सर्वे सेतोरस्य खण्डाः स्यादेतत् आयतनायतनवद्भावः सर्वं ब्रह्मेति च समा-
नाधिकरण्यं हिरण्यगर्भेप्युपपद्यते तथा च स एवात्रात्मामृतत्वसेतुः इत्याशंकां श्रुतिवाक्येन समा-
दधात्येनोत्तरमाह तत्र तावदायतनायतनवद्भावश्रवणादिति विकाररूपेन्नते निर्होकोयमभिसंधा-
नं यस्यास्पुरुषस्य स तथोक्तः भेदप्रपंचसत्यत्वमभिमन्यमान इति यावत् तस्याप्यवादोदोषः श्रूयते
मृत्योरिति सर्वं ब्रह्मेति निर्णीते यत्सर्वमविद्यारोपितं तत्तत्परमार्थतो ब्रह्म न तु यत् ब्रह्म तत्सर्वमि-
त्यर्थः अपर आहेति नात्र द्युभ्वायतनमेव सेतुतोच्यते येन पारवत्ता स्यात् किं तु ज्ञानस्येति यत्
ज्ञाने कीर्तितः अन्यवाचो विमुंचथेति वाग्विमोकः तस्यामृतत्वसाधनत्वेन सेतुतोच्यते तथा
भयमपि पारवदेव न च प्राधान्यादेष इति सर्वनाम्ना द्युभ्वाद्यायतनमात्मैव परामृश्यते न तु
तत्ज्ञानवाग्विमोचने इति साम्प्रतं वाग्विमोचनात्मज्ञानभावनयोरेव विधेयत्वेन प्राधान्या-
त् आत्मनस्तु द्रव्यस्याव्यापारतया अविधेयत्वात् विधेयस्य व्यापारस्यैव पारवत्तोऽमृतत्व।
साधनत्वात् न चेदमेकान्तिकं यतः प्रधानमेव सर्वनाम्ना परामृश्यते क्वचिदप्योगतया प्रा-
न मुक्तस्याप्युपगतया गुणोपि परामृश्यते मुक्तोपसृप्यव्यपदेशात् द्युभ्वाद्यायतनं प्रकृत्या
त्वविद्यादिदोषमुक्तैरुपसृप्यं व्यपदिश्यते भिद्यते हृदयग्रंथिरित्यादिना तेन तत् द्युभ्वाद्याय-
तनविषयमेव ब्रह्मणश्च मुक्तोपसृप्यत्वं यदा सर्वे प्रमुच्यन्त इत्यादौ श्रुत्यन्तरे प्रसिद्धं तस्मा-
न्मुक्तोपसृप्यत्वात् द्युभ्वाद्यायतनं ब्रह्मेति निश्चीयते हृदयग्रंथिपदवेद्या अविद्यारागद्वेषभयमोहाः

वाच॰ प्र॰ तृ॰ ८८ २ सनत्कुमारो यो वै भूमा तत्सुखमित्युपक्रम्य भूमानं त्वनाद्यांबभूव यत्र नान्यत्पश्यतीत्यादि
ना तदीदृक्षो विषये विचार आरभ्यते तत्र संशयः किं प्राणो भूमा स्यादुताहो परमात्मेति भावभ
विजोक्त्वा ... विवक्षया सामानाधिकरण्यं संशयबीजमुक्तं भाष्यकृता तत्र एतस्मिन्ग्रंथ
संदर्भे यद्यत्कात् भूयसो यतः उच्यमानं तु तत्तद्भूय उच्यते यथा पूर्वमुक्तं न च प्राणात् किं भूय इति पृष्ट
नापि भूमा वा स्मात् भूयानिति प्रत्युक्तं तस्मात्प्राणे भूयस्त्वाभिधानानंतरमेष्टेन भूमोच्यमानः प्रा
णस्यैव भवितुमर्हति अपि च भूमेति भावो न भवितारमंतरेणाशक्यो निरूपयितुमिति भवितारम
पेक्षमाणः प्राणस्यानंतर्येण बुद्धिसंनिधानात्तमेव भवितारं प्राप्य निर्विशतीति यस्यै भयं हविरा।
र्त्ति मार्च्छेदिमत्रात्र्तिर्विवार्त्तं हविः यथाहुः मूर्द्धपामहे हविषा विशेषणमिति न चात्मनः प्रकरण
दात्मैव बुद्धिस्थ इति तस्यैव भूमा स्यादिति युक्तं सनत्कुमारस्य नामब्रह्मेत्युपास्वेति प्रतीकोपदेश
त्वेनात्तरेण नारदप्रश्नस्यापि तद्विषयत्वेन परमात्मोपदेशप्रकरणस्यानुत्थानात् अत्र तद्विष
यत्वे च प्रश्नप्रतिप्रश्नोत्तरयोर्वैयधिकरण्येन विप्रतिपत्तेरप्रामाण्यप्रसंगात् तस्मादसति प्रकर
णे प्राणस्यानंतर्यात् तस्यैव भूमेति युक्तं तदेतत्संशयबीजं दर्शयता भाष्यकारेण सूचितं पूर्व उ॰
पक्षसाधनमिति न पुनरुक्तं न च भूयो भूयः प्रश्नात्परमात्मैव नारदेन जिज्ञासित इति युक्तं ८८
प्राणोपदेशानंतरं तस्योपरमात् तदेवं प्राण एव भूमेति स्थिते यत्र यत्र तद्विरोध्यापाततः प्रति
भाति तत्तदनुगुणतया नेयं नीतं च भाष्यकृता स्यादेतत्तदेष त्वव अतिवदतीति तच्छब्देन प्राण २

88

तिर्जीवत्वउपाधिरहितेनरूपेणाब्रह्मस्वभावउदासीनोऽभोक्तादर्शितः तदर्थमेवाचेतनस्यबुद्धिसत्व
स्यापारमार्थिकंभोक्तृत्वमुक्तंतथाचेदृग्भूतंजीवंकथयताऽनेनमंत्रवर्णेनमुख्याख्यायतेनब्र।
ह्मैवकथितंभवति उपाध्यवच्छिन्नश्चजीवः प्रतिबिंबोभवतीतितेनपैंगिब्राह्मणाविरोधइत्यर्थः
प्रपंचार्थमिति तन्मध्येनपठितमितिकृत्वाचितपदमधिकरणप्रवृत्तिमित्यर्थः भूमासंप्रसा
दादध्युपदेशात् नारदः खलुदेवर्षिः कर्मविदनात्मविन्नपाशोच्यमात्मानंमन्यमानोभगवं
तमाज्ञानसिद्धंमहायोगिनंसनत्कुमारमुपससादउपसद्यचोवाचभगवन्ननात्मज्ञताजनित
शोकसागरपारंमन्तारयतुमांभगवानिति तदुपश्रुत्यसनत्कुमारेणनामब्रह्मेत्युपास्यत्व
नोनारदेनपृष्टंकिंनाम्नोऽस्तिभूयइति तत्रसनत्कुमारस्यप्रतिवचनंवाग्वावनाम्नोभूयसी
तितदेवंनारदसनत्कुमारयोर्भूयसिप्रश्नोत्तरेवागिंद्रियमुपक्रम्यमनःसंकल्पचित्तध्यानवि
ज्ञानबलान्नतोयवायुसहिततेजोनभःस्मराशाप्राणपर्यवसिते कर्मव्याकर्तव्यविवेकःसं
कल्पः तस्यकारणंपूर्वापरविषयनिमित्तप्रयोजननिरूपणंचित्तंस्मरःस्मरणंप्राणस्यचस
मस्तक्रियाकारकफलभेदपित्राद्यात्मतेनचरथारनाभिदृष्टांतेनसर्वप्रतिष्ठात्वेनचप्राणभू
यस्त्वदर्शिनोऽतिवादित्वेनचनामादिप्रपंचाद्दशप्राणात् भूयस्त्वमुक्तोऽपृष्टएवनारदेनस
नत्कुमारएकग्रंथेनएषतुवाअतिवदतियःसत्येनातिवदतीतिसत्यादीनुक्त्वापर्यंतानु
क्तोपदिदेश सत्यंत्वेवविजिज्ञासितव्यमितितदुपश्रुत्यनारदेनसत्यंभगवोविजिज्ञासइत्युक्ते

वाच.
भू. तृ.
८९

मितं कथमिव वस्तुं निधानमात्रात्तत्स्वभावापेक्षादतिदूरवर्तिना तत्कथं विमानाणविषयत्वेन याकं व्याख्या
तं एवं च प्राणाण हर्तुं ब्रह्मणोभूमाऽवगम्यमानो न प्राणविषयो भवितुमर्हतीति किंतु सम्यण परमा
त्मन एव एवं चानात्मवेद्यात्मानं विविदिषोर्नारदस्य प्रश्ने परमात्मन एव वाक्ये व्याख्या स्वामीनाभिम
षिमान् सनत्कुमारः प्राणान्तरो हत्यभ्यायेन स्मृतानादर भूयत तत्त्वं सत्पादन क्रमेण भूमानम
तिकुर्वोनत्तत्परमसूत्तं संप्रसादपाभ्यासन च प्रश्न पूर्वतां प्रवाहपतिते नोत्तरेण सर्वेण ग्रन्थस्य
वैणाव भव्यत व्यमितिनियमो लोकाः दिग्गमेन भाष्यण व्युमादितं विताना दिसाधन परं परा
मनन यस्तु हि: प्राणं ते चातरशास नेनातकमात्रेणैव प्रकरणसमाप्तेर्न प्राणस्यान्यापतत्तोच्य
त. तदभिधाने हि सापेक्षत्वेन प्रकरणसमाप्तेतत्स्यात्रेदं प्राणकरणं अपितु पदायत्तः प्राण
स्तस्य सत्यात्मेमात्मन एव प्रकरणं यंकते प्रकरणं तन्त्वति प्राणप्रकारसमाप्ताविमर्षः निराक
रोति न सभगवत्रुति संदर्भ्यायेन हि भूम्न एतत्प्रकरणं स चेत भूमा प्राणः प्राणस्येतत्प्रक
रणं भवेत्तच्चायुक्तमित्युक्तं न केवलं श्रुतेर्भूमात्मता परमात्मनः लिंगादपीत्याह सूत्रकारः ग्रं.
धर्मोपपत्तेश्च यदपि पूर्वपक्षिणा कथं विशीतं तदनुभाष्य भाष्यकारो दूषयति योप्यसौ तुष्णु ८९
प्तावस्थायामिति सुषुप्तावस्थायामिन्द्रियासंयोगपात्मैव प्राणः परमात्मनः प्रकरणात्
अन्यदार्ते विनश्वरमित्यर्थः श्रुतिरभिहितार्थं मन्यते अक्षरमेवराजतं पृतेय्यत्तरणादूः समुदायप्र
सिद्ध्यावर्णप्रकृत्ः परमात्मनि चावयवप्रसिद्ध्यायौगिकः अवयवप्रसिद्धेश्च समुदायप्रसि

89

दर्शिनोऽतिवादित्वं व्यवच्छिद्य सत्येनातिवादिनं वदन् कथं प्राणस्य भूमानमभिदधीतेत्यत आह प्रा
णमेव वेत्तीति प्राणदर्शिनस्त्वतिवादित्वमिति नामाद्याशांतमतीत्य वदनशीलत्वमित्यर्थः एतदु
क्तं भवति नायं तत्त्वमाहुः प्राणोऽतिवादित्वात् व्यवच्छिन्नत्ति अपि तु तदतिवादित्वमपरित्यज्यैव प्र।
सक्तत्तनद्वत्तथ्यत्वस्यैव प्राणस्य सत्यस्य श्रवणमननश्रद्धादिप्रकृतिभिर्विज्ञानायनिश्चयाय सत्ये
नातिवदतीति प्राणव्रतमेवातिवादित्वमुच्यते तत्राङ्गीनामाद्यतिवादित्वाद्व्यवच्छिन्नत्ति नना
माद्याशांतवाद्यतिवादी अपि तु सत्यप्राणवाद्यतिवादीत्यर्थः अत्र चागमाचार्योपदेशाभ्यां स
म्यक्श्रवणं अथागमाविरोधिन्यायनिवेशनं मननं मत्वा च गुरुशिष्यसब्रह्मचारिभिरन
सूयुभिः सह संवाद्य तत्त्वं श्रद्धत्ते श्रद्धानंतरं च विषयांतरदोषदर्शी विरक्तः ततो व्यावृत्तः त
त्त्वध्यानाभ्यासं करोति स एष यमप्रकृतिः प्रयत्नः अथ यत्तत्त्वध्यानाभ्यासनिष्ठा भवति यदनंत
रमेव तत्त्वविज्ञानमनुभवः प्रादुर्भवति तदेतत्त्वा साक्षात्कारः भूतार्थभावनाप्रकर्षपर्य
तजं योगिज्ञानमिति भावनाप्रकर्षस्य पर्यंतो निष्ठा तस्मात् ज्ञापतेत्त्वात्तद्भवद्दतित स्मात्तत्प्रा
णएव भूमेति शास्त्रेऽभिधीयते एष तु वा अतिवदति यः सत्येनातिवदतीत्युक्तो भूमोच्यते त
त्र सत्यमाहुः परमार्थनिरूढत्वंनिश्रुत्वा परमार्थमाह परमार्थं च परमात्मैव ततो तदन्यत्स
र्वं विकारजातमनृतं कथंचिदपेक्षया कथंचित्सत्यमुच्यते तथा चैष तु वा अतिवदति यः स
त्येनातिवदतीति ब्रह्मणोऽतिवादित्वं श्रुत्वाऽन्यनिरपेक्षतया लिंगादिभ्योऽपि वलीयस्त्वावगा

वाच. प्र. त. २० प

स्मर्यते यथाहुः यत्संज्ञास्मरणं तत्र न तद्दृष्टमपहेतुकं पिं रण्वहिहेतुः स्मर्त्तं तोस्मारयितं तमः संता
हि स्मर्यमाणाणि प्रमत्तातं न बाधते संतनः स्मातटस्पार्हिनरूपाह्लादनत्तमेति न च वर्णातिरिक्तेस्फो
टात्मनि प्रमाणं लौकिके यत्तत्वपदप्रसिद्धेरस्तिलोके न चैषप्रमाणिक उत्सुपरिष्टात्प्रवेदयिष्यते निवे
दितं वास्माभिस्तत्वबिंदौ तस्मात् श्रोत्रग्राह्याणं वर्णानामेव न तद्धृतेरनुपपत्तेः समुदायप्रसिद्धि
बाधनाद्ववयवप्रसिद्ध्या परमात्मैवाक्षरमिति सिद्धं यत्तु प्रधानं पूर्वपक्षमितिनानेन हृत्रेणपरमा
त्मैवाक्षरमिति सिद्धांतयतीतेरं वर्णांतधृतेरित्यनेनकर्णं प्रधानं निराक्रियत इति वाच्यं यथान्ना
धिकरणेन मात्रे धृतिरपि न प्रशासनाधिकरणेन तथा च श्रुतिः एतस्य वा अक्षरस्य प्रशासने गार्गि
सूर्याचंद्रमसौ विधृतौ तिष्ठत इति तथा च वर्णांतधृतेरित्यनर्थकं एतावदुक्तं स्यात् अक्षरं प्रशासना
दिति एतावतैव प्रधाननिराकरणसिद्धेः तस्मादुक्तं निराक्रियैवास्यार्थः न च स्थूलादीनां
वर्णानां प्रतिषेधः स्थूलमित्यादिनिषेधानुपपत्तेर्वर्णेषु स्वैव नास्तीति वाच्यं न सर्वप्राप्तिपूर्व
का एव प्रतिषेधा भवंति अप्राप्तेष्वपि नित्यानुवादानां दर्शनात् यथा नांतरिक्षे न दिवीत्यग्निचय
न निषेधानुवादः तस्माद्यत्किंचिदेतत् सा च प्रशासनात् प्रशासनमात्राचेतनधर्मो नाचेतनेषु प्र उ. २०
धाने वाऽव्याकृते वा संभवति न च मुख्यार्थसंभवे कूलं पिपतिषतीतिवद्भाक्तत्वमुचितमिति
भावः अन्यभावव्यावृत्तेश्च अक्षरांतविधारणास्पात्वं स्यैतरसवादस्यद्रष्टृत्वाद्वा प्रधाने वाऽव्याकृते
वाऽयत्तेषामन्येषामभावोऽन्यभावस्तस्मात् व्यावर्त्तयति श्रुतिरेतद्वैतदक्षरं गार्ग्यदृष्टमादिका अनेनैव प

80

स्त्रिवेतीयमीऽइति वर्णोपवादत्वं न च वर्णैराकाशस्यैतन्नश्रोत्रतेजोपपद्यते सर्वस्यैव रूपधेयस्य नाम
धेयात्मकत्वात् सर्वं हि रूपधेयं नामधेयसंभिन्नमनुभूयते गौरयं घटोऽयमिति न चोपायत्वादस्य
भेदसंभवो न हि धूमोपायावह्निधी धूमसंभिन्नवह्निमवगाहते धूमोऽयं वह्निरिति किं तु वैयधिकर
ण्येन धूमाद्वह्निरिति भवति तन्नामधेयसंभिन्नो रूपधेयप्रत्ययोऽयमिति अपि च शास्त्रानुपाय
पि रूपधेयप्रत्ययोऽलिंगेंद्रियादिजन्मनि नामसंभेदो दृष्टः तस्मान्नामसंभिन्नाः पृथिव्यादयोऽवर्णा
त्मानस्तथापि तेषां विकाराश्च नामानि चोंकारात्मकानि तस्मात्तत्त्वात् तद्यथा शंकुना सर्वाणि पर्णानि
संतृण्णान्येवमोंकारेण सर्वा वागिति श्रुतेः अतश्चोंकारात्मकाः पृथिव्यादयोऽक्षरात्मान इति वर्ण
एवाद्वैतं न परमात्मेति एवं प्राप्तेऽभिधीयते अद्वैतं परमात्मैव न तु वर्णाः कुतः स्वरूपान्तरश्रुतेः न।
खल्वंतरांतानि पृथिव्यादीनि वर्णैर्धारयितुमर्हन्ति किं तु परमात्मैव तेषां परमात्मविकारत्वात् न
च नामधेयात्मकं रूपधेयमिति युक्तं स्वरूपभेदादुपायोपमेयदर्शिकिं गाभेदाच्च तथा हि शाब्दत्वसा
मान्यात्मकानि श्रोत्रग्राह्याणि अभिधेयप्रत्ययार्थक्रियाणि नामधेयान्यनुभूयंते रूपधेयानि तु घ
टपटत्वादिसामान्यात्मकानि चक्षुरादीन्द्रियग्राह्याणि मधुरधारणप्रावरणाद्यर्थक्रियाणि च भे
देनानुभूयंत इति कुतो नामसंभेदः न च डित्थोपमितिशब्दसामानाधिकरण्यप्रत्ययः न खलु
शब्दात्मकोऽयं पिंड इत्यनुभवः किं तु योऽनानादेशकालसंस्तुतः पिंडः सोऽयं सन्निहितदेशकाल
इत्यर्थः संकेतगृहीतसंबंधैरन्तैरभ्यासात्पिंडाभिनिवेशिन्येव संस्काराद्बोधसंपातमात्र

स्यैकं तथाप्यायतनत्वविषयत्वात्कारणस्य ध्यानस्यापि तत्त्वविषयत्वं अपि च वाक्यशेषे लोकव
कत्वसंभवेन वाक्यभेदो युज्यते संभवति च परपुरुषविषयत्वेनार्थप्रत्यभिज्ञानात्समभिव्याहारा
च्चैकवाक्यता तदनुरोधेन च परामरं ३मात्रपरादिति जीवघनविषयं द्रष्टव्यं तस्मादत्र परः पुरुषो
ध्यातव्यश्च द्रष्टव्यश्च भवति तदिदमुक्तं न वात्र जीवघनशब्देन प्रकृतोऽभिध्यातव्यः परः पुरुषः
परामृश्यते किं तर्हि जीवघनात्परात्परो यो ध्यातव्यो द्रष्टव्यश्च तमेव कथयितुं जीवघनो जीवः खि
ल्पभावमुपाधिवशादापन्नः स उच्यते सामभिरुन्नीयते ब्रह्मलोकमित्यनंतरवाक्यनिर्दिष्टो ब्रह्म
लोको वा जीवघनः स हि समस्तकरणात्मनः सूत्रात्मनो हिरण्यगर्भस्य भगवतो निवासभूमितया ।
करणपरिवृत्तानां जीवानां तत्र संघात इति भवति जीवघनः तदेवं त्रिमात्रोंकारायतनं परमेव ब्र
ह्मोपास्यं तत एव चास्य देशाविशेषाधिगतिः उपाधिमत्वात् क्रमेण च सम्यग्दर्शनोत्पत्तौ मुक्तिः ब्र।
ह्मवेद ब्रह्मैव भवतीति तु निरुपाधि ब्रह्मवेदनविषया श्रुतिः अपरं तु ब्रह्मैकमात्रायतनमुपास्य
मितिमंतव्यं दहर उत्तरेभ्यः अथ यदिदमस्मिन्ब्रह्मपुरे दहरं सूक्ष्मं गुहाशयं पुंडरीकसंनिवे
शं वेश्म दहरोऽस्मिन्नंतराकाशः तस्मिन्यदंतः तदन्वेष्टव्यं आगमाचार्योपदेशाभ्यां श्रवणं च तद
विरोधिना तर्केण मननं च तदन्वेषणं तत्पूर्वकेण चादरनैरंतर्यदीर्घकालसेवितेन ध्यानाभ्यास
परिपाकेण साक्षात्कारो विज्ञानं विशिष्टं हि तत्स्थानं पूर्वेभ्यः तदिच्छा विजिज्ञासनं अत्र संशय
माहतत्रेति तत्र प्रथमं तावदेष संशयः किं दहराकाशादन्यदेव किंचिदन्वेष्टव्यं विजिज्ञासि

सूत्रेणजीवस्याप्यदृश्यत्वादीनि सिद्धत्वाहृतत्वेति नान्यदित्यादिकयाश्रुत्याशात्मभेदः प्रतिषिध्यते तथा।
चोपाधिभेदभिन्नाजीवानिषिद्धाभवंत्यभेदाभिधानादित्यर्थः श्रुतोपिनशारीरस्यात्वरणकृतेत्याह
अचक्षुष्कमिति श्रव्यत्वरणचक्षुराद्युपाधिरहितपंतीश्रुतिरौपाधिकस्यात्वरतोनिषेधतीत्यर्थः तस्मा
दगुणप्रधानावाकृतजीवानामसंभवात् संभवाच्चपरमात्मनः परात्मैवात्वरमितिसिद्धं ईक्षतिक
र्मव्यपदेशात्सः कार्यब्रह्मजनकप्राप्तिफलत्वादप्यभेदतः दर्शनध्यानयोरैक्योपगमपरंब्रह्मगम्यतेब्र
ह्मवेदब्रह्मैवभवतीतिश्रुतेः सर्वगतपरब्रह्मवेदनेतज्ज्ञावापत्तेर्मिथ्यामभिलत्तीयतेब्रह्मलोकमि
ति नदेशविशेषप्राप्तिरुपपद्यते तस्मात्परमेवब्रह्मेहध्येयत्वेनचोद्यते नचेक्षणस्यलोका
न्तरविषयत्वेनप्रसिद्धः परस्यैवब्रह्मणोलप्याभावात् ध्यायतेश्चक्षतेन समानविषयत्वात्परब्र
ह्मविषयमेवध्यानमितिसांप्रतं समानविषयत्वस्यैवासिद्धेः यतोहि पुरुषोध्यानविषयः परा
त्परस्तुदर्शनविषयः नचतत्तद्विषयमेवसर्वत्रदर्शनं अनृतविषयस्यापितस्यदर्शनात् नचमन
नंदर्शनंतच्चतत्तद्विषयमेवेतिसांप्रतं मननात्भेदेनतत्रतत्रदर्शनस्यनिर्देशात् नचमनन
मपितत्कोपरस्याप्रमाऽवश्यंतत्त्वविषयंयथाहुः तर्कोप्रतिष्ठइति तस्मात्परमेवब्रह्मेहध्येयं।
तस्यचपरत्वंशारीरापेक्षयाइतिपूर्वपक्षप्राप्तउच्यते ईक्षणध्यानयोरैकः कार्यकारणभूतयोरर्थ
ग्रोत्सर्गिकंतत्तद्विषयत्वंतथाहितेः ध्यानस्यहिसाक्षात्कारः फलंसाक्षात्कारश्चोत्सर्गतस्तद्
विषयः क्वचित्तुबाधकोपनिपातेसमारोपितगोचरोभवेत् नचात्रस्यपवादस्याकाउत्सर्गं

वाच.
प्र.तं.
५२
१

र्ब्रह्माभिनः प्रकृतत्वान्नैनेवार्थेपेन संबद्धं सदनपेक्षं नार्थ्यंणांतरेणासंबद्धं कल्पयति नन्वत्र तथापि श।
शरीरमेवास्य भोगायतनमिति कोऽहं दहरपुंडरीकं स विशेषोपपत्तेर्देवास्य सद्मत्वमत आह मनउपाधित्व
जीवस्येति नत्वमनोऽपि चलत्वेन यामैकत्र देहहृत्पि पर्यायेणेत्यत आह मनस्त्वप्रायेणेति आकाशोपमा
हृद्याकाशरूपत्वादिना साम्यमान्येन नजीवे भान्तिः अस्तु वा भूताकाश एवायमाकाशशब्दो दहरोऽस्मिन्नंतराका
शइति तथाप्यदोषइत्याह नचात्र दहरस्याकाशस्यातेष्यानमिति एवं प्राप्तउच्यते भूताकाशस्यता
वत्दहरत्वं पावाचाप्य पमाकाशःतावाने षोंतर्हृदयआकाशइत्युपमानविरोधात् तथाहि नेतत
स्यापमेयत्वरामरावणयुद्धवत् अगत्याभेदमारोप्यगतौसमसान प्रयुज्यते अस्तितुदहराकाशस्य
ब्रह्मत्वेन भूताकाशात् भेदेनोपमानस्य गतिः नवानवच्छिन्नपरिमाणमवच्छिन्नं भवति तथासत्
वच्छेदानुपपत्तेः नभूताकाशमानत्वं ब्रह्मणोऽत्र विधीयते येनज्यायानाकाशादिति श्रुतिविरो।
धः स्यात् अपितुभूताकाशोपमानेन पुंडरीकोपाधिप्राप्तं दहरत्वं निवर्त्यते अपिचसर्व एवात्र
देहेनवो दहराकाशस्य भूताकाशत्वं व्याप्तेधृती स्याह नचकल्पितभेदइतिनापि दहराकाशो जी
वइत्याह यस्यात्मनइति उपलब्धेरधिष्ठानं ब्रह्मणो देहइष्यते तेनासाधारणत्वेन देहो ई.
ब्रह्मपुरं भवेत् देहेहि ब्रह्मउपलभ्यते इत्यसाधारणतया देहो ब्रह्मपुरमिति व्यपदिश्यते न ५२
तु ब्रह्मविकारतयानतथा च ब्रह्मणो दहरत्वं व्याप्यो भवति अस्तु वा ब्रह्मपुरं जीवपुरं ब्रह्मपुरं तथा.
पियथाव राजन्यस्य पुरे उत्तपन्नामैत्रस्य सद्म भवति एवं जीवस्य पुरे हृत्पुंडरीकं ब्रह्मसदनं

तत्रांच उक्तदहराकाशइति यद्यपिदहराकाशोवेदवाक्ये तथापिकिंभूताकाशः आहोशारीरस्थात्माकिंवा
परमात्मेति संशयपदेवं एवेति कुतइति तद्धेतुमाह आकाशब्रह्मपुरशब्दाभ्यामिति तत्रप्रथमंतावत्
तभूताकाशएवदहरइति पूर्वपक्षयतितत्राकाशशब्दस्यभूताकाशेरूढत्वादिति एवंतत्रवक्तृतरो
त्तरसंदर्भविरोधात् तच्च पूर्वपक्षस्यपरितोषेणपक्षांतरमालंबते पूर्वपक्षी अथवाजीवोद
हरइति प्रश्नपूर्वकमित्यर्थः तत्रप्रथमपक्षात् हि दोषोब्रह्मपुरंजीवस्य पुण्यतोदेहोनब्रह्मणोयुक्तो।
हेतुद्वयविपर्ययात् असाधारणेनहिव्यपदेशाभवंति तद्यथाक्षितिजलपवनबीजादिसामग्री
समवधानजन्माप्यंकुरः शालिबीजेनव्यपदिश्यते शाल्यंकुरइतिनतुक्षित्यादिभिः तथाकार्या
तरेष्वपि साधारणत्वात् तदिहशरीरं ब्रह्मविकारोपि ब्रह्मणोव्यपदेष्टुंब्रह्मणः सर्वविकारण
तेनातिसाधारणत्वात् जीवभेदधर्माधर्मोपार्जितं तदितिअसाधारणकारणत्वात् जीवेनव्यपदिश्य
तइतिपूर्वं अपिच अपिचब्रह्मपुरइति सप्तम्यधिकरणेसमर्थिते तेनाधेयेनानेन संबद्धं नच
ब्रह्मणः स्वमहिम्निव्यवस्थितस्यानाधेयस्याधारसंबंधः कल्पते जीवस्त्वाराग्रमात्रएवइत्या
धेयोभवति तस्माद्ब्रह्मशब्दोपरिष्टात् दिपरित्यज्यदेहादिषुदेहाणतयाजीवेयौगिकोवाभाक्तोवाव्याख्ये
यः चैतन्यंचभक्तिः उपधानात् उपधानेतु विशेषः वाच्यानेगम्यतेस्मादेतत् जीवस्यपुरंभवलक्ष
णंपुंडरीकंदहरगोचरतानुसारसंभविष्यति तत्राजनस्यपुरइवोक्तंयन्मांमेत्रससम्यक्संतत्या
हतत्रपुरस्वामिनइति अपमर्षोवेषमतावत्स्वाधिकारणमनिर्दिष्टाधेयपापेपविशापापेक्षापापु

वाच॰ वमेवं ह्येति स्यादेतत् एवमेवैतत् नोपलब्धम्भूपरामृष्टा एवं दोषत्वेन चोद्यंते इत्यत आह तत्र वाक्यशे
प्र॰ तृ॰ षइति वाक्यशेषो हि दहराकाशात्मवेदनस्य फलवत्त्वं ब्रूते यच्च फलवत् तत्कर्त्तव्यतया चोद्यते ।
११३ यच्च कर्त्तव्यं तदिच्छतीति तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति दहराकाशविषयमवतिष्ठते
८ स्यादेतत् द्यावापृथिव्यावात्मानो भविष्यतः ताभ्यामेवात्मानन्तरमपिष्यतो आकाशशब्दवत्
तत्राकाशाधारैतावेव परामृष्येते इत्यत आह अस्मिन्कामाः प्रतिष्ठिता एष आत्मा अपहत
पाप्मेति अनेन हि प्रकृतं द्यावापृथिवी समाधानाधारमाकाशमाकृष्य द्यावापृथिव्यादिभिधी
नमपहितमपीति शेषः ननु सत्यकामत्त्वमस्यैतत् फलं न तदनंतरं निर्द्दिश्यात् तत्तु दहराकाशे
९३ इत्यत आह समुच्चयार्थेन चशब्देनेति अस्मिन्कामा इति च एष इति चैकवचनांतेन द्या
वापृथिव्योपरामष्टुमर्हतीत्युक्ति दहराकाश एव परामृष्टव्य इति समुदायार्थः तदनेन क्रमेण
तस्मिन्पदं तरिस्मत्र तद्द्वयोनंतरमथाकाशमतिर्न्नमाह सुंडरीकं परामृष्टं तीत्युक्तं भव
ति तस्मिन्हृत्पुंडरीके पदं दहराकाशं तदन्वेष्टव्यमित्यर्थः गतिशब्दाभ्यां तथा हि दृष्टं लिंगं च
उत्तरेभ्यउपासे च प्रपंचः एतमेव दहराकाशं प्रकृत्य तत्ता हो कप्राप्रिदं प्रवर्त्तते जंतूना त्वा तृ॰
वबोधविकलानां पदेभिः सार्धनमपि न बसेत न प्राप्यते तथा पार्कित्तनिरुद्धनिविडमला । ११३
पिहितानां कलधौतशकलानां पथि पतितानामुपर्युपरि संचरद्भिरपि पांथैः धनायद्भिः ८
ग्रावखंडनिवहविभ्रमेणपतानि नोपादीयंत इत्यभिसंधिमतीमाक्रुतमिव सर्वेदमेव

भविष्यति उत्तरेभ्यो ब्रह्मण एव धारणात् ब्रह्मणो हि बाधके प्रमाणे बलीयसि जीवस्य साधके प्रमा।
णसन्ति ब्रह्मलिङ्गानि कथंचिदभेदविवक्षया जीवे व्याख्यायन्ते न चेह ब्रह्मणो बाधकं वा लिङ्गं जी
वस्य ब्रह्मपुरत्वव्यपदेशश्चोपादितो ब्रह्मोपलब्ध्यस्थानतया अर्भकौकस्त्वं चोक्तं तस्मात्सति सं
भवे ब्रह्मणि तल्लिङ्गानां नाब्रह्मणि व्याख्यानमुचितमिति अत एव दहराकाशो न जीवभूताका
शादिति श्रवणमननाभ्यामनुविद्य ब्रह्मानुभूय चरणं चारः तेषां कामेषु चरणं भवतीत्यर्थः स्या
देतत् दहराकाशस्यान्वेष्टव्यत्वेन श्रुतत्वं विचारो युज्यते न तु तदन्वेष्टव्यमपि तु तदाधारमन्यदे
व किंचिदित्युक्तोऽस्मिन्नभाषते यदन्वेतव्यमिति अनुभाषितं दूषयति अत्र ब्रूम इति यथाकाश
धारमन्यदन्वेष्टव्यं भवेत् तदेवोपरिष्टादनुमादर्शीयं आकाशस्य वृत्पादनेन तत्कोपयुज्यत उ
त्यर्थः चोदयति नत्वेतदपीति आकाशाकाशनमपि तदन्तर्वर्तिवस्तुसद्भावप्रदर्शनायैव अथवा का
शापरमेव कस्मान्न भवतीत्यत आह तं चेद् ब्रूयुरिति आचार्येण हि दहरोऽस्मिन्नन्तर्दहराकाशस्त
स्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमित्युपदिष्टे अन्तेवासिनाश्चोदिते किं तदत्र विद्यते
यदन्वेष्टव्यं पुण्डरीकमेव तावत्सूक्ष्मतरं तदवरुद्धमाकाशं सूक्ष्मतमं अस्मिन्सूक्ष्मतमे कि
मतिशयनास्ति येनार्थः तत्र किमन्वेष्टव्यमिति तस्मिन्नाक्षेपे परिसमाप्ते समाधानावसरे आचा
र्य आकाशोपमानोपक्रमं वचः उभे अस्मिन्द्यावापृथिवी समाहिते इति तस्मात्पुण्डरीका
वरुद्धाकाशस्य द्यावापृथिव्यादेश्चान्वेष्टव्य उपदिष्टेनाकाशाद्यर्थः परिहरति नैतदे

वाच॰ नइति लोकः हृत्पुंडरीकस्थः खल्वयं लोकान्ते पनव त्राहृ तत्पुंडरीकस्य मंतःकारणं तस्मिन्
प॰ त॰ विशुद्धे प्रत्याहृतेन्तःकरणेनां योगिनां निर्मलइवोदके चंद्रमसो बिंबमतिस्वच्छे चैतन्यं ज्योतिः
९५ स्वरूपं ब्रह्मावलोक्यत इति शृते अस्य महिम्नो ब्रह्मणः स्मिन्नुपलब्धेः सो त्रोत इति शब्दो भाववच
नः शृते अस्य परमेश्वर एव दहराकाशः कुतः अस्य धारणं लक्षणं एष महिम्नो ब्रह्मण्येव ईश्व
९ र एवं बभूव मंतरे पूपलब्धेः निगदव्याख्यातमस्य भाष्यं प्रसिद्धश्च नचेयमाकाशशब्दस्य ब्रह्म
णि लक्ष्यमाणं विभुत्वादिगुणयोगात् इति सांप्रतिकी यथा रथांगनामा चक्रवाक इति लक्षणं
कितमंतत निरूढेति सूत्रार्थः येनाकाशशब्दो ब्रह्मण्यपि मुख्य एव नभोवदिमा चक्षते तेस्य
94 प्यस्यानेकार्थत्वमिति चानन्यलभ्यः शब्दार्थ इति च मीमांसकानां मुद्राभेदः कृतः लभ्यते स्याका
शशब्दात् विभुत्वादिगुणयोगेनापि ब्रह्मनच ब्रह्मण्येव मुख्यो नभसि वर्तते नैव गुणयोगेनव
र्ततीति वाच्यं लोकाधीनावधारणत्वेन शब्दार्थसंबंधस्य वैदिकपदार्थप्रत्ययस्य तत्पूर्वकत्वा
त् नचचयावान्नायमाकाशत्वाबानेषोंतर्हृदय आकाश इति व्यतिरेकनिर्देशानुलक्षणं प्रका
नहिभवति गंगायाः कूलमिति विवक्षिते गंगायां गंगेति प्रयोगः तत्किमिदानीं पौर्णमासीं त ३॰
पूर्णमास्यायजेतामावास्यायाममावास्ययेत्यसाधुर्वैदिकः प्रयोगः नच पौर्णमास्यमावास्याशब्दा ९५
वाग्रेयादिषु मुख्यौ यत्रार्थंतं यत्रशब्दादर्थप्रतीति तत्र लक्षणं यत्र पुनरस्यतोऽर्थनिश्चितेशब्द
। प्रयोगस्तत्र वाचकत्वमेवेति तदयुक्तं उभयत्रापि व्यभिचारात् सोमेन यजेतेति पात्शब्दार्थः ९

श्रुतिः अत एव इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्तीति स्वापकाले हि सर्व एवायं
विद्वानविद्वांश्च जीवलोको दहरं तं दहरीकाशं प्रति दहराकाशाख्यं ब्रह्मलोकं प्राप्नोत्यनाद्यविद्यातमः
पटलपिहितदृष्टितया ब्रह्मभूयमापन्नोऽहमस्मीति न वेद सोऽयं ब्रह्मलोकशब्दः तद्गतिप्रत्ययहे
जीवलोकस्य दहराकाशाख्येव ब्रह्मरूपलोकतामाह ततः तदेतदाह भाष्यकारः इत अपरमे
श्वर एव दहरो यस्मात् दहरवाक्यशेष इति तदनेन गतिशब्दौ व्याख्यातो तथा हि दृष्टमिति
सत्त्वावस्थं वाचष्टे तथा सहरहर्जीवानामिति वेदे च लोके चहृष्टं यद्यपि सुषुप्त एव ब्रह्म
भावे लोकिनं न प्रमाणान्तरमस्ति तथापि वैदिकीमेव प्रसिद्धिं स्वापयितुमुच्यते इहेदृशी
नाम पंवैदिकी प्रसिद्धिः यल्लोकेऽपि सौ पतद्रुति यथाश्रुतमतरे यथा च लोके तथा इह ब्रह्मलोकशब्दो
पीति योजना लिंगं चेति स्यात् व पदव्याख्यानं चोयमुचिनावतार यति न तु कमलासनलोकम
पीति परिहरति गमयेत् यदि तु ब्रह्मणो लोक इति अत्र तावन्निषादस्थपतिन्यायेन षष्ठी स
मासात् कर्मधारयो बलीयानिति स्थितमेव तथापीह षष्ठी समासनिराकरणेन कर्मधार
यसमासस्थापना पलिंगमप्याधिकमस्तीति तदप्युक्तं सूत्रकारेण तथा हि लोकवेदप्रसि
द्धाहरहर्ब्रह्मलोकप्राप्त्यभिधानमेव लिंगं कमलासनलोकप्राप्तेर्विपर्यादसंभवात्
मस्वरूपमवगतं ग्रामसत्तोमविध्यपेक्षितं सद्विधि प्रमाणकं भवति यथा च स्वर्गस्वरूपमत्तो
किकं स्वर्गकामो यजेतेति विधिनापेक्षितं सदर्थवादतोऽवगम्यमानं विधिप्रमाणकं तथा दे
वतारूपमपि नन्वहेयोरूपज्ञानमपेक्षते न पुना रूपसत्तामपि देवतायाः समारोपेणापि च
रूपज्ञानमुपपद्यते इति समारोपितमेव रूपं देवताया मंत्रार्थवादैरुच्यते सत्यं रूपज्ञानमपे
क्षते तज्ञान्यतासंभवात् मंत्रार्थवादेभ्य एव तथ्यतरूपस्यासति बाधकेऽनुभवारूढं तया।
भावपरिनस्पान्यथात्वमननुभूयमानमसांप्रतं कल्पयितुं तस्माद्विध्यपेक्षिते मंत्रार्थवादै
रन्यपरैरपि देवतारूपं बुद्धावुपनिधीयमानं विधिप्रमाणमेवेति युक्तं स्यादेतत् विध्यपे
क्षायामन्यपरादपि वाक्यादवगतोऽर्थः स्वीक्रियते तदपेक्षैव तु नास्ति यागस्वरूपस्य देवता
भावात् तस्य च मानान्तरवेद्यत्वादित्यत आह न च यागमात्रमिति न केवलं मंत्रार्थवादतो
विग्रहादिसिद्धिः अपि त्वितिहासपुराणलोकस्मरणेभ्यो मंत्रार्थवादमूलेभ्यो वा प्रमत्ता। रा.
दिमूलेभ्यो वेत्याह इतिहासेति निष्पते पूज्यते निगदमात्रव्याख्यातमन्यत् तदेवं मंत्रार्थ २२४
वादादिसिद्धदेवताविग्रहादौ गुर्वादिपूजावद्देवतापूजात्मको यागो देवताप्रसादादिद्वारे
ण स्वफलायावकल्पते अचेतनस्य तु पूजामप्रतिपद्यमानस्य तदनुपपत्तिः न चैवं पत्तक २९

येनं स्वार्थे येन मानान्तरासंभवे भवेदप्रमाणमिति स्यात्। स्यादेतत् तात्पर्यैक्ये ऽपि पदि वाक्यभेदः का
र्यत्ते स्यैर्यैकत्वादेकवाक्यं न तत्र तत्र यथा स्वे तत्रान्यपदार्थविशिष्टैकपदार्थप्रतीतिपर्यवसान
संभवात् सत्पदार्थान्तरविशिष्टः पदार्थ एकः कश्चिद्द्वारभूतः कश्चिद्द्वारी तेतावानविशे
षः नन्वेवं सत्योदनं भुक्त्वा ग्रामं गच्छतीत्यत्रापि वाक्यभेदप्रसंगः अन्यो हि संसर्ग ओदनं भु
ङ्क्तेति अन्यश्च ग्रामं गच्छतीति एकत्र प्रतीतेरपर्यवसानात् भुङ्क्तेति हि समानकर्तृक
तापूर्वकालता च प्रतीयते न चैषा प्रतीतिरपरकालक्रियान्तरप्रमयमन्तरेण पर्यवस्य
ति तस्माद्यावत्पदसमूहे पदार्थाहिताः पदार्थाः स्वतः पर्यवस्यन्ति तावदेकं वाक्यमर्थवाद
वाक्ये चैताः पर्यवस्यन्ति विनैव विधिवाक्यं विशिष्टार्थप्रतीतेः न च द्वाभ्यां द्वाभ्यां पदा।
भ्यां विशिष्टार्थप्रत्ययपर्यवसानात् पञ्चषट्पदवति वाक्ये एकस्मिन्नानात्वप्रसंगः नानात्वेऽपि वि
शेषणानां विशेष्यस्यैकत्वात् श्रुतस्य प्रधानभूतस्य गुणभूतविशेषणानुरोधेनावर्तनायोगात्
प्रधानभेदे तु वाक्यभेद एव तस्माद्विधिवाक्यादर्थवादवाक्यमन्यदिति वाक्ययोरेव स्वस्ववा।
क्यार्थप्रत्ययावसितव्यापारयोः पश्चात् कुतश्चिदपेक्षायां परस्परान्वय इति सिद्धं अपि वेन्द्रा
दिदेवमासीदिति देवतास्तु द्विप्रहविरन्नं मृष्यत तद्विषयं स्वतन्त्रमागं इति हि यागशरीरं न च चेत
सनालिविता देवतोद्देशेन वक्यानन्च स्वरूपरहिता चेतसि प्रकाशते या लोविततमिति यागविधिर्न
वतत्रूपापेक्षिण्या हृदयप्रमन्यपरे भ्योऽपि मन्त्रार्थवादेभ्यस्तद्रूपमवगतं तदभ्युपेयते रूपान्तर

वात॰ नं। यदाहवनीये जुहोतीत्याहवनीयस्य होमाधिकरणतया विधानात्तद्रूपस्यालौकिकत्वम्।
प्र॰ टी॰ नारभ्याधीतवाक्यविहितादाधानादन्यतोऽनधिगमादाधानस्य च विहितजातसंबंधितया विधा
२२५ नात् तस्माच्छ्रौतोऽग्निरलौकिकोन शूद्रस्यास्तीति नाहवनीयादिसाध्ये कर्मणि शूद्रस्याधिका
र इति न च तथा त्रैविद्यायामलौकिकमस्ति साधनं यच्छूद्रस्य न स्यात् अध्ययननिय
रा॰ म इति चेत् न विकल्पासहत्वात् तदध्ययनं पुरुषार्थे वा नियम्येत यथा धनार्जने प्रति
ग्रहादिः क्रत्वर्थे वा यथा व्रीहीनवहंतीत्यवघातः न तावत् क्रत्वर्थो न हि स्वाध्यायोऽध्येत
व्य इति कंचित् क्रतुं प्रकृत्य पठ्यते यथा दर्शपौर्णमासं प्रकृत्य व्रीहीनवहंतीति न चाना
225 रभ्याधीतमप्यव्यभिचरितक्रतुसंबंधतया क्रतुमुपस्थापयति येन वाक्येनैव क्रतुना सं
बध्येताध्ययनं न हि यथा जुहूर्व्यभिचरितक्रतुसंबंधमेवं स्वाध्याय इति तस्मान्नैष
क्रत्वर्थो नियमः नापि पुरुषार्थे पुरुषेच्छाधीनप्रवृत्तिर्हि पुरुषार्थो भवति यथा फलं त
दुपायो वा तदुपायेऽपि हि विधितः प्राक् सामान्यरूपा प्रवृत्तिः पुरुषेच्छानिबंधनैवेति क
र्तव्यतास्तु सामान्यतो विशेषतस्तु प्रवृत्तिर्विधिपराधीनैव न ह्यनधिगतकरणभेद इति उ॰
कर्तव्यता संघटते तस्माद्विध्यधीनप्रवृत्तितयांगानां क्रत्वर्थता। क्रतुरिति हि विधिवि २२५
षयेण विधिं परामृशति विषयिणं तेनाध्येतृविषयीक्रियत इति क्रत्वर्थः न वाध्ययनं
वा स्वाध्यायो वा तदर्थज्ञानं वा प्राग्विधेः पुरुषेच्छाधीनप्रवृत्तिर्येन पुरुषार्थः स्यात् रा॰

र्म्मणो देवतां प्रति गुणभावात् देवतानः फलोत्पादे यागभावनायाः श्रुतं फलवत्त्वं यागस्य चेतनाप्र
लितं फलाशंवा प्रतिश्रुतं करणत्वं हातव्यं यागभावनाया एव हि फलवत्त्वायागलक्षणस्य कर
णत्वांतरव्यापारत्वाद्देवताभोजनप्रसादादीनां कृषिकर्म्मण इव तत्र देवांतरव्यापार एव स्या
धिगमसाधनत्वं आग्नेयादीनामिवोत्पत्तिपरमापूर्वांतरव्यापाराणां भवन्मते स्वर्गसाधनत्वं
तस्मात्कर्म्मणो पूर्वावांतरव्यापार एव वा देवताप्रसादाद्यांतरव्यापारस्य वा फलवत्त्वात्प्रधानत्वम
भ्युपगमेपि न फलेसमानं न तु देवताया विग्रहादिमत्ताः प्रधान्यमिति तन्न धर्म्ममीमांसायाः सूत्रं
अपि चाण्यद् पूर्वत्वात् यत्र कर्म्म प्रधानं गुणत्वे देवताश्रुतिरिति विरुध्यते तस्मात्सिद्धो देवता
नां शब्देन ब्रह्मविद्यायामधिकार इति शूद्रस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि अवां
तरसंगतिं कुर्वन्नधिकरणतात्पर्यमाह यथा मनुष्याधिकारेति शंकाबीजमाह न त्रैवेति नि
मेषूनिविलङ्त्वानुवृंगेयाश्रुतिकेप्यानंदेकस्य नाम चेतनस्यार्थितानास्ति येनार्थिताया अ
भावात् शूद्रेनाधिक्रियेत नाप्यस्य ब्रह्मज्ञानसामर्थ्याभावः द्विविधं हि सामर्थ्यं निजं वागंतु
कं च तत्र द्विजातीनामिव शूद्राणां श्रवणादिसामर्थ्यं निजमप्रतिहतं अध्ययनाधानाभा
वागंतुकसामर्थ्याभावे सत्यनधिकार इति चेत् हंताधानाभावे सत्यग्न्यभावादग्निसाध्ये क
र्म्मणिमाभूदधिकारः न च ब्रह्मविद्यायामग्निः साधनमिति किमिति अनाहिताग्नयो ना
धिक्रियंते न चाध्ययनाभावात्तत्साधनायामनधिकारो ब्रह्मविद्यायामिति सांप्रतं यतोपु

ब्राच॰ नादृष्टफलकल्पनो विना दृष्टश्च स्वाध्यायस्याध्ययनसंस्कारः तेन हि पुरुषेण समवाप्यते प्रा।
प्र॰त॰ प्तश्च फलवत्कर्मब्रह्मावबोधमभ्युदयनिःश्रेयसप्रयोजनं यति न तु सुवर्णधारणादेर्दृष्ट
११८ द्वारेण परंपरयाप्युपकारापेक्षितं पुरुषस्य तस्माद्विपरीतमस्मात्सुवर्णधारणादेव विनियोगभंगेन
३१ फलं कल्प्यते यदा चाध्ययनसंस्कृतेन स्वाध्यायेन फलवत्कर्मब्रह्मावबोधो भाव्यमानो ऽभ्युद
यनिःश्रेयसप्रयोजन इति स्थापितं तदा यस्याध्ययनं तस्यैव कर्मब्रह्मावबोधो ऽभ्युदयनिःश्रेय
सप्रयोजनो नान्यस्य यस्य चोपनयनादिः संस्कारस्तस्यैवाध्ययनं स च द्विजातीनामेवेत्युपनय
226 नाभावेनाध्ययनसंस्काराभावात् पुस्तकादिपठितस्वाध्यायजन्मा यो ऽर्थावबोधः शूद्राणां न फ
लाय कल्पत इति यावत्तस्मात्सामर्थ्याभावान्न शूद्रो ब्रह्मविद्यायामधिक्रियत इति सिद्धं यत्त्वेवन
वत्त्वं न श्रुति यत्र शूद्रग्रहणमुपलक्षणार्थं विद्यायामनवक्लृप्तत्वमपि दर्शयत्येवं सिद्धवदभिधानस्य
न्यायपूर्वकत्वात् न्यायश्चोभयत्र साम्यात् द्वितीयपूर्वपक्षमनुभाषते यत्पुनः संवर्गवि
द्यायामिति दूषयति न तल्लिंगं कुतः न्यायात् न तावत् शूद्रः संवर्गविद्यायां साक्षाच्चोद्यते
यथैतया निषादस्थपतिं याजयेदिति निषादस्थपतिः किं त्वर्थवादगतो ऽयं शूद्रशब्दः स चान्य उ॰
तः सिद्धमर्थमनुवदति न तु प्रापयतीत्यध्वरमीमांसकाः अस्माकं त्वन्यपरादपि वाक्यादस ११८
ति बाधके प्रमाणान्तरेणावगम्यमानो विधिना चापेक्षितः स्वीक्रियत एव न्याय यस्मिन्नर्थे उक्तो ३१
बाधकः न च विद्यायामपेक्षितास्ति द्विजातमधिकारिप्रतिलंभेन विधेः पर्यवसानात् विध्युद्देशगा

यदि वाध्ययनेनार्थावबोधरूपं नियम्येत ततो मानान्तरविरोधः ननु यस्य विनाप्यध्ययनं पुस्तकादिपा
ठेनाप्यधिगमः स्यात् तस्मात्स्वर्गं भावयेमिति वदध्ययनादेव फलं कल्पनीयं तथा चाध्ययनविधेर्नि
यामकत्वात् शूद्रस्याध्ययनेन वा पुस्तकादिपाठेन वा सामर्थ्यमस्तीति सोपि ब्रह्मविद्यायामधिकृ
तः माभूदध्ययनाभावात् (शूद्रस्याध्ययनेन वा पुस्तकादिपाठेन वा साम) सर्वत्र ब्रह्मविद्याया
मधिकारः संवर्गविद्यायां तु भविष्यति अहहारेत्वा शूद्रेति शूद्रं संबोधयतस्तस्याः प्रवृत्तेः नचै
ष शूद्रशब्दः कयाचिदवयववृत्त्या अशूद्रे वर्णनीयः अवयवप्रसिद्धितः समुदायप्रसिद्धे
रनपेक्षतया बलीयस्त्वात् तस्माद्यथानधीयानस्यापि निषादस्थपतेरधिकारो वचनसाम
र्थ्यादेवं संवर्गविद्यायां शूद्रस्याधिकारो भविष्यतीति प्राप्ते एवं प्राप्ते ब्रूमः न शूद्रस्याधिका
रो वेदाध्ययनाभावादिति अयमभिसंधिः यद्यपि स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिर्न किं
चित् फलवत्कर्माध्याम्नातं नाप्यव्यभिचरितक्रतुसंबंधपदार्थगतः नहि जुह्वादिवत्स्वा
ध्यायोऽव्यभिचरितक्रतुसंबंधः तत्रापि स्वाध्यायाध्ययनं संस्कारविधिरध्ययनस्यापेक्षि
तोपायत्वमवगमयति किं पिंडपितृयज्ञवत्स्वर्गं वा स्वर्गं भावयेमिति वदर्थवादिकं वा फलं
कल्पयित्वा विनियोगभंगेन स्वाध्यायेनाधीयीतेत्येवमर्थः कल्प्यतां किं वा परंपरयाप्य
न्यतोपेक्षितमर्थावगमनिर्वृत्तेरिति विशये न दृष्टद्वारेण परंपरया प्रान्यतोपेक्षितप्रति
लंभे च यथाश्रुतविनियोगोपपत्तौ च संभवं त्याश्रुतविनियोगभंगेनाध्ययनादेवापूर्व

वाव॰
प्र॰तं॰
११२
३२

युग्वानं जीर्णकं जीर्णतया महं वर्त्तते इति सयुग्वा रैक्वः तमिव कमेनं प्राणिमात्रेनाभ्नश्रुतिमा
त्परैक्वस्य हि ज्योतिरसहं नत्वेतस्य प्राणिमात्रस्य तस्य हि भगवतः पुण्यपेत्तान संभार संपन्न
स्य रैक्वस्य ब्रह्मविदो धर्मेन्द्रलोकपोद्रवर्त्तिप्राणिभूमात्रधर्मो तर्भवति नप्रुनारैक्वधर्मक
तां कस्यचित धर्मो नगाहतइति अथैषहं सवचनादात्मनो मंतनिकर्षमुत्कर्षकाङ्क्षां चरै
क्वस्योपश्रुत्य विविद्यमानमोज्जानश्रुतिः कितवइवाक्षपराजितः पौनः पुन्येन निःश्वस
न्नुद्देलंकपं कम्पमपि पुनिर्णोपमतिवाहयांबभूव ततो निशावसानेपिनवंदारवृंदप्रार
ब्धस्तुतिसहस्रसमं वलितमंगलहर्षपनिर्घोषमाकर्ण्य तल्पतलस्थ एव राजा एकं पदेय
तारमाहूयादिदेश पश्यरैक्वं ब्रह्मविदमेकान्तरतिं सयुग्वानमतिविविक्ते पुविपिननगनिकुं
जनदीपुलिनादिप्रदेशेष्वन्विष्य प्रयत्नतो ममआनयत्वेति सचतत्रतत्रान्विष्यक्वचिद्यति
विविक्ते देशे शाकटस्याधस्तात् पामानं कंडूयमानं ब्राह्मणमपश्यन्मद्रातीत इष्टा च रैक्वोयं
227 भवितेति प्रतिभावपन्नुपविश्य सविनयमेप्राक्षीत् त्वमसि हे भगवन् सयुग्वा रैक्व इति
तस्य च रैक्वस्य चानुमतिं वचनैस्तैर्गोर्हस्यैरुद्धाधनायां वाक्ताविमर्पयतारान्ते निवेदयामास राजा उ॰
ततो निशम्य गवां षट्सहस्राणि निष्कं कहारं चाश्वतरीरथं चादाय समतरं रैक्वं प्रतिचक्रमे ग ११२
त्वा चाभ्युवाद हे रैक्व गवां षट्शतानीमानि निष्कस्य हारश्चायमश्वतरीरथ एतानादत्स्व
अनुशाधि मां भगवन्निति अथैवमुक्तो वंतं प्रतिमाटोपं च समस्पृहं चोवाच रैक्वः अहहा ३२

तत्त्वेनानवधार्यमाणोऽपोह्यते वचनबलान्निषादस्थपतिवत्तु न त्वेष विधिर्दृष्टः शूद्रस्य तत्र उक्तं तस्मान्नार्थवा
दमात्राच्छूद्रस्याधिकारसिद्धिरिति भावः अपि च किमर्थवादबलाद्विद्यामात्रेऽधिकारः शूद्रस्य कल्प
ता संवर्गविद्यायां वा न तावद्विद्यामात्रे उत्साहकामं वा यमिति न हि संवर्गविद्यायामर्थवादः श्रुतो
विद्यामात्रेऽधिकारं शूद्रस्योपनयति श्रुतिप्रसंगात् अथ तु तर्हि संवर्गविद्यायामेव शूद्रस्याधिका
र इत्यत आह अर्थवादस्थत्वात्त्वेति तत्किमेतच्छूद्रपदं प्रमत्तगीतं न चेत युक्तं न तुल्यं हि सांप्रदा ।
यिकमित्यत आह शक्यते चायं शूद्रशब्दार्थः इति एवं किलाख्यायिकायां जानश्रुतिः पौत्रा ।
यणः श्रद्धादेयो बहुदायी बहुपाक्यः प्रियातिथिर्बभूव स च तेषु तेषु ग्रामनगरशृंगाटकेषु
विविधानामन्नपानानां पूर्णानर्थिभ्य आवसथान्कारयामास सर्व एते ते आवसथेषु मम अन्नपा
नमर्थिन उपयोक्ष्यन्त इति अथास्य राज्ञो दानशौंडस्य गुणगरिमसंतोषिताः संतो देवर्षयो हंस
रूपमास्थाय तदनुग्रहाय तस्य निदाघसमये दोषाहर्म्यतलस्थस्योपरि मालामाबध्य जग्मुः
तेषामन्यः सरंहसं सर्वोपृष्ठतो व्रजन्नेकतमो हंसः साधुतमभ्युवाद हो हो यि भल्लाक्ष भ
ल्लाक्ष जानश्रुतेरस्य पौत्रायणस्य द्युनिशं द्युलोके आयतं ज्योतिस्तन्मा प्रसांक्षीस्तत्त्वा प्रधाक्षी
दिति तमेवमुक्तवन्तमग्रगामी हंसः प्रत्युवाच कमु वर एनमेतत्सन्तं सयुग्वानमिव रैक्वमा
त्थेत्यपमर्षः कं वर इति सोपहासमेवैनमाह अथवा वरो वराकोऽयं जानश्रुतिः कमित्यादे
ये यस्मादयं वराकः तस्मात्कमेनं किंभूतमेनं सन्तं प्राणिमात्रं रैक्वमिव सयुग्वानमात्थ

वाच-
ब्र-सू-
२२८
श्री

चारी शूद्र इत्यभिहिते याजकेन च कापेयेन योगाद्याज्योभिःप्रतारी क्षत्रियत्वं चास्य चैत्ररथि-
त्वात् तस्मात् चैत्ररथिर्नामैकः क्षत्रपतिरजायत इति वचनात् चैत्ररथित्वं चास्य कापेयेन
याजकेन योगात् एतेन चैत्ररथं कापेया अयाजयन्निति हि छन्दोगानां ब्राह्मणे श्रूयते ते
न चित्ररथस्य याजकाः कापेयाः एवमभिप्रतारीति चित्ररथादन्यः समानैककापेयानां याज्यो
भवति यदि चैत्ररथिः स्यात् समानान्वयानां हि प्रायेण समानान्वययाजका भवंति तस्माच्चै-
त्ररथित्वादभिप्रतारी काक्षसेनिः क्षत्रियः तत्समभिव्याहाराच्च जानश्रुतिः क्षत्रियः संभाव्य-
ते इतश्च क्षत्रियो जानश्रुतिरित्याह क्षत्तृप्रेषणाद्यैश्वर्ययोगाच्च क्षत्तृप्रेषणं चार्थसंभवे
बलाद्ब्राह्मणवदान्यप्रभृतेरैश्वर्यं प्रायेण क्षत्रियस्येह पृथुप्रियशिरादिवदिति संस्कारप-
रामर्शात्तदभावाभिलापाच्च न केवलमनुपनीताध्ययनविधिपरामर्शेन शूद्रस्यानधि-
कारः किं तु तेषु विद्योपदेशोपनयनसंस्कारपरामर्शात् शूद्रस्य तदभावाभिधा-
नात् ब्रह्मविद्यायामनधिकार इति ननु अनुपनीतस्यापि ब्रह्मोपदेशः श्रूयते तान्
हाप्यनुपनीयैवेति तथा शूद्रस्यानुपनीतस्यैवाधिकारो भविष्यतीत्यत आह तान्हानु- उ-
पनीयैवेत्यपि प्रदर्शितैवोपनयनप्राप्तिः प्राप्तिपूर्वकत्वात् प्रतिषेधस्य येषामुपनय- २२८
नप्राप्तिस्तेषामेव तन्निषिध्यते तच्च द्विजातीनामिति द्विजातय एव निषिद्धोपनयना अ-
धिक्रियन्ते न शूद्र इति तदभावनिर्धारणे च प्रवृत्तेः सत्यकामो ह जाबालः प्रमीत। श्री

228

रेत्वाशूद्रतवैवसहगोभिरस्त्विति अहेतिनिपातः सटोपमामंत्रणे हारेणयुक्ताइत्वागंत्रीरथो
हारेत्वागोभिः सहतवैवास्तु किमेतन्मात्रेण ममधनेनाकल्पवर्त्तिनोगार्हस्थ्यस्यनिर्वाहानुपयो
गिनेतिभावः आहारेत्वेतितुपाठोऽनर्थकतयाचगोभिःसहेत्यत्रप्रतिसंबंध्यस्यानुपादनेना
चार्यैर्दूषितः तदप्यामाख्यायिकायांशाक्यः शूद्रशब्देनजानश्रुतीराजन्योऽप्यवयववक्तुम्।
मावक्त्रा सहिरैक्वः परोक्षज्ञतांविख्यापयिषुरात्मनोजानश्रुतेः शूद्रेतिशुचंसूचयामास क
थंपुनः शूद्रशब्देनशुगुत्पन्नास्यसूच्यतइति उच्यते तदाद्रवणेन तस्माच्चेष्टे शुचमभिद्रा ३
वजानश्रुतिः शुचंप्राप्तवानित्यर्थः शुचावाजानश्रुतिर्द्दुद्रावे शुचाप्राप्तइत्यर्थः अथवाशु
चारैक्वंजानश्रुतिर्द्दुद्राव गतवानस्मात्तदाद्रवणादितितच्छूद्रेन शुचवाजानश्रुतिर्वारैक्वो
वापराशूद्रपतइत्युक्तं क्षत्रियत्वगतेश्चोत्तरत्रचैत्ररथेनालिंगात् इतश्चनजातिशूद्रोजा
नश्रुतिः यत्कारणंप्रकरणनिरूपणेक्रियमाणे क्षत्रियत्वमस्यजानश्रुतेरवगम्यते चैत्र
रथेनलिंगादितिव्याचष्टे प्रकरणनिरूपयति उत्तरत्रसंवर्गविद्यावाक्यशेषे चैत्ररथि
नाभिप्रतारिणानिश्चितत्वात् एतेनसमानायांसंवर्गविद्यायांसमभिव्याहाराल्लिंगात्
संदिग्धःक्षत्रियभावोजानश्रुतिः क्षत्रियोनिश्चीयते अथहशौनकंचकापेयमभिप्रतारि
णंचकाक्षसेनिंसूदेनपरिविष्यमाणौब्रह्मचारीबिभिक्षेइति प्रसिद्धयाजकत्वेनकापेय
नाभिप्रतारिणोयोगः प्रतीयते ब्रह्मचारिभिक्षयामासौशूद्रत्वमवगतंतेनहिजातत्वस्य

विततयापि तदुपपत्तेः यथाऽमृता देवा इति तस्मात्स्थाणकत्रश्रुमनुरोधाद्याप्रेकाववविवक्षा।
वाच. तो न ब्रह्मेति प्राप्तं एवं प्राप्त उच्यते कंपनात् सर्वस्य जगतः कंपनात् परमात्मैव वज्रशब्दात्
ब्र. सू. प्रमित इति मंत्रकल्पस्यानुपपत्ते ब्रह्मणो हि बिभ्यदेतत्जगत् स्वव्यापारे नियमेन प्रवर्त्त
१२६ तेन तन्मर्यादामतिवर्त्तते एतदुक्तं भवति न श्रुतिसंकोचमात्रं श्रुत्यर्थपरित्यागे हेतुः अपि
३४ तु पूर्वापरवाक्यैकवाक्यताप्रकरणाभ्यां संवलितः श्रुतिसंकोचः तदिदमुक्तं पूर्वपरयोर्ग्र
न्थभागयोर्ब्रह्मैव निर्दिश्यमानमुपलभामहे इहैव कंपनमंत्रान्तराले वा प्रुनिर्दिश्यमानं प्रतिपद्य
महीति तदनेन वाक्यैकवाक्यता दर्शिता प्रकरणादपीति भाष्येण प्रकरणमुक्तं यत्वत्तु
एष तदेव प्रधानं प्रतिवक्तव्यमिति तस्य प्रकरणं एष्टादन्यस्मिंस्तूच्यमाने प्राप्तम प्रमाण
भवेदं सर्वमुपप्लापत्वात् यत्ववापुविरत्तामात्रो विदेशृतनत्वमभिहितमापेक्षिकत्वादिति अपश्च
229 मृत्युं जयतीति श्रुमाह प मृत्युविजय उक्तो न तु मृत्युविजय स्वात्मापेक्षिकत्वं तच्चतत्रैव प्रकरणे
तरकरणेन हेतुना न केवलममृतत्वमानन्दापेक्षिकमपि तु परमात्मानमभिधायापातोऽन्यदार्त्त
मिति वाद्यादेशार्त्तत्वाभिधानात् न सार्त्ताभ्यासादनार्त्तो भवतीति भावः ज्योतिर्दर्शनात् अ ३
त्र हि ज्योतिः शब्दं समस्ते तेजसि मुख्यत्वात् तद्ग्रहणे न च ब्रह्मत्वात् प्रकरणाच्च श्रुतेर्बलीयस्त्वात् श्रु १२६
तेर्वत् श्रुतिसंकोचस्य चात्राभावात् प्रसिद्धतरं ब्रह्म ज्योतिः पदे ब्राह्मश्रुतेः पूर्वकालावयोयाः पीड ३४
न प्रसंगात् समुत्थानश्रुतेश्च तेज एव ज्योतिः तथा हि समुत्थानमुत्क्रमणमुच्यते न च विवे

पितृकः स्वां मातरं जबालामपृच्छत् अहमाचार्यकुले ब्रह्मचर्यं चरिष्यामि तद्ब्रवीतु भवती
किंगोत्रोहमितिसाब्रवीत् त्वज्जनकपरिचरणपरतयाहं नाज्ञासिषं पत्यौ गोत्रं तवेति सत्या
चार्यं गौतममुपससाद उपसद्य चोवाच भगवन् ब्रह्मचर्यमुपेयां त्वयीति स होवाच नाविज्ञा
तगोत्र उपनीयत इति किंगोत्रोसीति स प्रोवाच सत्यकामः नाहं वेद स्वं गोत्रं स्वां मातरं जबा
लामपृच्छं सापि न वेदेति तदुपश्रुत्याभ्यधात् गौतमः नाद्विजन्मन आर्जवं प्रवक्तुमीहते एवं च
नेनास्मिन् शूद्रसंभावनास्तीति द्विजातिजन्मानं मन्ये अतस्त्वामुपनेष्य इत्युपनेतुमनुशासितं वचना
त्सगौतमः श्रद्धातेनापि स्मृत इत्याधिकार इति विद्यापतेन सत्याद्गा इति न सत्यमतिक्रा
न्तवानसीति श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च निगदव्याख्यातेन भाष्येण व्याख्या
तेष्वतिरोहितार्थमस्पष्टं कंपनात् प्राणवज्रश्रुतिबलाद्धाकं प्रकरणे च भक्त्या वायुः पंच प्रवृत्ति
वाध्यात्मिको वा सर्वप्राण इति पाठः तथा हि प्राणशब्दो मुख्यप्राणवायावाध्यात्मिके वज्रशब्द
प्राणो यथा निश्वासपरिणामः वायुरेव हि वासो धूमज्योतिः सलिलसंवलितः पर्जन्यभा
वेन विपरिणतो विद्युत्स्तनयित्नुवृष्ट्यशनिभावेन विवर्तते यद्यपि च सर्वं जगदिति स्ववायु
कं प्रतीयते तथापि सर्वं ग्राह्यमपेक्षितं कोपि न स्वाभिधेयं जहातीति किं तत्संकुचितवृत्तिर्भवति
प्राणवज्रशब्दौ तु असंविधेयते स्वार्थमेवमन्यतः तस्मात्स्वार्थत्यागाद्वरं वृत्तिसंकोचः स्वा
र्थे लेपाभावस्थानात् अमृतशब्दोपि मरणाभाववचनोऽन्नसार्वकालिकतदभावकृते ज्योग्जी

वाच·
प्र·नं·
१९०
॥४

पकृष्टं सदहर्गणस्य विधत्ते परप्रकरणेऽन्यधर्मविधेरप्राप्तत्वात् अप्रसंवृद्धपदस्य वापवि
च्छिन्नस्य प्रकरणस्य पुनरनुसंधानत्वोपात् तेनानपकृष्टेनैव द्वादशाहीनस्येति वाक्येन
साह्नस्यतिस्त्रउपसदः कार्या इति विधित्सितं द्वादशाहविहितद्वादशोपसत्त्वानुवृत्ति
तित्वेन सर्वाहीनेषु प्राप्तानि चीनत्वादिवदनूद्यते तस्माद हीनस्य माप्रकरणे वाधेयिन
द्वादशाहीनस्येति वाक्यस्य प्रकरणादपकर्षे ज्योतिष्टोमप्रकरणेऽन्वात्स्य पृथाह्य
नुमंत्रणमंत्रस्य यल्लिंगाद्बलात्प्रकरणे वादीनापकर्षेत्सदगमायोस्यादौ च कर्मणि
स्यार्थवत्वादिहत्वपकर्षस्यार्थिरादिमार्गोपदेशेफलस्यापायमार्गप्रतिपादके प्रतिवि
शदैवस्य प्रसादइति वाक्यस्याविशदैकदेशमात्रप्रतिपादकस्यानिः प्रयोजनत्वात्
नचद्वादशाहीनस्येति वत्पयोव्रतामध्यानसाधनानुष्ठानं स्तोत्रमेषसंप्रसादइति वि
वनमर्चिरादिमार्गमनुवदतीति युक्तं स्तुतिलक्षणमपाशाभिधेयसंसर्गतास्यप
परित्यागप्रसंगात् द्वादशाहीनस्येति त्ववाक्ये स्वार्थसंसर्गतात्पर्ये प्रकरणविच्छेद
स्यप्राप्तानुवादमात्रस्य चाप्रयोजनत्वमिति स्तुतपर्यालस्यते नचैतद्दोषभयात्समुदा
यप्रसिद्धिमुल्लंघ्यावयवप्रसिद्धिमुपाश्रित्यसाह्नस्यैव द्वादशोपसत्त्वं विधातुमर्हति
त्रित्वद्वादशत्वयोर्विकल्पप्रसंगात् नचसत्वागतौ विकल्पोऽन्याय्यः साह्नाहीनपद
योश्च प्रकृतिज्योतिष्टोमाभिधायिनोरानर्थक्यप्रसंगात् प्रकरणादेवतदवगतेः ३

भ॰
१९०
॥४

220

कविस्तारं उक्तमनंचतेजः परदेऽर्चिरादिमार्गेणोपपद्यते आदित्यस्यार्चिरपेक्षया परंज्योतिर्भ
वतीति तदुपसंपद्य तत्समीपेभूत्वा स्वेनरूपेणाभिनिःपद्यते कार्यब्रह्मलोकप्राप्तौ क्रमेण
मुच्यते ब्रह्मज्योतिः परदेतद्ब्रह्मभूतात्कापरात्स्वरूपनिष्पत्तिः नचदेहादविविक्तब्रह्मस्वरूपसा
त्वात्कायोऽनुत्तिरूपोनिष्पत्तिः साहि ब्रह्मभूयात्प्राचीनानन्तपराचीनामेयमुपसंपद्येति त्वा ।
श्रुतेः पीडातस्मान्निसृभिः श्रुतिभिः प्रकरणाबाधनात्तेजएवात्रज्योतिरितिप्राप्ते एवंप्राप्तेभि
धीयते परमेव ब्रह्मज्योतिःशब्दं कस्मात् दर्शनात् तस्माहीह प्रकरणेऽनुवृत्तिर्हिश्रूयते यतत्वल्ल
प्रतिज्ञायते यच्च मध्ये परामृश्यते यच्चोपसंह्रियते स एव प्रधानं प्रकरणार्थः तदेतः पातिन
न्तुसर्वं तदनुगुणतयानेतव्याः न तत्श्रुतमनुरोधमात्रेण प्रकरणादपकृष्याउतिहिलोकेपि
तिः ग्रन्थेष्वपि श्रुयाज्ञवाक्येनाभिनादोषोपक्रमे तत्प्रतिसमाधानोपसंहारे च तदेतः पातिनो
विश्वरूपोऽश्वपृष्ठ्यं इत्यादयो विधिषु श्रुत्यनुरोधेन ह्यपकृतिविषयः प्रसक्त्येवन् तत्किमिदानीं
न्तिस्त्वएवसाहृस्वोपसदः कार्याद्वादशाहीनस्येति प्रकरणानुरोधात् समुदायप्रसिद्धिव
ललक्षमहर्गणाभिधानं परित्यज्याहीनशब्दः कथमप्यवयववृत्त्यात्मसाह्नं ज्योतिष्टोम
मभिधायतेैवद्वादशोपसत्तां विधत्तां संहितकृत्सविधानानुकूतस्मिन्नदपिहीयते क्रतोरि
त्यहीनः शक्यावक्तुमेवमवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीति श्रुत्याप्रकरणा
बाधनात् नद्वादशोपसत्त्वमहीनगुणप्रयुक्तेज्योतिष्टोमेशक्नोतिविधातुं नाप्यतोऽन

वाच. प्र. तृ. १२२ ३९

मर्थं नामरूपमिति यावत् ननु तन्निर्वोढृ वै ब्रह्म स्यान्नतरालं वा निर्वोढृ तस्मात्प्रसिद्धेर्भूताकाशमेवा
काशो न तु ब्रह्मेति प्राप्त एवं प्राप्त उच्यते परमेवाकाशं ब्रह्म कस्मादर्थान्तरत्वादिव्यपदेशात्
नामरूपमात्रनिर्वोढृकमिहाकाशमुच्यते भूताकाशं च विकारस्तेन नामरूपान्तःपतितम
यमात्मानमुद्वहेत् न हि सुशिक्षितोऽपि विज्ञानी स्वेन स्कन्धेनात्मानं वोढुं समुत्सहते तेन च नाम
रूपश्रुतिरविशेषतः प्रवृत्ता भूताकाशवर्त्तिनामरूपान्तरसंकोचमपि बध्नाति संभवे न च
निर्वोढृकत्वं निरङ्कुशं भवगात ब्रह्मलिङ्गं कथंचित्क्लेशेन परतन्त्रेणेतमुचितमनेन जीवे।
नात्मनानुप्रविश्य नामरूपे व्याकरवाणीति वचनात् स्रष्टृत्वमपि स्पष्टं ब्रह्मलिङ्गमत्र श्रूयते
ब्रह्मरूपतया च जीवस्य व्याकर्तृत्वं ब्रह्मण एव व्याकर्तृत्वमुक्तं एवं च ते निर्वहितरे वान्तराल
तोपपत्तेरन्योन्यनिर्वहितान्तस्पृष्टान्तरालमित्यर्थभेदकल्पनापि निरस्ता तथा च तेन नाम
रूपे यदन्तरा आकाशमन्तरेण पमर्थान्तरव्यपदेशादुपपन्नो भवत्याकाशस्य तस्मादर्थान्तरव्यप
देशात् तथा तद्ब्रह्म तदमृतमिति व्यपदेशात् ब्रह्मैवाकाशमिति सिद्धं सुषुप्त्युत्क्रान्त्योर्भेदे
न आदिमध्यावसानेषु संसारिप्रतिपादनात् तस्मात् प्रसंदर्भः सर्वो तत्रैव योज्यते संसारि
वृत्तावदात्माहंकारास्पदं शरीरादिपरीतः सर्वजनसिद्धः तमेव च वैपरीत्यविज्ञानमयः प्राणे
ष्विमादिश्रुतिसंदर्भ आदिमध्यावसानेषु परामृशतीति तदनुवादपरो भवितुमर्हति ए
वं संसारिणोऽवैकविदर्पणसमहाप्रसारस्य चानादित्वेनानादित्वादनुच्यते ननु तदनि

221

ऊ. १२२ ३९

हत्वस्वार्थसंसर्गेतात्पर्येनोक्तदोषप्रसंगा इति पौर्वापर्यालोचनया प्रकरणानुरोधात् कृदिम।
पिपूर्वकालतामपि परित्यज्य प्रकरणानुगुण्येन ज्योतिः परं ब्रह्म प्रतीयते यत्तूक्तमस्य
ज्योतेरादित्यप्राप्तिरभिहितेति नात्राकामेतिको मोक्षः किंतु कार्यब्रह्मलोकप्राप्तिः न च क्रममु
क्त्यभिप्रायं स्वेन रूपेणाभिनिष्पद्यत इति वचनं न ह्येतत्प्रकरणोक्तं ब्रह्मतत्त्वविद्याया गन्तु
क्रान्तिरस्ति तथा च श्रुतिः न तस्य प्राणा उत्क्रामन्ति अत्रैव समवनीयन्त इति न च तद्द्वारेण
क्रममुक्तिः अर्चिरादिमार्गस्य हि कार्यब्रह्मलोकप्रापकत्वेन तद्ब्रह्मभूयहेतुभावः जीवस्य तनि
रूपाधिविशुद्धब्रह्मभावसाक्षात्कारहेतुके मोक्षे कृतमर्चिरादिमार्गेण कार्यब्रह्मलो
कप्राप्त्या अत्रापि ब्रह्मविदस्तदुपपत्तेः तस्मान्न ज्योतिरादित्यमुपसंपद्य संप्रसादस्य जीवस्य
स्वेन रूपेण पारमार्थिकेण ब्रह्मणाभिनिष्पत्तिरंजसीति श्रुतेरत्रापि शेषः अपि च परं ज्योतिः
स उत्तमः पुरुष इतीहैवोपविशेषो हि पूर्वणात् तेजस्योक्तावशेषप्रकरणविषयत्वेनावस्थापना
त् ज्योतिः पदस्य परमेव ब्रह्म ज्योतिर्नेतत्तेज इति सिद्धं आकाशोऽर्थान्तरत्वादिव्यपदेशात्
परस्याकाशस्तल्लिंगादित्यत्र ब्रह्मलिंगदर्शनादाकाशः परमात्मेति व्युत्पादिते तथापि तद्व
दत्र परमात्मलिंगदर्शनाभावान्नामरूपनिर्वहणस्य भूताकाशेऽप्यवकाशप्रदानेनोपपत्तेरव
स्या स्वरूपपरित्यागस्यायोगात् नामरूपे अन्तरा तद्ब्रह्मेति च नाकाशस्य नामरूपयोर्निर्वहितृ
त्वं न यालत्वमाह अपितु ब्रह्मणस्तेन भूताकाशस्य नामरूपयोर्निर्वहिता ब्रह्मैव तयोरन्तराले

वाच. स्मात्मन लोकसिद्धमनूद्यते तस्य परमात्मभावोऽनधिगतः प्रतिपाद्यते तेन जीवात्मानुवादमात्रप
प्र. तृ. राण्येतानि वचांसि अनधिगतार्थावबोधपराणि हि शास्त्राणि प्रमाणानि न त्वनुवादमात्रनिष्ठानि भवितु
१२२ मर्हन्ति अत एव च संसारिणः परमात्मभावविधानार्थमादिमध्यावसानेष्वनुवादा यतपाव
मर्शा उपपद्यते एवं च महत्त्वं चाजत्वं च सर्वगतस्य नित्यस्यात्मनः संभवात् नापेक्षिकं कल्प
यिष्यते यत्तु मध्ये बुद्ध्यन्ताद्यवस्थोपन्यासादिति तिनानेनावस्थावत्त्वं विवक्ष्यते अपि त्वव
स्थानामुपजनापायधर्मकत्वेन तदतिक्रममवस्थारहितं परमात्मानं विवक्षतीति उपरि
तनवाक्यसंदर्भालोचनादिति पत्यादिशब्देभ्यः सर्वस्य वशी वशः सामर्थ्यं सर्वस्य जगतः
प्रभवाप्ययव्यूहावस्थानसमर्थ इति अत एव सर्वस्येशानः सामर्थ्येन स्य प्रयुक्तेन सर्वस्येष्ट
222 तदिष्टानुविधानाज्जगतः अत एव सर्वस्याधिपतिः सर्वस्य नियन्तान्तर्यामीति यावत् किं
च स एवंभूतो हृद्यन्तर्ज्योतिः पुरुषो विज्ञानमयो न स साधुना कर्मणा भूयानुत्कृष्टो भवती
त्येवमाद्याः श्रुतयोऽसंसारिणं परमात्मानमेव प्रतिपादयन्ति तस्माज्जीवात्मानं मानान्तरसि
द्धमनूद्य तस्य ब्रह्मभावप्रतिपादनपरोऽयं विज्ञानमयः परमादिवाक्यसंदर्भ इति सिद्धं ॥ १२२
इति श्रीवाचस्पतिमिश्रविरचिते शारीरकभगवत्पादभाष्यविभागे भामत्यां प्रथमस्याध्या
यस्य तृतीयः पादः ३
लिखितं नरायणेन भट्टकाश्मीरीक पिप्पलमध्ये संवत् १८७२ मिती आश्विनवदी १२

न्तः कश्चिदत्र नित्यशुद्धमुक्तस्वभावः प्रतिपाद्यः यत्र सुषुप्त्युत्क्रान्त्योः प्राज्ञेनात्मनापरिष्वक्त इति
भेदं मन्यसे नासौ भेदः किं त्वयमात्मशब्दः स्वभाववचनः तेन सुषुप्त्युत्क्रान्त्यवस्थायां विशेषवि-
षयाभावात् संपिंडित इवेति इति यस्मादयं प्राज्ञशब्दः (वाप्य) नत्र तेनात्मना स्वभावेन परिष्वक्तो न किं-
चिद्वेदेत्यभेदेऽपि भेदवदुपचारेण योजनीयं यथाहुः प्राज्ञः संपिंडितप्रज्ञ इति यस्मादयं प्राज्ञशब्दः
कार्यकरणसंघातात्मकस्य जगतो जीवकर्माज्जितत्वात् तद्भोगयतया च योजनीयाः तस्मात् संसा-
र्येवानूद्यते न तु परमात्मा प्रतिपाद्यत इति शास्त्रेण एवं प्राप्त उच्यते सुषुप्त्युत्क्रान्त्योर्भेदेन व्यपदे-
शादित्यनुवर्त्तते अयमभिसंधिः किं संसारिणोऽन्यः परमात्मा नास्ति तस्मात् संसार्य्यात्मपरं योऽय-
विज्ञानमयः प्राणेष्विति वाक्यं आहोस्विदिह संसारिव्यतिरेकेण परस्यात्मनोऽसंकीर्त्तनात् संसा-
रिण एवाद्यमध्यावसानेषु संमर्शात् संसार्यात्मपरं न तावत् संसार्यतिरिक्तं तस्याभावः तत्प्रतिपा-
दकाहि श्रुतशास्त्राणां समाईत्वात् तेन शब्दं गतिसामान्यादित्यादिभिः सूत्रसंदर्भैरुपपादिताः न
चात्रापि संसार्यतिरिक्तमात्मसंकीर्त्तनाभावः सुषुप्त्युत्क्रान्त्योस्तत्संकीर्त्तनात् न च प्राज्ञस्य
परमात्मनो जीवभेदेन संकीर्त्तनं प्रति संभवे राहोः शिर इतिवदौपचारिकं युक्तं न च प्राज्ञशब्दः
ना प्रकर्षशालिनि रूढवृत्तिः कथंचिद्यज्ञविषयाव्याख्यानमुचितः न च प्रज्ञाप्रकर्षोऽसंकु-
चावृत्तिर्विदितसमस्तवेदितव्यात् सर्वविदोऽन्यत्र संभवति न चेत्थंभूतो जीवात्मा तस्मात् सुषु-
प्त्युत्क्रान्त्योर्भेदेन जीवात् प्राज्ञस्य परमात्मनो व्यपदेशाशयोऽयं विज्ञानमय इत्यादिना जीवा।

वाच. भोगायतनपदं शरीरस्योक्तं शरीरस्य प्रान्तत्वोक्तृरूपयाज्ञयायात्मकत्वेनाप्रधानत्वानुपपत्तेः तस्मा
प्र. व. त्प्रधानमेवात्मत्वमस्य च्यवते उक्तिमात्रं तु च्यते नैतदेवं नस्येत्कोऽर्थं वाक्यमिति लौकिकी हि प्रसिद्धी
२२३ रूढिर्वेदार्थनिर्णये निमित्तं तदुपायत्वात् यथाहुः य एव लौकिकाः शब्दास्त एव वैदिकास्त ए
२ व चैषामर्था इति न तु परीक्षकाणां पारिभाषिकी योगरूढिः यो हि मानवेदार्थनिर्णयनिबंधना मि
द्धोषधादिप्रसिद्धिवत् तस्मात्रूढितस्तावत्प्रधानं प्रतीयते योगस्तत्रापि तुल्यः तदेव महत्
श्रुतावव्यक्तमिति द्वाभ्यां प्रकरणपरिशेषाभ्यां शरीरगोचरो यमव्यक्तशब्दः यथा वा सतत्त्वोचर
त्वमुपपद्यते तथा प्रदर्शयिष्यते तेषु शरीरादिषु मध्ये विषयात् तत्त्वोचरान्विद्धि यथा ह्याश्रू
नमात्मनश्चलमेव मिंद्रियहयाः स्वगोचरमात्मयोति आत्मात्माभोक्तेत्याहुर्मनीषिणः कथं इंद्रि
223 यमनोयुक्तं भोगोपयोगो यथा भवति इंद्रियार्थमनःसन्निकर्षेणात्मा गंधादीनां भोक्ता प्रधानस्यांका
त्तावतो वचनं प्रकरणमिति गंतव्यं विष्णोः परमं पदं प्रधानमिति तदाकांक्षामवतारयति ते इंद्रि ।
द्रियादिभिरसंपत्तेविति प्रसंपमाभिधानं व्यतिरेकमुखेन संपमावदातीकारणं परशब्दः श्रेष्ठ
वचनः न तांतरत्वेनुपदिश्रेष्ठत्वं देहेंद्रियाणामेव वादेभ्यो गंधादिभ्यः श्रेष्ठत्वं सादिमतआह उ.
यर्थापेक्षाह्यादय इति तांतरत्वेन श्रेष्ठत्वं अपि तु प्रधानतया तच्च विवक्षाधीनं ग्रहेभ्य इंद्रिये २२३
भ्योऽतिग्रहत्वपाः प्राणानां प्रधान्यं श्रुत्या विवक्षितमितीन्द्रियेभ्यो र्थानां प्रधान्यात् परत्वं भवति २
घ्राणजिह्वावाक्चक्षुःश्रोत्रमनोहस्तत्वचो हि इंद्रियाणि श्रुतौ ग्रहा उक्ताः शब्दस्पर्श

श्रीगणेशाय नमः आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च सा।
देतत् ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मणो लक्षणमुक्तं जन्माद्यस्य यत इति तच्च लक्षणं न प्रधाना
दावगतेर्येन व्यभिचाराल्लक्षणं स्यात् किं ब्रह्मण एव वेदान्तैर्जगत्कारणत्वमिति प्रतिपादितं गतिसामान्या
च्च वेदान्तवाक्यानां ब्रह्मकारणवादं प्रतिविद्यते न प्रधानकारणवादं प्रतीतिप्रपंचितमधस्तनेन।
ग्रंथसंदर्भेण तत्किमपरमवशिष्यते यदर्थमुत्तरः संदर्भ आरभ्यते न च महतः परमव्यक्तमित्या
दीनां प्रधानसमन्वये व्यभिचारः न ह्येते प्रधानं कारणं जगत आहुः अपि तु प्रधानसद्भावमात्रं
न च तत्सद्भावमात्रेण जन्माद्यस्य यत इति ब्रह्मलक्षणस्य किंचिद्धीयते तस्मादनर्थक उत्तरः सं
दर्भ इत्यत आह ब्रह्मजिज्ञासां प्रतिज्ञायेति न प्रधानसद्भावमात्रं प्रतिपादयंति महतः परम
व्यक्तमजामेकामित्यादयः किं तु जगत्कारणं प्रधानमिति महतः परमित्यत्र हि परस्याद्यो विप्र
कृष्टपूर्वकालत्वमाह तथा च कारणत्वं अजामेकामित्यादीनां तु कारणत्वाभिधानमतिस्फुटं ए
वं च लक्षणव्यभिचारात् तदव्यभिचाराय प्रकृत उत्तरसंदर्भारंभ इति पूर्वपक्षयति तत्र य एवेति
सांख्यप्रवादरूढितमाह तत्राव्यक्तमिति सांख्यस्मृतिप्रसिद्धेर्न केवलं रूढिरवयवप्रसिद्ध्याप्यय
मेवार्थोऽवगम्यत इत्याह न व्यक्तमिति शब्दादिरूपादिहीनत्वाच्चेति श्रुतिरुक्ता स्मृति
श्च सांख्यीया पञ्चभेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च कारणकार्यविभागा
दविभागाद्वैश्वरूप्यस्य कारणमस्त्यव्यक्तमिति न च महतः परमव्यक्तमिति प्रकरणपरिशेषा।

वाच॰
प्र॰च॰
१२५
२

सोपपत्तिमाह तथा चेति कार्यमितिच्छांदसो हितोपाल्लोपः सोऽयमतिरोहितार्थः पूर्वपक्षिणोऽनुश-
यबीजनिराकरणपरं सूत्रं सूक्ष्मं तु तदर्हत्वादिति प्रकृतेर्विकाराणामनन्यत्वात् प्रकृतेरव्यक्तत्वं
विकारेऽप्युपचर्यते यथा गोभिः श्रीणीतेति गोशब्दस्तद्विकारे पयसि प्रयुक्तः तत्कारणं तद्विका-
राणामनन्यत्वेनाव्यक्तशब्दार्हत्वे प्रमाणमाह तथा च श्रुतिरिति अव्याकृतमव्यक्तमित्यनर्था-
न्तरं न त्वेवं सति प्रधानमेवाभ्युपेतं भवति सुखदुःखमोहात्मकं जगदेवंभूतादेव कारणाद्भ-
वितुमर्हति कारणात्मकत्वात् कार्यस्य यच्च तत्सुखात्मकं तत्सत्त्वं यच्च तद्दुःखात्मकं।
तद्रजः यच्च तन्मोहात्मकं तत्तमः तथा चाव्यक्तं प्रधानमेवाभ्युपेतमिति शंकानिराकरणा-
र्थं सूत्रं तदधीनत्वादर्थवत् प्रधानं हि सांख्यानां सेश्वराणामनीश्वराणां वा ईश्वरात्तदेतत्त्वेभ्यो
वा वस्तुतो भिन्नं स्वभावतो निर्वर्त्तकं ब्रह्मणस्त्वियमविद्याशक्तिर्मायादिशब्दवाच्या न शक्यानान्यत्वेन
वा निर्वक्तुं इदमेवास्या अव्यक्तत्वं यदनिर्वाच्यत्वं नाम सोऽयमव्याकृतवादस्य प्रधानवादात् भेदः
अविद्याशक्तेरीश्वराधीनत्वं तदाश्रयत्वात् न च द्रव्यमात्रमशक्तेः कार्योपालमिति शक्तेरर्थव-
त्वं तदिदमुक्तमर्थवदिति स्यादेतत् यदि ब्रह्मणोऽविद्याशक्त्या संसारः प्रतीयते हन्त मुक्ताना- उ॰
मपि पुनरुत्थानप्रसंगः तस्याः प्रधानवत्तादवस्थ्यात् तद्धिनाशो वा समस्तसंसारोच्छेदस्तन्मू- १२५
लाविद्याशक्तेः समुच्छेदादित्यत आह मुक्तानां च पुनरनुत्पत्तिः कुतः विद्यया तस्या बीजशक्ते-
र्दाहात् अयमभिसंधिः न वयं प्रधानवदविद्यां सर्वजीवेष्वेकामाचक्ष्महे येनैवमुपालभ्ये- २

224

कुर्वंतीति वक्तव्ये तानि पुरुषपशुमिति न चैतानि रूपतो वशीकर्तुमुत्सहंते यावदस्मै पुरुषपशवे गं
धरसनामरूपशब्दकामकर्मस्पर्शान्नोपहरंति अत एव गंधादयोष्टावतिग्रहाः तदुपहारेण ग्र।
हाणां ग्रहत्वोपपत्तेः तदिदमुक्तं इंद्रियाणां ग्रहत्वं विषयाणामतिग्रहत्वमिति श्रुतिप्रसिद्धेरिति
ग्रहत्वेनेंद्रियैः साम्येपि मनसः स्वगतेन विशेषणोर्थेभ्यः परत्वमाह विषयेभ्यश्च मनसः पर
त्वमिति कस्मात्त्वनारब्धित्वेनोपलिप्सोः शृणु तदुत्तरमत्याहात्मग्राह्यादिति तत्त्वमभिज्ञानादिम
र्थः श्रेष्ठत्वे हेतुमाह भोक्तुश्चेति तदनेन जीवात्मा स्वामितया महानुक्तः अथवा श्रुतिस्मृति
भ्यां हैरण्यगर्भी बुद्धिरात्मशब्देनोच्यत इत्याह अथवेति पूर्विति भोग्यजातस्य बुद्धेरधिकर
णमिति बुद्धिः पूः तदेवं सर्वासां बुद्धीनां प्रथमजा हिरण्यगर्भबुद्ध्येकनीडतया हिरण्यग
र्भबुद्धेर्महत्त्वं च आपन्नात्मत्वं च अत एव बुद्धिमात्रात्पृथक्करणमुपपन्नं नन्वेतस्मिन्पक्षे
हिरण्यगर्भबुद्धेरात्मत्वात्तद्रूपिण आत्मनो भोक्तुर्भोगोपादानमिति न रूपमात्रं परिशिष्यते
अपि तु रूपवानपीति अत आह एतस्मिंस्तु पक्ष इति यथा हि समारोपितप्रतिबिंबविंबवानेव
स्तुतोभिद्यते तथा न परमात्मनो विज्ञानात्मा वस्तुतोभिद्यत इति परमात्मैव रूपवानिहोपात्तः
तेन रूपमात्रं परिशिष्टमिति अथ रथादिरूपकल्पनायाः शरीरादिषु किं प्रयोजनमित्यत आ
ह शरीरेंद्रियमनोबुद्धिविषयवेदनासंयुक्तस्य हीति वेदना सुखाद्यनुभवः प्रत्यर्पमेवतो।
तिप्रत्यगात्मेहाभिमतः तस्य ब्रह्मावगतिः न च जीवस्य ब्रह्मत्वमानात्तत्सिद्धये नानाय

वाच० प्र० १२५ ३

स्यपि शरीरवदिन्द्रियादीनामिति गोबलीवर्दवदनतद्रूपत्वं आचार्यदेशीयमतमाह अन्ये त्विति
एतद्दूषयति नैतदिति प्रकरणपाठविशेषस्य पौरुषेयपत्रत्वस्यत्वात् नैकग्रहणनियमहेतुत्वमिति
शंकते आम्नातस्यार्थमिति अव्यक्तपदमेव स्थूलशरीरव्यावृत्तिहेतुर्व्यक्तत्वात्तस्येति शंकार्थः
निराकरोति नैकवाक्यताधीनत्वादिति प्रकृतहीनाप्रकृतप्रक्रियाप्रसंगेन एकवाक्यत्वे संभव
ति न वाक्यभेदो युज्यते न चाकांक्षां विनैकवाक्यत्वमुभयं च प्रकृतमित्युभयं यासत्ते नेहाकांक्षि
तमित्येकाभिधायकमपि पदं शरीरद्वयपरं न च सूक्ष्मस्यापावृत्त्यात्तत्परमित्यौपचारिकं भवति
यथोपहितत्वमात्रनिराकरणे कांक्षायां काकपदं प्रयुज्यमानं श्वादिसर्वोपहंतृपरं विज्ञायते यथा
225 क्रः काकेभ्यो रक्ष्यतामन्नमिति बालोपि चोदितः उपघातप्रधानत्वात् तत्स्वादिभ्यो न रक्षतीति न
ननु न शरीरद्वयस्याकांक्षा किंतु शोधितात्सूक्ष्मस्यैव शरीरस्य न तथा ह्यैहिकस्य स्थूल।
स्यतद्धि दृष्टीभूतस्तत्पालकं वैराग्यविषयत्वेन शोधयितुमिष्टमत आह नचैवमंतव्यमिति
विष्णोः परमं पदं अवगमयितुं परं परमत्र प्रतिपाद्यत्वेन प्रस्तुतं न तु वैराग्याय शोधनमिष्ट
र्थः अलं वा विवादेन भवतु सूक्ष्ममेव शरीरं परिशोध्यं तथापि न सांख्याभिमतमत्र प्रधानेप उ०
रमित्यभ्युपेत्याह सर्वथापीति तेषां तावच्चनाच्च इतोपि नायमव्यक्तशब्दः सांख्याभिमतप्र १२५
धानपरः सांख्यैः खलु प्रधानाद्विवेकेन पुरुषनिःश्रेयसाय ज्ञातव्यत्वाविभूतयेवा प्रधानं ज्ञेयत्वेनो
पदिश्यते न चेह ज्ञानीयादितिचोपासीतेति वा विधिविभक्तिश्रुतिरस्ति अपितु व्यक्तपदमा ३

यदि किं त्वयं प्रतिजीवं भिद्यते तेन यस्यैव जीवस्याविद्योत्पन्नज्ञानात् तस्यैवाविद्या ऽपनीयते न जीवान्तरे
भिन्नाधिकरणयोर्विद्याविद्ययोरविरोधात् तत्कृतः समस्तसंसारोच्छेदप्रसंगः प्रधानवादिनां ह्येष दो
षः प्रधानस्यैकत्वेन तदुच्छेदे सर्वोच्छेदो नतूच्छेदे वा न कस्यचिदिति अनिर्मोक्षप्रसंगः प्रधानाभेदेपि च
तदविवेकख्यातिलक्षणाविद्यासदसत्वनिबंधनौ बंधमोक्षौ तर्हि कृतं प्रधानेन अविद्यासदसद्भा
वाभ्यामेव तदुपपत्तेः नचाविद्योपाधिभेदाधीनो जीवभेदो जीवभेदाधीनश्चाविद्योपाधिभेद
इति परस्पराश्रयात् उभयासिद्धिरिति सांप्रतं अनादित्वात् बीजांकुरवदुभयसिद्धेः अविद्यात्व
मात्रेण चैकत्वोपचारो ऽव्यक्तमिति चाव्याकृतमिति वेति नन्वेवमविद्यैव जगद्बीजमिति कृत
मीश्वरेणेत्यत आह परमेश्वराश्रयेति न ह्यचेतनं चेतनानधिष्ठितं कार्याय पर्याप्तमिति स्वकार्य
कर्तृपरमेश्वरं निमित्ततयोपादानतया चाश्रयते प्रपंचविभ्रमस्य हीश्वराधिष्ठानत्वमहिविभ्र
मस्येव रज्ज्वधिष्ठानत्वं तेन यथाहिविभ्रमो रज्जूपादान एवं प्रपंचविभ्रम ईश्वरोपादानः तस्मा
त् जीवाधिकरणाप्यविद्या निमित्ततया विषयतया वेश्वरमाश्रयत इतीश्वराश्रयेत्युच्यते न त्वा
धारतयाविद्यास्वभावे ब्रह्मणि तदनुपपत्तेरिति अत एवाह यस्यां स्वरूपप्रतिबोधरहिताः शेर
ते संसारिणो जीवा इति यस्यामविद्यायां सत्यां शेरते जीवाः जीवानां स्वरूपं वास्तवं ब्रह्म तद्बोध
रहिताः शेरत इति लय उक्तः संसारिण इति विक्षेप उक्तः अव्यक्ताधीनत्वाज्जीवभावस्येति
यद्यपि जीवाव्यक्तयोरनादित्वेनानियतपौर्वापर्यं तथाप्यव्यक्तस्य पूर्वत्वं विवक्षित्वेदमुक्तं स

वाच. प्र.च. १२६ ३ वात्मत्वभेदाभिप्रायं वात्मत्वञ्च जीवपरमात्मनोरभेदः स तु तत्त्रयमुपन्यासेन भगवता भाष्यकारे
णदर्शितः तथा जीवविषयस्यास्तित्वप्रश्नस्येत्यादि येयं प्रेते इति हि नचिकेतसः प्रश्नमुपक्रम्य
तन्नकामविषयमलोभं चास्य प्रतीत्य मृत्युर्विद्याभीप्सिनं नचिकेतसं मन्य इत्यादिना नचिकेतसं
प्रशस्य प्रश्नमपि तदीयं प्रशंसन्नस्मिन्नस्मै ब्रह्मैवोत्तरमुवाच तं दुर्दर्शमिति यदि पुनर्जीवा
त्मनो भिद्येत जीवगोचरः प्रश्नः प्राज्ञगोचरं चोत्तरमिति किं केन संगच्छेत अपि च यद्विषयं
प्रश्नमुपक्रम्य मृत्युनैवं प्रशंसितो नचिकेता पदितमेव भूयः पृच्छेत तदन्तरे चावदध्यात्ततः
प्रशंसाहर्षपर्यासात् प्रश्नान्तरे त्वसावस्थाने प्रसारितासमसहर्षपर्यासादिमाह यस्मिन्नस्मीय
226 त्ययः शेषमतिरोहितार्थं महद्वच्च अनेन सांख्यप्रसिद्धेर्वैदिकप्रसिद्ध्याविरोधात् न सांख्यप्र
सिद्धेर्वेदस्यादर्शयोग्युक्ता सांख्यानां महत्तत्त्वं सत्तामात्रं पुरुषार्थक्रियाक्षमं सत्त्वस्य भावः सत्ताऽत
न्मात्रं महत्तत्त्वमिति यावान्वस्तु पुरुषार्थक्रियाशब्दाद्युपभोगलक्षणा च सत्त्वपुरुषान्यताख्याति
लक्षणा च सा सर्वा महति बुद्धौ समाप्यत इति महत्तत्त्वं सत्तामात्रमुच्यत इति च महदविशेषा
त् अन्नाशब्दोपयपि बुद्ध्यागमापाकृतलक्षणाप्यध्यात्मविद्याधिकारान्न तत्र वर्तितुमर्हतीति तस्मा उ.
दैवसंभवात् योगेनवर्तनेपि लब्धः तत्र किं स्वतन्त्रं प्रधानमनेन मन्त्रवर्णेनोच्यतामुत पारमे १२६
श्वरी मायाशक्तिः तेजोबन्नव्याक्रियाकारणमुच्यतां किं तावत्प्राप्तं प्रधानमेवेति तथा हि । ३
यादृशं प्रधानं सांख्यैः स्मर्यते तादृशमेवास्मिन्मन्त्रे नानतिरिक्तं प्रतीयते सा हि प्रधानलक्षणा

त्रं न चैतावता सांख्यस्मृति प्रत्यभिज्ञानं भवतीति भावः ज्ञेयत्वावचनस्यासिद्धिमाशंक्य तत्सिद्धिं प्रद
र्शनार्थं सूत्रं वदतीत्येतत्प्राप्तौ हि प्रकरणात् निगदव्याख्यातमस्य भाष्यं त्रयाणामेव चैवमुपन्या।
सः प्रश्नश्च वरप्रदानोपक्रमा हि मृत्युनचिकेतःसंवादवाक्यप्रवृत्तिरासमाप्तेः कठवल्लीनां लक्ष्य
ते मृत्युः किल नचिकेतसे कुपितेन पित्रा प्रहिताय त्रीन्वरान्प्रददौ नचिकेतास्तु प्रथमेनव
रेण पितुः सौमनस्यं वव्रे द्वितीयेनाग्निविद्यां तृतीयेनात्मविद्यां वराणामेष वरस्तृतीय इति व
चनात् न तु तत्र वरप्रधाने प्रधानगोचरे ऽतः प्रश्नप्रतिवचने तस्मात्कठवल्लीष्वग्निजीव
परमात्मपरैव वाक्यप्रवृत्तिः न त्वप्रक्रान्तप्रधानपरा भवितुमर्हतीत्याह इतश्च न प्रधानं।
स्याव्यक्तशब्दवाच्यत्वमिति हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं इत्यनेन व्यवहितं जीव
विषयं यथा तु मरणं प्राप्यात्मा भवति गौतमेत्यादि प्रतिवचनमिति योजना अत्राह चोदकः
किं जीवपरमात्मनोरेक एव प्रश्नः किं वान्यो जीवस्य येयं प्रेते मनुष्ये इति प्रश्नोऽन्यश्च परमात्म
नोऽन्यत्र धर्मादित्यादि एकत्वे सूत्रविरोधस्त्रयाणामिति भेदे तु सौमनस्याग्न्यात्मज्ञा
नविषयवरत्रयप्रदानानन्तर्भावो ऽन्यत्र धर्मादित्यादेः प्रश्नस्य तुरीयवरान्तरकल्पनायां वा
तृतीय इति श्रुतिबाधप्रसंगः वरप्रधानानन्तर्भावे प्रश्नस्य तदुत्तप्रधानाख्यानमप्यनन्तर्भू
तं वरप्रदाने ऽस्तु महतः परमव्यक्तमित्यादेरपि परिहरति अत्रोच्यते नैवं वयमिहेति वस्तु।
तो जीवपरमात्मनोरभेदात्तदेकत्वाभेदेन एक एव प्रश्नः अत एव प्रतिवचनमप्येकं सूत्रं त

वाच॰ प्र॰ १२२ ५ वेकमबुध्यमाना बुद्धिस्तमेव विपर्यासेनाविद्यया बुद्धिस्थानसत्त्वादीनात्मन्यभिमन्यमाना सत्त्वादिमती
व भवति तदिदमुक्तं सा वीङ्गः स्त्रीभूतोऽहमिति मविवेकितया संसरत्येकः सत्त्वपुरुषान्यताख्यातिसम्
नृत्तिं त निखिलं त्या सन्ताविद्यानुबन्धस्त्वभोजहात्येनां प्रकृतिं तदिदमुक्तमन्यः पुनर्विरति भुक्तभो ।
गामिति व्याचष्टे कृतभोगापवर्गां शब्दाद्युपलब्धिर्भोगः गुणपुरुषान्यताख्यातिरपवर्गः अ
पवृज्यते हि तया पुरुष इति एवं प्राप्ते अभिधीयते नतावदजो ह्येको जुषमाणोऽनुशेते जहात्येनां भु
क्तभोगामजोऽन्य इत्येतदात्मभेदप्रतिपादनपरं अपितु सिद्धमात्मभेदमनूद्य बन्धमोक्षौ प्रतिपा
दयति सचानूदितोऽभेद एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मेत्यादि श्रुतिभिरा
त्मैकत्वप्रतिपादनपराभिर्विरोधात् काल्पनिको व्यतिष्ठते तथा च मन्त्रः साङ्ख्यप्रक्रियाप्रत्यभिज्ञा
127 नमित्यजावाक्यं च समस्त्वार्थवत्परिप्लवमानं न स्वतन्त्रप्रधाननिश्चयाय पर्याप्तं तदिदमुक्तं सू
त्रकृता चमसवदविशेषादिति उत्तरसूत्रमवतारयितुं शङ्कते तत्र त्विदं तच्छिर इति सूत्रमवता
रयति अत्र ब्रूमः ज्योतिरुपक्रमा तु तथा ह्यधीयत एके सर्वथा वाक्यान्वयमेकं ब्रह्मेति स्थितौ ।
सत्यां तरोहितादिगुणयोगिनी तेजोबन्नलक्षणा प्रजा अण्डजस्वेदजोद्भिज्जचतुर्विधभू दु॰
तग्रामप्रकृतिभूतेयमजा प्रतिपत्तव्या रोहितशुक्लकृष्णामिति रोहितादिरूपतया तस्या एव प्र १२२
त्यभिज्ञानात् ननु सांख्यपरिकल्पिता प्रकृतिः तस्याप्रमाणिकत्वात् श्रुतहान्यश्रुतकल्प
नाप्रसङ्गात् रञ्जनादिना च रोहितादिरूपचारस्य सति मुख्यार्थसंभवेऽयोगात् तदिदमुक्तं रो ५

प्रकृतिर्न्नाम तदुक्तमजामेकां च लोहितशुक्लकृष्णां चयद्यपि लोहितत्वादयो वर्णेन रजःप्रभृतिषु
संति तथापि लोहितं कुसुंभादि रंजयति रजोपि रंजयतीति लोहितं एवं प्रसन्नं पाथः शुक्लं सत्वम
पि प्रसन्नमिति शुक्लं एवमावरकं मेघादि कृष्णं तमोप्यावारकमिति कृष्णं परेणापि नाव्याकृत
स्यस्वरूपेणालोहितत्वादियोगाख्यस्यापः किंतु तत्कार्यस्य तेजोवन्नस्य रोहितत्वादिकारणे उपचर
णीयं तस्मादेकमपि तत्वं अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्य इति वया
त्मभेदश्च वर्णत्सांख्यैस्तेरेवान्नैवार्णे प्रसभिहितानंतत्वव्याकृतशक्तिरूपाः तस्मादेकात्माभ्यु
पगमेनात्मभेदाभावात् तस्मात्स्वतंत्रं प्रधानं नाम्नाह्वमिति प्रान्नलेषां साम्यावस्थायश्च वयवध
र्मैरिति अवयवाः प्रधानस्यैकस्य सत्वरजस्तमांसि तेषां धर्मा रोहितत्वादयः तैरिति प्रज्ञास्त्रिगु
णान्विता इति सा विबद्धः स्वमोहात्मिकाः तथाहि मे नदार्वःपुनर्म्मदापामेत्र सत्वहेतनकस्पहेतोः
तं प्रति सत्वसमुद्भवात् तथा चतत्सपत्नीनोरुःखितनकस्पहेतोर्ज्ञाः प्रतिरजःसमुद्भवात् तथा
चैषमत्तामविंदतो मोहो विषादः सकस्पहेतोस्तं प्रतितमसमुद्भवादिति न मंदपाचसर्वे भावा
व्याख्याताः तदिदमेतत्रैगुण्यमन्वितलयज्ञानं अन्तुपोतदिति व्याचष्टे तामेवाविद्ययेति वि
षयादिहिशद्वादयः प्रकृतिविकारास्त्रैगुण्येन सा विद्धः स्वमोहात्मानः इति यः मनो हंकारश्चेणं।
तिकयात्रुद्धिसत्वपसंज्ञामप्तितनतद्बुद्धिसत्वंप्रधानविकारः सावद्धः स्वमोहात्मकाश्च
ष्टादिरूपेण परिणामते चितिशक्तिस्तु परिणामिन्य प्रतिसंक्रमापि बुद्धिसात्वादाम्मनोवि

वाच·
प्र·व·
१२८
६

128

वात् तस्माद्योगेनात्र योगशास्त्राक्षेपः नयाहृष्टस्य कथं चिन्तनेप्युक्ताक्षेपः तत्रापि किं पंचप्राणा इत्यो
वाक्यशेषतामालविवक्षितास्तत्तदितिविज्ञाग्रमप्येवं केचित् तत्रपौर्वापर्यपर्यालोचनया
कारवेमाधप्रदिनवाक्ययोर्विरोधात् एकत्र हि ज्योतिषां पंचत्वं श्रुतं नेतरत्र नच षोडशिग्र
हणाग्रहणवद्विकल्पसंभवोऽनुष्ठाने हि विकल्पते न वस्तुनि वस्तुतत्त्वकथा चेयं नानुष्ठानक
थाविषयभावात् तस्मात्कानि चिदेव तत्त्वानीह पंच प्रत्येकं पंचसंख्यायोगीनीति पंचविंश
तितत्त्वानि भवंति सांख्यैश्च प्रकृत्यादीनि पंचविंशतितत्त्वानि स्मर्यंते इति तान्येवानेन मं
त्रेणोच्यंत इति नाशंकनीयं प्रधानादि नचाधारत्वेनात्मनो व्यवस्थानात् तस्यात्मनि चाधारा
धेयभावस्य विरोधात् आकाशस्य च व्यतिरेकात् त्रयोविंशतिर्जना इति स्यात् न पंचपं
चजना इति वाच्यं सत्यप्याकाशात्मनोर्व्यतिरेचने मूलप्रकृतिभागैः सत्त्वरजस्तमोभिः पंचविं
शतिसंख्योपपत्तेः तथा सत्यात्माकाशाभ्यां सप्तविंशतिसंख्यायां पंचविंशति तत्त्वानीति स्व
सिद्धांतव्याकोप इति चेत् न मूलप्रकृतित्वमात्रेणैकीकृत्य सत्त्वरजस्तमांसि पंचविंशति
तत्त्वोपपत्तेः हि तत्स्वभावेन तेषां सप्तविंशतित्वाविरोधः तस्मान्नानाशास्त्रीयसांख्यस्मृतिरिति उ
श्रान्तं मूलप्रकृतिः प्रधानं नामासावन्यस्य विकृतिः अपि तु प्रकृतिरेव तदिदमुक्तं मूलेति १२८
महदहंकारपंचतन्मात्राणि प्रकृतिश्च विकृतिश्च महत्तत्त्वमहंकारस्य तत्त्वांतरस्य प्रकृतिः ६
मूलप्रकृतेस्तु विकृतिः एवमहंकारतत्त्वं महतो विकृतिः प्रकृतिश्च तदेवतामसं सत्

दित्थादीनां याद्दच्छानामिति अत्रापदस्य च समुदायप्रसिद्धिपरित्यागेन नापत्तेरवयवप्रसिध्याश्रयणे
दोषप्रसंगात् अतत्त्वरूपककल्पनया समुदायप्रसिद्धेरेवानपेक्ष्या:स्वीकारात् अपि चायमपि
श्रुतिकलापो:स्मदर्थानानुगुण्येन सर्वाप्यस्य मनुगुण इत्याह तथेहापीति किंकारणं अयमनुप
क्रमेति अस्मत्स्वरूपेणावतत् जगत्कारणेन भवति विशुद्धत्वात्तस्य पयायु: युक्तघसवचशुद्धस्य ना
शुद्धा विकृतिर्भवेत् उमायामयवतीमंश्रुतिः एष्टुति किंकारणं पश्यब्रह्मन गच्छन्तीति तत्किंकारणं
अस्मैत्यर्थः तेअस्माविशेषत्वान न योगेनात्मानं गताः यास्मात्प्रपर्यंनितिपोजना योयोनिंयोनिमि ।
ति अविद्याशक्तियोनिः सा च प्रतिजीवं नानेत्युक्तं अतोवीप्सोपपन्ना शेषमतिरोहितार्थं सूत्रांत
रमवतारयितुं शंकते कथं पुनरिति अत्राकृतिः जातिः तेजोवन्नेषु नास्ति न च तेजोवन्नानां ज
न्मश्रवणाद् जन्मनिमित्तोपपन्नाशाद्ः संभवतीत्याह न च तेजोवन्नानामिति सूत्रमवतारयति
अतउत्तरं पठति कल्पनोपदेशाच्च मध्वादिवदविरोधः नन्विंद्यागानोहितं यत्स्येकस्यैव
अन्याहर्ष्यीनामपिद्यागानामुपलंभादित्यत आह यद्दृष्टयेति वक्रवर्कराव कृषणावशेषनिग
दर्शयात्यांतं न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च अर्थान्तरसंगतिमाह एवं परिहृतेपी
ति पंचजना इति समासार्थः पंचसद्रव्यपासंबंध्यते न च दिक्संख्ये संज्ञायामिति समासवि
धानान्मनुजे पुत्रे लोपे पंचजनशाह्व इति वाच्यं तथा हि पंच मनुष्या इति स्यात् एवं चात्मनि पं
च मनुष्याणामाकाशस्य च प्रतिष्ठानमिति निस्तात्पर्यं सर्वस्यैव प्रतिष्ठानात् तस्मादूद्धेरसंभे

वा॰ प॰ रुक्तंत्रत्रापाचयाहइतिननुभवतुसमासः तथापिकिमिष्यतइत्यत आह समस्तत्वाच्चेति अपिचवीप्सा
प्र॰ च॰ यांपंचकद्वयग्रहणेदोषोवतत्वाभीतिनसंख्यास्मृतिप्रत्यभिज्ञानमित्यसमासमभ्युपेत्याह नच
१२६ द्वयग्रहणंपंचपंचेति नचैकापंचसंख्यापंचसंख्यांतरेणशक्याविशेषयंपंचपाहुस्ससंख्यो
२ पसर्जनेनद्व्यवचनत्वेनसंख्यायाउपसर्जन(द्व्यवचन)तयाविशेषणेनासंयोगादित्याह ए
कस्याःपंचसंख्यायाइति तदेवंपूर्वपक्षैकदेशिनिदूषितेपरमपूर्वपक्षिणमुत्थापयति
नन्वापन्नपंचसंख्याजनताएवेति अवचनावतरत्वेसमानयोगःसंभवतीतिवृत्तौतथापियो।
गिकंपंचजनत्वाद्यमभ्युपेत्यदूषयति प्रकृतेपन्नपंचपूलीपाहुस्सेति पंचपूलीमंत्रयद्यपिएष
पकृत्वेकार्थसमवायिनीपंचसंख्यावच्छेदिकास्तितथापीयंसमुदायिनोऽवच्छिनत्ति नतुसमु
दायंसमासपदार्थं अतःतस्मिन्कल्पितेसमुदायारंभपेक्षायांपक्षांतराभिहितापंचसंख्यासं
229 बध्यते पंचेति पंचजनाइत्यत्रतुपंचसंख्यायोग्यतानिमित्तयोजनानामवच्छिन्नत्वात् समुदाय
स्यचपंचपूलीवदप्रतीतेर्नपदांतराभिहितासंख्यासंबध्यते स्यादेतत्संख्येयानांजनानां
मामाभूत्तथापिअंतरवाच्यसंख्यावच्छेदः पंचसंख्यायास्तुतयावच्छेदोभविष्यति नहिसा उ॰
प्यवच्छिन्नेत्यतआह भवतपीदंविशेषणमिति उक्तोत्रदोषः नह्युपसर्जनंविशेषणेन १२६
युज्यते पंचपाहुएवतावत्संख्योपसर्जनसंख्यामाहविशेषणतत्त्वपंचजनाइत्यत्रस २
मासेविशेषणापेक्षायांतुनसमासःस्यादसामर्थ्यात् नहिभवतिऋद्धस्यराज्ञःपुरुष

तन्मात्राणां तदेव सात्विकं सत्त्वकृतिरेकादशेंद्रियाणां एव तन्मात्राणि चाहंकारस्य विकृतिरा
काशादीनां पंचानां प्रकृतिः तदिदमुक्तं महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु षो
डशसंख्यावच्छिन्नो गणो विकार एव पंचभूतान्येकादशेंद्रियाणीति षोडशको गणस्य
यपि पृथिव्यादयो गोघटादीनां प्रकृतिस्तथापि न ते पृथिव्यादिभ्यस्तत्त्वांतरमिति न प्रकृ
तिः तत्त्वांतरोपादानत्वं चेह प्रकृतित्वमभिमतं नोपादानमात्रत्वमित्यविरोधः पुरुषस्तु
कूटस्थनित्योऽपरिणामी न कस्यचित्प्रकृतिर्नापि विकृतिरिति एवं चाभिधीयते न सं
ख्योपसंग्रहादपि प्रधानादीनां श्रुतिमत्त्वप्रत्याशा कर्तव्या कस्मात् नानाभावात् नाना
ह्येतानि पंचविंशतितत्त्वानि नैषां पंचपंचशः पंचशः साधारणो धर्मोऽस्ति न खलु सत्त्वरजस्त
मोमहदहंकाराणामेकः क्रियागुणो वा द्रव्यं वा जातिर्वा धर्मः पंचतन्मात्रादिभ्यो व्यावृत्तः
सत्त्वादिषु चानुगतः कश्चिदस्ति नापि पृथिव्यप्तेजोवायुप्राणानां नापि रसनचक्षुः त्वक्
श्रोत्रवाचां नापि पाणिपादपायूपस्थमनसां येनैकेन साधारणेनोपगृहीताः पंचपंचकाः
भवितुमर्हंतीति पूर्वपक्षैकदेशिनमुत्थापयति अथ पंचैव तत्पंचविंशतिसंख्योपमिति पृथ
गपि परस्परं संख्यायोगोऽवांतरसंख्याद्विकाद्येका नास्ति तथापि तत्पूर्वतस्याः संभवात् पौर्वा
पर्यलक्षणायाः प्रत्यासत्त्याः परसंख्योपलक्षणार्थं पूर्वसंख्योपन्यास इति दूषयति अपि च
वास्मिन्नपदेऽक्षेपइति न च पंचशब्दो जनपदेन हि समस्तः शाकपार्थिववत्कमित्याह प

वाच॰
प्र॰
२३०

230

नां वाक्यशेषगतानामपि ग्रहणमिति मां प्रत्यविरोधेऽपि तत्सत्वतयायोऽपि ग्रहणाग्रहणवद्विक
ल्पोपपत्तेः नचैवं वस्तुस्वरूपकथापि तदुपासनानुष्ठानविधिः मननमेवानुष्ठेयमिति विधिश्रव
णात् कथं पुनः प्राणादिषु जनशब्दप्रयोग इति जनवाचकः शब्दो जनशब्दः पंचजनशब्दो रू
ढ इति यावत् तस्य कथं प्राणादिषु जनेषु प्रयोग इत्याक्षेप अन्यथा प्रयस्तुमितावयवार्थे
समुदायशब्दार्थे जनशब्दार्थो नास्तीत्यपर्यनुयोग एव तद्वत्परित्यागे नैव वृत्तं तरं दर्शयति न
न संबंधाच्चेति जनशब्दभाजः पंचजनशब्दभाजः न तु समासमवयवप्रसिद्धो समुदायशक्ति
कल्पनमनुपपन्नं संभवति च विंशत्यां तत्त्वेष्ववयवप्रसिद्धिरित्यत आह समासबलाच्चेति स्यादे
तत् समासबलाच्चेत् रूढिं यात्स्यो यते हंत न दृष्टस्तर्हि तत्र प्रयोगोऽश्वकर्णादिवत् वृक्षादिषु त
थात्वलोकप्रसिद्ध्यभावात् न रूढिविरमाद्धि पतितकथं पुनरसतीति जनेषु तावत्पंचजनश
ब्दस्य प्रथमप्रयोगो लोके दृष्ट इति प्रसिद्धप्रथमप्रयोग इत्यसिद्धमिति स्थिते यो युक्तायानभिधा
या अभ्युपेत्य प्रथमप्रयोगाभावं समाधत्ते यथा कोद्भिदादिवदिति आचार्यदेशीयानां मतभे
देष्वपि न पंचविंशति तत्त्वानि सिध्यंति परमार्थतस्तु पंचजनवाक्यशेषगता एवैतायापेना उ॰
ह केचिदितिति शेषमतिरोहितार्थं कारणत्वेन चाकाशादिषु समन्वयव्यपदिष्टोक्तेः अथ २३०
समन्वयलक्षणे के यमकांडे विरोधाविरोधचिंता भविता हि तस्यास्थानमविरोधलक्ष
णे इत्यत आह प्रतिपादितं ब्रह्मण इति अयमर्थः नानेकशाखागततत्तद्वाक्यालोच

इति सांख्येतत्त्वेनासामर्थ्यादित्यर्थः अतिरेकाच्चेत्यप्युक्तपमात्रं यदि सत्त्वरजस्तमांसि पृथक्
नैनैकीकृत्यात्माकाशौ तत्त्वेभ्यो व्यतिरिच्येते तदातिरेकदोषः अथ तु सत्त्वरजस्तमांसि ।
मिथो भेदेन विवक्ष्यन्ते तथापि वस्तुतत्त्वव्यवस्थापनेऽत्राधारत्वेनात्मानिकृष्यतां आधेयपं
तरेण त्वाकाशस्याधेयस्य व्यतिरेचनं मन्तव्यं कथमिति गणमपि तत्पंचकं पंचसंख्यामात्रश्रवणेन स
तीति दिक्संख्ये संज्ञायामिति संज्ञायां समासस्मरणात् पंचजनशब्दस्तावदयं क्वचिन्निरूढः
न तु रूढौ सत्यां अवयवप्रसिद्ध्यर्थग्रहणं सापेक्षत्वात् निरपेक्षत्वात् च रूढेः तद्यदि रूढौ संख्यायो ।
गः प्राप्यते ततः स एव गृहीतव्योऽपंचत्वसंख्यान्वयो संबन्धार्हः पूर्वापरवाक्याविरोधी वा ततो रू
ढ्युपरित्यागेनैवावयवार्थान्तरेण योगार्थान्तरं कल्पयित्वा वाक्यमनुपपादनीयं यथा श्येनेनाभिचरन् य
जेतेति श्येनशब्दः शकुनिविशेषे निरूढवृत्तिः तदपरित्यागेनैव निपातादिसादृश्येनार्थवा
दिकेन क्रतुविशेषे वर्तते तथा च पंचजनशब्दोऽवयवार्थयोगानपेक्षः एकस्मिन्नपि वर्तते यथा
सप्तर्षिशब्दो वसिष्ठ एकस्मिन्नप्रवर्तते न चैषां तत्त्वे रूढः पंचविंशतिसंख्यानुरोधेन
तत्त्वे प्रवर्तयितव्यः रूढौ सत्यां पंचविंशतिरेव संख्यायां प्रभावात् कथं तत्त्वे प्रवर्तते एवं च के
ते पंचजना इत्यपेक्षायां किं वाक्यशेषगताः प्राणादयो गृह्यन्ता उत पंचविंशतिस्तत्त्वानीति वि
षये तत्त्वानामप्रामाणिकत्वात् प्राणादीनां च वाक्यशेषे श्रवणात् तत्परित्यागे श्रुतहानमश्रुत
कल्पनाप्रसंगात् प्राणादय एव पंचजनाः न च काण्वमाध्यंदिनपाठविरोधात् न प्राणादी

भाव॰
प्र॰च॰
२३२
श्री

232

दस्ति सृष्टिक्रमे विगानं श्रुतीनामविरोधात् तथा ह्यनेकशिल्पपर्यवदातो देवदत्तः प्रथमं चक्राद
ण्डादिकारणमुत्पाद्य तदुपकरणः कुंभं कुंभोपकरणस्त्वाहरत्युदकं उदकोपकरणश्च संयुव
नेन गोधूमकणिकानां करोति पिंडं पिंडोपकरणस्तु पचति हुतभुर्जेन तदस्य देवदत्तस्य सर्वं चै
तस्मिन्कर्तृत्वात्तथा कथं वक्तुं देवदत्ताच्चक्रादि संभूतं तस्माच्चक्रादेः कुंभादीति यथा कथं च देवदत्ता
त्कुंभः समुद्भूतः तस्मादुदकाहरणादीत्यादि न स्वतंत्रसंभवः सर्वत्रास्मिन्कार्यजाते क्रमवतस्य
पि देवदत्तस्य सर्वत्र कर्तृत्वेन स्मृतत्वात् तथेहापि यद्यप्याकाशादिक्रमेणैव सृष्टिस्तथाप्याकाशा
दिक्रमेणैव नलानिलादेस्तत्र तत्र साक्षात्परमेश्वरस्य कर्तृत्वात्तथा कथं वक्तुं परमेश्वरादाकाशः
संभूत इति यथा कथं च वक्तुं परमेश्वरादनलः संभूत इत्यादि यद्यपि तैत्तिरीयकाद्युक्ता पृथिव्यापो तेजस इत्युक्ता
तेजसो वायुर्वायोराकाश इति ब्रूयात् भवेद्विरोधो न चैतदस्ति तस्मादमृषामविवादः श्रुतीनाम् ए
वं सर्वस्मात्तल्लोकान्नसृजन्तेऽस्य क्रमाभिधायिन्या अपि श्रुतेरविरुद्धा एषा हि स्वव्यापारमभिधानमक्र
मेणकर्तृत्वाभिधायिनां क्रमं विरुणद्धि तेन यथाक्रमावस्थिता एवाक्रमेणोच्यते यथाक्रमवंति
तान्नोनिजातानीति तदेवमविगानमभ्युपेत्य तु विगानमुच्यते सृष्टौ कल्वेतद्विगानं न तु सृष्टि
स्त्वपृथक् सर्ववेदांतवाक्येष्वनुस्यूतः परमेश्वरः प्रतीयते नानाश्रुतिविगानमात्रमप्यपलि न च सृष्टि
विगाने स्रष्टरि तदधीननिरूपणो विगानमावहतीति वाच्यं न सृष्टयस्तु सृष्टत्वमात्रेणोच्यते अपि तु स
र्वज्ञानमनंततत्वं ब्रह्मेत्यादिना स्वरूपेणोच्यते स्रष्टा न च स्वरूपं सर्ववेदांतवाक्यानुगतं तत्तत्त्वान

उ॰
२३२
श्री

तथा वाक्यार्थावगमे पर्यवसिते सति प्रमाणांतरविरोधेन वाक्यार्थावगतेरप्रामाण्यप्रसंगं वाक्याविरोध्य
नुत्पादनेन प्रामाण्याप्रामाण्य(स्था)पनमविरोधलक्षणार्थः प्रासंगिकं तु तत्र सृष्टिविषयाणां
वाक्यानां परस्परमविरोधप्रतिपादनेन तल्लक्षणार्थः तत्प्रयोजनं च तत्रैव प्रतिपादयिष्ये इह
तु वाक्यानां सृष्टिप्रतिपादकानां परस्परविरोधे ब्रह्मणि जगद्योनौ न समन्वयः सेद्धुमर्हति त
था च न जगत्कारणत्वं ब्रह्मणो लक्षणं न च तत्र गतिसामान्यं न च तस्मिन् रूपे प्रधानस्याशब्दत्व
प्रतिपादनं तस्माद्वाक्यानां विरोधाविरोधाभ्यां उक्तार्थाक्षेपसमाधानाभ्यां समन्वय एवोपपा
द्यत इति समन्वयलक्षणे संगतमिदमधिकरणं वाक्यानां कारणे कार्ये परस्परविरोधतः सम
न्वयो जगद्योनौ न सिध्यति यत आत्मनि सदेव सोम्येदमग्र आसीदित्यादीनां कारणविषयाणां अस
द्वा इदमग्र आसीदित्यादिभिर्वाक्यैः कारणविषये विरोधः कार्यविषयाणामपि भिन्नक्रमाक्रमो
त्पत्तिप्रतिपादकानां विरोधः तथा कानिचित् स्वकर्तृकां जगदुत्पत्तिमाचक्षते वाक्यानि का।
निचित् स्वयंकर्तृकां सृष्टां च कार्यं कारणात् तथा ब्रह्म लक्षितं सृष्टिविप्रतिपत्तौ तत्कारणता
यां ब्रह्मलक्षणे विप्रतिपन्नो समन्वयो भवति तत्स्वरूपे ब्रह्मण्यपि विप्रतिपत्तिः तस्माद्ब्रह्मणि समन्व
याभावात् समन्वयगम्यं ब्रह्म वेदान्तानां तु कर्त्रादिप्रतिपादनेन कर्मविधिपरतयोपचरितार्थाश्च
विवक्षितार्थाभावाज्जपोपयोगिन इति प्राप्ते क्रमादीनामादिग्रहणेनाक्रमो गृह्यते एवं प्राप्ते उच्यते
सर्गक्रमविवादेपि न स्रष्टृविप्रतिपद्यते सत्त्वमसत्त्वं चाभक्त्या निराकार्यं तथा कांचित् न ताव

हि लूयते केदारः स्वयमेवेति वा लूयते केदार इति वा लवितारं देवदत्तादिप्रतीतिरिति यत्नमपि तमुपस्था
वा.च. पयत्येव तस्मात्सर्वमवदातं जगद्वाचित्वात् न त्वब्रह्म ते ब्रवाणीति ब्रह्माभिधानप्रकरणात् उप
प्र.च. संहारे च सर्वान्पाप्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यं पर्येति य एवं वेदेति निरतिशयफ।
१३२ लश्रवणात् ब्रह्मवेदनादन्यतस्तदसंभवात् आदित्यचन्द्रादिगतः पुरुषः कर्ता तस्य च यस्य चैतत्
१० कर्मेति चास्मिन्वाक्ये इदं सर्वनाम्ना प्रत्यक्षसिद्धस्य जगतः परामर्शेन जगत्कर्तृत्वस्य च ब्रह्मणो
ऽन्यत्रासंभवात् कथं जीवमुख्यप्राणशङ्का उच्यते ब्रह्म ते ब्रवाणीति बालाकिना गार्ग्येण ब्रह्मा
भिधानं प्रतिज्ञाय ततस्तदादित्यादिगताब्रह्मपुरुषाभिधानेन न तावत् ब्रह्मोक्तं यस्य चाजातशत्रो
132 र्यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्मेति वाक्यं न तेन ब्रह्माभिधानं प्रतिज्ञातं न
चान्यदीयेनोपक्रमेणान्यस्य वाक्यं नियन्तुं तस्मादजातशत्रोर्वाक्यसंदर्भे पौर्वापर्यालोच
नया योऽयमर्थः प्रतिभाति स एव न्याय्यः अत्र च कर्मशब्दस्तावद्व्यापारे निरूढवृत्तिः कार्ये तु
क्रियत इति व्युत्पत्त्या वर्तते न च रूढौ सम्भवन्त्यां व्युत्पत्तिर्युक्ता आश्रयितुं न च ब्रह्मण उदासीनस्या
परिणामिनो व्यापारवत्ता वाक्यशेषे चाप्यस्मिन् प्राण एवैकधा भवतीति श्रवणात् परि के.
स्पन्दलक्षणस्य कर्मणोऽत्रोपपत्तिः स एव वेदितव्यतयोपदिश्यते आदित्यादिगतपुरु १३२
षकर्तृत्वं च प्राणस्योपपद्यते हिरण्यगर्भरूपप्राणावस्थाविशेषत्वादादित्यादिदेवतानां कतम १०
एको देवः प्राण इति श्रुतेः उपक्रमानुरोधेन चोपसंहारे सर्वपाप्मनः सर्वान् पाप्मन इति च स

च फलवत्त्वं ब्रह्मविदाप्नोति परं तरति शोकमात्मविदित्यादिश्रुतेः सृष्ट्यादिज्ञानस्य फलं श्रूयते तेन फ
लवत्सन्निधावफलं तदङ्गमिति सृष्टिविज्ञानं ब्रह्मविज्ञानाङ्गं न तु स्वगुणं सत् ब्रह्मज्ञानावतारोपा
यतया व्याख्येयं तथा च श्रुतिः अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छेत्यादिका शुङ्गेनाग्रेण कार्येणेति
यावत् तस्मान्न सृष्टिविप्रतिपत्तिः सृष्टिविप्रतिपत्तिमावहत्यपि तद्गुणत्वमापकल्पनेति तदनु
गुणतया व्याख्येया यच्च कारणे विगानमसद्वा इदमग्र आसीदिति तदप्येष श्लोको भवतीति पूर्व
प्रकृते सद्रूपस्याकृष्याम सदेवेदमग्र आसीदिति स्वयमानेन सतोऽभिधानेः संबद्धस्यात्मश्रुत्यन्तरेण च सा
मानान्तरेण विरोधः तस्मादौपचारिकं व्याख्येयं तदेकस्य भूरु सदेवेदमग्र आसीदिति त्वनिराकार्यं त
योपन्यस्तमिति न कारणे विवाद इति सूत्रे च पाठसूत्रस्यापि पूर्वपक्षं निवर्त्तयति आकाशादिषु सृ ।
ज्यमानेषु क्रमविगानेऽपि न स्रष्टरि विगानं कुतः यथैकस्मिन् श्रुतौ व्यपदिष्टः परमेश्वरः सर्वस्य क
र्त्ता तथैव श्रुत्यन्तरेषु तैः तेन रूपेण कारणत्वेन अपरः कल्पः यथा व्यपदिष्टः क्रमश्चाकाशादि
षु आत्मनः आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवीति तस्यैव क्रम
ऽर्थविकल्पविदः शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति तथा चावस्तुतयानृतं वि
कारजातं मृत्तिकेत्येव सत्यं तस्मात् घटशरावोदंचनादीनां तत्त्वं मृदेव तेन मृद्विज्ञा
तायां सर्वेषामेव तत्त्वं ज्ञातं भवति तदिदं सत्तेन चान्यथैकविज्ञानेन सर्वविज्ञानं सं
पद्यत इति निदर्शनांतरद्वयं दर्शयन्नुपसंहरति तस्मात् यथा घटकरकाद्याकाशानां
मिति ये हि द्वप्नघरूपानते वस्तुसंतो यथा मृगतृष्णिकोदकादयः तथा च सर्वं
विकारजातं तस्मादवस्तु सत् तथा हि यदलितद्रूपमेव यथा विद्यमानं स्फोकदावि
तत्कचित् कथंचिद्व्यभिचरति तत्सर्वदा सर्वत्र सर्वथात्मस्वरूपेण नास्ति न चैवं विकारजा

253

यं नियमः कार्यकारणयोरैकांतिकं भेदमुपकल्पयति अनिर्वचनीयतां वा कार्यस्य पराक्रां
तं चास्माभिः प्रथमेध्याये तदास्तां तावत् तदेतच्छ्रुतियुक्तिनिराकृतमनुवदंतो श्रुतिमुदाह
रति मृत्तिकेत्येव सत्यमिति स्यादेतत् न ब्रह्मणो जीवभावः अर्थापत्त्य इत्यत आह स्वयं प्रसि
द्धं हीति स्वाभाविकस्यानादेरिति यदुक्तं नानात्वं यो न त्वकर्मकांडाश्रयो वैदिको लौकिकश्च
व्यवहारः सेत्स्यतीति तत्राह बाधितं चेति यावद्बाधं हि सर्वोयं व्यवहारः स्वप्नदृष्टायामि
व तदुपदर्शितपदार्थजातस्य व्यवहारः सत्व यथा जाग्रदवस्थायां बाधकान्निवर्त्तते एवं
तत्वमस्यादिवाक्यपरिभावनाभ्यासपरिपाकभुवा बाधाबोधेन ब्रह्मात्मभावसाक्षात्कारेण
बाधकेन निवर्त्तते स्यादेतत् यत्तत्वमसि सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यादिना मिथ्याज्ञा
नाधीनो व्यवहारः क्रियाकारकादिलक्षणः सम्यक्ज्ञानेनापनीयत इति तन्नचेत् किं त्व
वस्थाभेदाश्रयो व्यवहारो ऽवस्थांतरप्राप्तौ निवर्त्तते यथा बालकस्य कामचारवादभक्ष
णतो यत्न प्राप्तौ निवर्त्तते न च तावता सौ मिथ्याज्ञाननिबंधनो भवत्येवमत्रापीत्यत
आह न चायं व्यवहाराभाव इति कुतः तत्वमसीति ब्रह्मात्मभावस्येति न खल्वेतद्वाक्य
मवस्थाविशेषविनियतं ब्रह्मात्मभावमाह जीवस्य पितुर्न भुजगोरज्जुरिव मितिवत्स
दात्तन्नं तमभिवदति अपि च सत्यानृताभिधानेनाप्येतदेवयुक्तमित्याह तस्कर इत्यु
तेन चेति न चास्मिन्नर्थान्तर इति नहि ज्ञातत्वात्मस्पदं इत्कमंडलकुंडलमालिनः कुंडलि

कपरीत्यकाशं वृद्धिलक्षणं ... दृष्टान्त इति चा... इत्यत्र प्रमाणमसिद्धो दृष्टान्त इत्येतस्य वर्णनपूर्वलो
कसिद्धत्वमत्र विवक्षितं अन्यथा ज्ञाने ... परमार्थवादिनं दृष्टान्तः स्याद् इह परमार्थवादिनं प्रति
कत्वेन पितृपुत्रत्वादिनानात्वस्य लौकिकानामसिद्ध इति संप्रत्यनेकान्तवादिनमुपन्यस्यति
नत्वनेकात्मकमिति अनेकाभिः शक्तिभिर्योगः ब्रह्मणो नानाकार्यसृष्ट्युपसंहारयुक्तं ब्रह्मैकं ना
ना चेति किमतो यद्येवमित्यत आह नचैकत्वांशेनेति यदि पुनरेकत्वमेव वस्तुसद्भवेत्ततो
नानात्वाभावात् वैदिकः कर्मकाण्डाश्रयो लौकिकश्च व्यवहारः समस्त एवोच्छिद्येत ब्रह्मयो
चराश्च श्रवणमननादयः सर्वे इत्यन्तजनलयः प्रसज्येरन् एवं चानेकात्मकत्वे ब्रह्मणो
मृदादिदृष्टान्ता अनुरूपा भविष्यन्तीति तमिममनेकान्तवादं दूषयति नैवं स्यादिति इदं ताव
दत्र वक्तव्यं मृदात्मनैकत्वं घटशरावाद्यात्मना नानात्वमिति वदतः कार्यकारणयोः परस्प
रं किमभेदोऽभिमतः आहो भेद उत भेदाभेदाविति तत्राभेदपक्षे एकान्तिके मृदात्मनेति च घट
शरावाद्यात्मनेति चोल्लेखद्वयं नियमश्च नोपपद्यते भेदे चोल्लेखद्वयनियमानुपपत्ति ।
वात्मनेति तत्सामञ्जस्येन समस्य सामान्याद्यात्मसंभवति नवानेकान्तवादः भेदाभेदकल्पे तूल्ले
खद्वयं भवेदपि नियमस्त्वयुक्तः नहि धर्मिणोः कार्यकारणयोः संकरे तद्धर्मो वेकत्वना
नात्वेन संकीर्यत इति संभवति यतश्च मृदात्मनैकत्वं यावद्भवति तावद् घटशरावाद्यात्म
नापि स्यादेवं घटशरावाद्यात्मना नानात्वं यावद्भवति तावन्मृदात्मना नानात्वं भवेत् सो

वाच॰
द्वि॰ ध्या॰
२५४
१२

154

इत्युक्ति सत्यत्वोपपन्नेरिति सत्यत्वाभिमानोपपत्तेरिति यदेकवाक्यमेतत् द्विभजते यावद्धि
न सत्यात्मैकत्वप्रतिपत्तेरिति विकारानेवात्मत्वेन गृहीत्वा देहेन्द्रियादिमात्मभावेन पुत्रपश्वादीन्
ममेत्यात्मीयभावेनेति योज्ञाता वैदिकस्येति कर्मकाण्डमोक्षशास्त्रस्य व्यवहारसमर्पणात्स्वव्य
वहारस्येवेति विभजते यथा स्वप्नस्य प्राक्तनस्येति कथं चानृतेन मोक्षशास्त्रेणेति यदुक्तं तद
नुभाष्य परिहरति कथं त्वसत्येनेति यथा काममन्त्रवक्त्यश्रवणाद्युपायप्रयात्मसाक्षात्कारपर्य।
न्तो वेदान्तसमु ॊ पि ज्ञानविषयः सत्यः सोपि हि वृत्तिरूपः कार्यत्वादनित्यो धर्मोपि।
त्वज्ञस्य स्वभावः साक्षात्कारोऽनादिर्नोकार्यः तत्स्वभावत्वात् तस्माद्वाच्यमेतत् कथमसत्यात्स
त्योत्पाद इति यत्तावदुक्तं नसत्यात्सत्यमुत्पद्यत इति तत्र सत्यस्य समुत्पादः पञ्चोत्पद्यते
तत्सर्वमसत्यमेव सांव्यवहारिकं तु सत्यत्वं वृत्तिरूपस्य ब्रह्मसाक्षात्कारस्य च श्रवणादी
नामप्यभिन्नं तस्मादभ्युपेत्य वृत्तिरूपस्य ब्रह्मसाक्षात्कारस्य परमार्थसत्यत्वं व्यभिचारोद्भा
वनमिति मन्तव्यं यद्यपि सांव्यवहारिकसत्यादेव भयात्सर्पमरणं न सत्यते तथापि भय
हेतुरहिज्ञानं सत्यं ततो भयं सत्यं जायत इत्यसत्यात् सत्यस्योत्पत्तिरुक्तोपपद्यते यद्यपि चाहि
ज्ञानमपि स्वरूपेण सत्यं तथापि न तत् ज्ञानत्वेन भयहेतुरपि त्वभिव्यक्त्याहिविषयितया
न च तज्ज्ञानं रज्जुज्ञानादहिभयप्रसङ्गात् ज्ञानत्वेनाविशेषात् तस्मादनिर्वाच्याहिवि
षयित्वेन भयजनकत्वमिति सिद्धमसत्यादपि सत्यस्योपजनन इति न ब्रूमः सर्वस्यादस

उ॰
२५४
१२

ज्ञानं दंडवज्ज्ञानं कमंडलुमज्ञानं बाधते न तत्प्रहेलोलेषां कुंडलादीनां तस्मिन् भाविकत्वात् त
दृष्टिहापि भाविकगोचरे लोकानां ज्ञानेन तु नानात्व भाविकमपवदनीयं नहि ज्ञानेन वस्तु
पनीयतेपि तस्मिन्मिथ्याज्ञानेनारोपितमिति चेत्ः चोदयति नन्वेकत्वैकान्ताभ्युपगमेऽपि प्र
वाधितज्ञानं धियां तासां सेंद्रियप्रविज्ञानसाधनं प्रमाणमिति प्रमाणाभासलक्षणोपप
ज्ञाप्रमत्तादीनि प्रमाणानामलब्धे एकत्वैकान्ताभ्युपगमे तु तेषां सर्वेषां भेदविषयाणां
वाधितत्वादप्रामाण्यं प्रसज्येत तथा विधिप्रतिषेधशास्त्रमपि भावनाभावभावक
कारणेतिकर्तव्यताभेदापेक्षत्वात् व्याहन्येत तथा चनास्तिक्यमेकदेशाद्वेषणं च
सर्ववेदादेर्पापहेतोस्तानामप्यप्रमाणमिति भेदैकान्ताभ्युपगमहानिः नकेवलं वि
धिनिषेधात्वेषणं एषमोक्षणस्वस्यास्तेयः स्वरूपेणाप्यपि भेदापेक्षत्वादित्याह मोक्ष
प्राप्त्युपायापीति अपि चास्मिन् दर्शने वर्णपदवाक्यप्रकरणादीनां अलीकतानंत्यभव
मद्वैतज्ञानमसमीचीनं भवेत् नावेल्लक्षीकादृष्टान्तुथ्रूमकेतनज्ञानं समीचीनमिति मा
हकथं चानृतेन मोक्षणाद्वेषेणेति परिहरति अत्रोच्यते इति यद्यपि प्रमत्तादीनां ता
त्विकमवाधितं नास्ति प्रत्यागमाभ्यां बाधनात् तथापि व्यवहारेबाधाभावात् सांव्य
वहारिकमवाधनं नहि प्रमत्तादिभिरर्थं परिच्छिद्य प्रवर्तमानो व्यवहारे विसंवाद्य
तेयो सांरिकः कश्चित् तस्मादनपवाधनात्तत्र प्रमाणलक्षणं प्रतिपत्तितिप्रमत्ता

वाव.
हि. ध्या.
१५५
१३

155

मनमस्तकावर्तुं विलंगृत्समतितेषां रूपाणध्वस्तविषयाल्लक्षणतो मांच संच पोत्स्नस्य भीषणं ।
स्फटिकाचलभित्तिप्रतिबिंबतामस्यंमित्रीणांतनुमास्थाय स्वप्ने प्रतिबुद्धो मानुषीमात्मन
स्तनुं पश्यति तदोभयदेहानुगतमात्मानं प्रतिसंधानो देहातिरिक्तमात्मानं निश्चिनोति
न तु देहमात्रं तन्मात्रत्वे देहवत्प्रतिसंधानाभावप्रसंगात् कथं चैतदुपपद्येत यदि स्वप्न ।
दृष्टोवगतिरबाधिता स्यान्नह्यर्थेषु प्रतिसंधानाभावउति भ्रमसंभावप्रसमप्रतीतिः श्रु
तिसिद्धान्तयत्यातिरेकसिद्धाचेत्याह तथाच श्रुतिरिति तथाकारादीतिपद्यपरिरावाल
नृपंसमंतथापि यथा संकेतममस्मंनहिकेतपिनारः संकेतपत्नीहृदयेभ्नेरावाभेदेनापवर्गः
श्रमेतथोऽपित्नीहृदयेरावाभेदोऽकामईदृशश्चकाकामउति तथाचास्मभीचीनातस्मकेता ।
स्मभीचीनवर्गेभ्वगतिरिति सिद्धं यत्र्वोक्तं एकत्वांयोनत्ताभानमात्रव्यवहारःसंत्स्यति
नानात्वांयोनतकर्मकांडाश्रयोलौकिकश्चव्यवहारःसेत्स्यतिउतितत्राह श्रपिचात्मसिदं
प्रमाणमिति यदिवल्लैकत्वानेकत्वनिबंधनो व्यवहाराविकस्पश्रुमोऽपर्यापूणांसंभवतः
ततस्तदर्थमनुभयपसद्भावःकल्प्येतननतेतदस्तिसैकत्वावगतिनिबंधनःकश्चिदस्तिव्यव
हारःतदवगतेःसर्वात्मत्वात् तथाहितत्वमसीत्येकात्म्यावगतिःसमस्तप्रमाणेतत्फ ।
लतद्व्यवहारान्नपवाधमानेनोदीयते नेतस्यापरस्तात्किंचदनुकूलप्रतिकूलंवास्ति
यदपेक्ष्येत येनचैपपत्तिर्द्विष्येतन्ताबनुकूलप्रतिकूलनिवारणान्नातःपरंकिंचिदाका

उ.
१५५
१३

स्त्यणो पदनो यतः समासेपि लक्षुसभावाम्मातृसमहिष्याः वद्धितान्ते मतं स्यात् ...स्त्वषी
तृपत्तान्ने मसंगं उपजातमिति रम्यादितानेनापितनः मत्येन भवितव्यं यतः प्रतिदिनं ...
मताहृष्याः कृतश्चित्किं विरहवनापतेरिति एवमसमस्तानामपि नियमो यतः कृतश्चिदस
न्यासमस्तं कृतश्चिद्समस्तं यथादीवेनादेवर्णं पुरुसमासो पि तत्राविशेषोपि यज्ञीनमित्य ।
तोवाक्यात् न्यायनिविरहमवगाह्य इति यत्न यजिनमित्यतस्तत्समभानोपि नदीर्घभावात्
न्यायनिविरहमवगाह्यतो भवंति भ्रांताः नचोभयत्र दीर्घसमासोपं शतिकाश्चिदस्तिभे
दः तस्मादुपपन्नमसमासादपि समस्यो दयदु इति निदर्शनांतरमाह स्वप्नदर्शनावस्थ
स्येति यथा सांसारिको जायद्गु जनगृहव्यापत्तापतेन ततश्चान्तदेशावे स्नानमाप्नोतिपि
पासः सलिलमालोक्य पात्रं प्रवर्तेते तत्र सत्स्नानाद्यपायपायमाप्याप्रितः स्नानम
नुभवति एवंस्वप्नेपितद्वस्यसर्वमित्यसमस्यान्तार्थसिद्धिः शंकते तत्कार्यमप्यत्र
नभवति एवमपिनासमासान्त्यसमस्यसिद्धिरितिशेषः परिहरति तत्र ब्रूमो यद्यपिस्वप्न
दर्शनावस्थस्येति लौकिको हि स्नानोत्थितावगाम्यं बाधितं मन्यते न तद्वगाति तेन यद्य
पि परीत्य काश्रनिर्वाच्या हि रूपितामवगाति मनिर्वाच्यानिश्चितेति तथापि लौकिकाभि
प्रायेणेदमुक्तं अज्ञानतरं लोकापतिकानां मतमप्यपाकरोति एतेन स्वप्नदृश्यावगाम
बाधनेनेति यद्वा वस्तुयं वैचन्नतारत्नवीवानविकटदन्त्राकरातानननामसुन्नव्यं वंभ

वाच. द्वि. पा. १५६ २४

256

स्यात्कूटस्थनित्यत्वप्रतिपादिकास्तु संति सहस्रं श्रुतयस्तेन परिणामधर्मता ब्रह्मणः अप
कूटस्थस्यापि परिणामः कस्मान्न भवतीत्यत आह नचैकस्येति शंकते स्थितिगतिवदिति
यथैकवाणाश्रये गतिनिवृत्ती एवमेकस्मिन्ब्रह्मणि परिणामस्तदभावश्च कौटस्थ्यं भविष्य
तइति निराकरोति नकूटस्थस्येति विशेषणाद्धीति कूटस्थनित्यता हि सदातनी स्वभावादप्रच्यु
तिः सा कथं प्रच्युमाना न विरुध्यते नच धर्मिणो व्यतिरिच्यते धर्मो येन तदुपजनापायेपि धर्मी
कूटस्थः स्यात् भेदएकांतिके गवाश्ववत् धर्मधर्मिभावाभावात् बाणादयस्तु परिणामिनः स्थि
रागमावपरिणामं तइति अपिच स्वाध्यायाध्यापनविध्यापादितार्थवत्त्वस्य वेदराशेरेकेनापि
वर्णेनानर्थकेन न भवितव्यं किंपुनरियता जगतो ब्रह्मयोनित्वप्रतिपादकेन वाक्यसंदर्भेण
तत्र फलवद्ब्रह्मतत्त्वदर्शनसमाम्नानसन्निधावफलं जगद्योनित्वसमाम्नायमानं तदर्थं सन्
तदुपायतयावतिष्ठते नार्थान्तरायेत्यभिसंधायाह नच तथा ब्रह्मण इति अतो न परिणामपरत्वम
स्येत्यर्थः तदनन्यत्वमित्यस्य सूत्रस्य प्रतिज्ञाविरोधं श्रुतिविरोधं च चोदयति कूटस्थब्रह्मवादि
न इति परिहरति नाविद्यात्मक इति नामरूपप्रपंचेति एकबीजं तस्य व्याकरणं कार्यप्रपंचः तद
पेक्षत्वादैश्वर्यस्य एतदुक्तं भवति नतात्त्विकमैश्वर्यं सर्वज्ञत्वं च ब्रह्मणः किं त्वविद्योपाधिक
मिति तदाश्रयं प्रतिज्ञातत्त्वं तदाश्रयं चेतदनन्यत्वेनाविरोधः सुगममन्यत् भावे चोपल
ब्धेः कारणस्य भावसत्ता चोपलंभश्च तस्मिन्कार्यस्योपलब्धेर्भावाच्च एतदुक्तं भवति विष

उं. १५६ २४

स्यामिति न चैकमपवर्गातिरेकलिंगदीरपोपेक्ष्याहन्न चैकमिति स्यादेतत् अंत्यादेर्द्विमवर्गति: प
र्योत्तन्ना तर्हिं तथा चानपेक्षान्तद्रिकृपादीपेन प्रयोजनवत्त्वे चानोत्मास्यादिमन्तथाहन्न च प
मवर्गतिरन्तर्णिकाक्रतः अविद्यानिवृत्तिफलदर्शनात् नहीयमसन्मज्ञानसत्ती पश्चाद्दिद्यो
निवर्तते प्रतिपन्नताम्नास्यात् किं तर्हि विद्याविरोधस्वभावानुपातन्निवृत्तास्मामेवोदयते अवि
द्यानिवृत्तिश्च तत्कार्यतया फलमपि तत् उच्यते पेष्ठल ज्ञानन्यात्मत्वस्येति प्रतिकूलं प
रावीनं निराकर्तुमाह भ्रांतिर्वेति अतःबाधकेति स्यादेतत् माभूदेकत्वनिर्बंधनो व्य
वहारोनेकत्वनिर्बंधनोस्त्वस्ति तदेव सकलाबाधद्यतिलोकयात्रा अतस्तत्सिद्ध्यर्थं
अनेकत्वस्य कल्पनीयतानिकान्तमित्यत आह शंकेति व्यवहारो हि बुद्धिपूर्वकारिणां
बुद्ध्योपपद्यते न तत्त्यात्तात्विकत्विनभीत्यापितदुपपत्तेर्विस्मावेदितं स संचलदविसंवा
दात् अन्तं तच्च विचारासहतया निर्वाच्यत्वात् अन्यथैकात्म्यत्तानत्मापेक्षतयावाध्य
कत्वमनेकत्वत्तानस्य च प्रतिपाधियहापेक्षतया उर्वलत्वेनवाच्यत्वे वस्तु पकृतमुपसं
हरति तस्मादंत्येन प्रमाणेनेति स्यादेतत् न वयमनेकव्यवहारसिद्ध्यर्थं अनेकत्वस्य
तात्विकत्वं कल्पयामः किं तर्हि भेदमेवास्ताविकत्वमितिवोद्दूपतिनन्नमृदादीति परिह
रति नेत्यंच्यतं इति मृदादिदृष्टांतेन हि कर्यंचित् परिणामवतं ज्ञेयोन च पाकरु एतमपि भ्र
तिकेन्यं वसत्यमिति कारणमात्रसत्यत्वावधारणेनकार्यं प्रस्यानृतत्वं प्रतिपादनात् सो

वाच॰
द्वि॰ प्रा॰
२५७
२५

भेदयोरभेदेऽनुपपत्तिरित्युपपादितं तस्मात् किंचिदेतत् अनया च दिशा मूलकारणं ब्रह्मैव
परमार्थसत् अवान्तरकारणानि च तत्तन्त्वादय: सर्वे अनिर्वाच्या एवेत्याह तथा च तंतुष्वितिस
ल्लायावरस्वविभज्यतेऽतस्मैति न केवलं श्रुतिरुपपत्तिश्चात्र भवति यत्तु परात्मनेति न हि ।
तैलं सिकतात्मना सिकतायामस्ति यथा घटोस्ति मृदि मृदात्मना अनुगतो हि घटो मृदात्मनो
पलभ्यते नैवं अनुगतं तैलं सिकतात्मना तेन यथा सिकतायास्तैलं न जायते एवमात्मनोऽपि न
गत्स्या जायते जायते च तस्मात् तदात्मनासीदिति गम्यते उपपत्त्यन्तरमाह यथा च कारणं ब्र
ह्मेति यथा हि घट: सर्वदा सर्वत्र घट एव न जातु स शोकचित्पटो भवति एवं सदपि सर्वत्र सर्व
दा सदेव न तत् कदाचिदसद्भवितुमर्हतीत्युपपादितमधस्तात् तस्मात्कार्यं त्रिष्वपि
कालेषु सदेव सत्त्वं चेत्किं सतो यद्येवं इत्यत आह एकं च पुनरिति सत्त्वं चैकं कार्यकारणयो:
न हि प्रतिव्यक्ति सत्त्वं भिद्यते तत्रस्थाभिन्नसत्तानन्यत्वात्ततोऽपि मिथो न भिद्यत इति न च तत् ।
भ्यामनन्यत्वात् सत्त्वस्यैव भेद इति युक्तं तथा सति हि सत्त्वस्य समारोपितत्वप्रसंग: तत्र भे
दाभेदयोरन्यतरस्य समारोपकल्पनायां किं तात्त्विकाभेदोपादानाभेदकल्पना आहो तात्त्वि
कभेदोपादानाऽभेदकल्पनेति विपर्ययस्तु युक्त: भेदग्रहस्य प्रतियोगिग्रहापेक्षत्वात् भे
दग्रहमंतरेणाप्यव प्रतियोगिग्रहासंभवात् अन्योन्याश्रयापत्ते: अभेदग्रहस्य च निरपेक्ष
त्वात्तदनुपपत्ते: एकेऽश्वाश्रयत्वात् भेदस्य [illegible] भावे तदनुपपत्ते: अभेदग्रहोपादाने

257.

३
२५७
२५

यपदं विषयविषयिपरं विषयिपदमपि विषयिविषयपरं तेन कारणोपलंभभावत्वो रूपादेरपो
पलंभभावादिति सूत्रार्थः ॥ ननु यत्र तथाच ग्रभावरूपानुविद्धबुद्धिबोध्येन चान्वेषणेन व्यभिचा
रो नापि वह्निभावाभावानां वृत्त्यापि भावाभावेन श्रुतमभेदेनेति सिद्धं भवति ननु यथा क्रमप्रदे
तो रेकदेशाभिधानेनोपक्रमते भाष्यकारः इतश्चाकारणादन्यत्वं भेदाभावः कार्यस्य ।
तावरणं यस्मात्कारणाद्भाव एव कारणमेवेति अत्र व्यतिरेकमुखेन गमकत्वमाह न चानिय
मेनेति कार्यकारणयोर्यत्र भावेऽवश्यं हि उपलभ्यते न तन्नियमेनेत्यर्थः हेतुविशेषणं व्य
भिचारे चोदयति न तत्र भावे पीति एकदेशिमतेन परिहरति नेत्युच्यत इति शंकयैकदेशि
परिहारं दूषयित्वा परमार्थपरिहारमाह अपीति तद्देनेन हेतुविशेषणमुक्तं पाठोन्तरेणेद
मेव स्पष्टं व्याचष्टे न केवलां शब्दादेवेति पठन्तीति हि प्रत्यक्षबुध्या तेन तथैवातानविभानावस्था
आलंब्यं तेन तु तदन्तिकिक्तः पटः प्रत्यक्षमुपलभ्यते एकत्वेन तंतूनामेकप्रावरणलक्षण
र्थक्रियाव्यवच्छेदात् बहूनामपि यथैकदेशकालावच्छिन्ना धवखदिरपलाशादयो बहवोपि
वनमिति अर्थक्रियायां च प्रत्येकमसमर्था अप्यन्नारम्भे वा यतिरं किंचिन्मिलिताः कुर्वन्तो
दृश्यन्ते यथा ग्रावाणस्तण्डुलाधारणमेकमेव अन्नारम्भे वा पातर्गतं तंतवो मिलिताः प्रावरण
मेवं वर्षविधनंति न च समवायान्भिन्नयोरपि भेदान्न वस्तापनुतिसाधनं ते अन्योन्याश्रयत्वात्
भेदे हि सिद्धे समवायः समवायाच्च भेदः न च भेदस्थापनान्तरमस्तीति अर्थक्रियाव्यपदेश

वाच॰
ह्नि॰प्रा॰
२५८
२९

एवमेवं यदि संयोगोपि भवेत् ततः को दोषः अयं तत्र संगाभियामसंयोगवत्समवायोपि प्र
तिसंबंधिभिन्नोभिधीयते चानित्यश्चेति अत्रानुपपत्तेः तथा सति समवायिकारणाश्रितमित्यकार
णादेव नाशो यतः एवं संयोगोपि निमित्तकारणादेव जनिष्यत इति समानं तादात्म्यप्रतीति
श्चेति संबंधावगमो हि संबंधकल्पनाबीजं न तादात्म्यावगमः तस्मान्नानात्वैकत्वमयमेवं
धर्मित्वपक्षादिति इति विकल्पेनावयवातिरिक्तमवयविनं दूषयति कथं चकार्यमिति स्थूल
त्वेति मध्यपरभागयोरर्वाग्भागव्यवहितत्वात् अयमस्मत्तावयवव्यासंगमुपिकति यया
वयवस्यालोके ग्रहो भवतु सत्याह नहि वत्कृत्स्नमिति अयवावयवयवशा उति वक्तृत्वमं व्या
हि स्वरूपेणैव व्यासज्य संबंधेन वर्तते उभेकत्वमसंबंधे पाग्रहणोपि न शृङ्गते समस्तव्या।
संगित्वात् तद्रूपस्य अवयवी तु न रूपेणावयवात्तव्याप्नोति अपित्ववयवशः तेन यथा
स्तत्रमवयवैः कृत्स्नमानिव्याप्नुवन् न स्थूलत्वकृत्स्नग्रहणमपेक्षते कतिपयकृत्स्नमस्या
नस्यापि तस्योपलब्धेः एवमवयव्यपीति भावः निराकरोति तद्दीपीति यं कतेगोत्वादि
वदिति निराकरोति नेति यद्यपि गोत्वस्य सामान्यस्य विशेषा अनिर्वाच्यानपरमार्थसं
तः तथा च कास्त्रमनेकपरिसमाप्तिरिति तथाप्यनुपपत्तेः संदन्तदित्यमितिमंतव्यं मुक्ता
कायतोःतेनित्यानिकामस्यात्कारणाभावे हि कार्यमसमवायिकारणमभवेत् अतोनित्य
त्वकत्वादिमर्थः यत्तु तेनतदृश्यात् स्वदवयवेषु व्यापारा विच्छिन्नयापूर्वापरीभावमा

उ॰
२५८
२९

258

व भेदस्यात्मनेति सर्वगत्वदाते अप्रसक्तप्रदेशान्नेति चेन्न धर्मान्तरेणावान्तरभेदोपादानात् व्याकृतम् ।
तान्व्याकृतत्वे च धर्मो विनिर्वचनीयो रत्नमेतत्त्रिंशद्व्याख्यातेन भाष्येण व्याख्यातं ॥ सु
ते: शक्तिं तरां च अतिशयपत्वात् शागवस्थापा इति अतिशयो हि धर्मो नास्त्यतिशयवति
कार्ये भवतमर्हतीति ननु न कार्यस्यातिशयो नियमहेतुरपि तु कारणस्य शक्तिभेदः स
वासत्यपि कार्ये कारणस्य सत्त्वान्नैवमत आह शक्तिश्चेति नान्या कार्यकारणभावना ।
प्यसतीकार्याणमनेति योजना अपि च कार्यकारणयोरिति यद्यपि भावाभावोपलक्षोति तत्रा
यमर्थः उक्तन्यायापि समवायरूपग्रहणस्य प्रत्यवतावितः अनभ्युपगम्यमाने च समवायस्य
समवायिभ्यां संबन्धे विच्छेदप्रसंगोऽवयवावयविद्रव्यगुणादीनां मिथः न ह्यसंबन्धः सम
वायिभ्यां समवायः समवायिनोः संबन्धयेदिति शंकाते अयसमवायः स्वपरमिति यथाहि
सत्वयोगात् द्रव्यकर्मगुणाः सन्तः सत्तेन स्वभावतः एवं सदिति न सत्तान्तरयोगमपेक्ष
ते तथा समवायः समवायिभ्यां संबद्धुं न संबन्धान्तरमपेक्षते स्वयं संबन्धरूपत्वादिति
तदेतत्सिद्धान्तान्तरविरोधापादनेन निराकरोति संयोगोपि तर्हि इति न च संयोगस्य का
र्यतात्कार्यस्य च समवायिकारणाधीनजन्मत्वात् समवायवत्तदनुपपत्तेः समवाय
कल्पना संयोग इति वाच्यम् अजसंयोगात् तदभावप्रसंगात् अपि च संबन्ध्यधीनानि
रूपाणि समवायो यथा संबन्धिरूपभेदेन भिद्यते तत्त्वाशो च न यथेति अपि तन्निरूपक

वाच॰ नासत्त्वमेवेति । असत्कार्यवादी चोदयति न त्वेवं सतीति । प्राक्प्रसिद्धमपि कार्यं कारणविका
द्वि॰ भा॰ रणेन योजयितुं व्यापारो ऽर्थवान् भवेदित्यत आह तदनन्यत्वं चेति परिहरति दोष इति
२५९ उक्तमेतद्यथा भुजंगतत्त्वेन रज्ज्वा भिद्यते रज्जुरेवं विहितत्वाल्लिङ्गिनि कल्पभेदः एवं वस्तुतः ।
२२ कार्यतत्त्वं न कारणाद्भिद्यते कारणस्वरूपमेव विहितत्वात् अनिर्वाच्यं तु कार्यरूपं भिन्नमिवाभि
न्नमिवावभासत इति । तदिदमुक्तं वस्त्वनन्यत्वमिति वस्तुतः परमार्थतोऽनन्यत्वं न विशेषदर्शन
मात्राद्भवति । संव्यवहारिके तु कार्यं विभिन्नत्वान्यत्वे भवत एवेत्यर्थः । अनयैव दिशा समदर्शी
योऽन्यः । असत्कार्यवादिनं प्रति दूषणान्तरमाह पश्य पुनरिति । कार्यस्य कारणादभेदेऽस
259 विषयत्वं कारकव्यापारस्य स्यादित्यभिप्रायेणार्थः । मृत्कारणं ब्रह्मशब्दं तदा चेति सूत्रावय
वमवतार्य व्याचष्टे एवं पूर्वेत्याकार्यस्येति । अतिरोहितार्थमितरत् । पटवच्च यथा च प्राणादि
रिति च सूत्रे निगदव्याख्यातेन भाष्येण व्याख्याते । इतरव्यपदेशाद्धिताकरणादिदो
षप्रसक्तिः । यद्यपि शारीरात्परमात्मनो भेदमाश्रुत्य पक्षयाप्यभेदमपि दर्शयति श्रु
तयो वक्तुः । न च भेदाभेदावेकत्र समवेतौ विरोधात् । न च भेदतात्त्विक इत्युक्तं तेन तस्मात्
परमात्मनः सर्वज्ञान्न शारीरः तत्तत्त्वाभिधते स एव तत्त्वविद्योपदर्शनभेदात् घटकरका उ॰
द्याकाशवदुपाधिभेदेन प्रयुज्यते इत्यहितं चास्मद्रूपं शारीरः तेनामान्तामजीवः परमात्मतया २५९
मनोऽनुभूयते परमात्मात्मत्वमनात्मनोऽभिज्ञानं तु भवति अनत्मभवे सार्वज्ञ्यव्याघातः २२

यद्वे पुत्रघटो यत्तन्तर्भिन्नसुवर्णमुद्गलादर्शनिमित्तादुपचारात्प्रयुज्यते तेषां च सिद्धत्वेन कारणेन
भक्तितिरुपपद्यते घटो भवतीति प्रयोगः इत्यत आह घटस्य चोत्पत्तिः क्रमेणैतदुत्पाद
नादि सिद्धानां कपालकुलालादीनां व्यापारो नोत्पत्तिः न चोत्पादनैवोत्पत्तिः प्रयोजक
प्रयोजकव्यापारयोर्भेदात् अभेदे वा घटमुत्पादयतीतिवत् घटमुत्पाद्यतऽइत्यपि प्रस
ङ्गात् तस्मात् रोतिकारयत्नोरिव घटगोचरयोः भूतत्वात् सिद्धसमवेतयोः उत्पत्त्युत्पादनयोर
धिष्ठानभेदोऽभ्युपेतव्यः तत्र कपालकुलालादीनां सिद्धानाम् उत्पादनाधिष्ठानत्वमर्हतीति
सत्त्वमस्याभ्युपेयं एवं च घटो भवतीति घटव्यापारस्य यथानुपपन्नत्वात् तत्रापि कर्तृत्वमु
पपद्यते तदुल्लानामिव सतो विच्छित्तौ विच्छिद्यते इति तदुल्लाऽइति शंक्यते अपथलकारण
सत्त्वासत्त्वं पूर्ववोत्पत्तिरिति एतदुक्तं भवति नोत्पत्तिर्नाम कश्चिद्व्यापारो येनास्मिन् दृश्यक
पमकर्तृत्वमित्यत्र प्रयुज्यते किन्तु स्वकारणसमवायः स्वसत्तासमवायो वा सत्तोत्प
त्तिरुच्यत इति सोप्यसतोऽनुपपन्नः इत्याह कथमलब्धात्मक इति अपि च प्रागुत्पत्तेरसतं
कार्यमस्तित्वकार्याभावस्य भावेन सम्पर्कात्कारणमनुपपन्नमित्याह न अभावस्य चेति स्यादेतत्
असन्ताभावस्यैवं प्रागसतस्य माभून् सम्पर्का अपार्थो हि सः घटप्रागभावस्य तु भविष्यता च
टेनोपाधिविशेषस्यास्ति सम्बन्ध इत्यत आह यदि वैषा पुनः कारकव्यापारादितिउक्तमेतद्यथा
तपयानजातघटः पटो भवति एवमसदपि सन्न भवतीति तत एतत् सिद्धे घटसत्त्वं

वाच॰ द्वि॰भा॰ १६० २८ मस्य रूपमपेक्ष्योदयन्यते उत्तानादिनाशरूपबीजसहितं कार्यात्मनि कंसार्वेदं सर्ववेदान्ततत्वं तत्र पूर्वे
स्मिन्कल्पे किं नाम ततो द्वितीयादसहायादुत्पन्नायतेन हि तस्य समुद्रबुद्बुदवत्तत्स्वभावस्य न तस्य स
कार्यमस्ति तथा च श्रुतिः न तस्य कार्यं करणं च विद्यत इति उत्तरस्मिंस्तु कल्पे घटादिकुलालादि
वदसंभवति विक्रमसहकारिकारणाभावात् अनुपादानत्वं साधयेत् ततः क्षीरादिभिर्व्यभिचा
रः तेऽपि वा साधनान्तरादिकारणानपेक्षा एव कालपरिवासवशेन स्वत एव परिणमन्ते यथा।
सादयंति अर्थान्तरकारणानपेक्षत्वे हेतुः किमपत्येनदसिद्धं अनिर्वाच्यनामरूपबीजसहाय।
त्वात् तथा च श्रुतिः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् इति कार्यक्रमेणानत्यविपाको
पि क्रममपान्तुनेयः एकस्मादपि च विचित्रशक्तेः कारणादनेककार्योत्पादो ह्युपपद्यते तथैक
स्माद्वह्नेर्दाहपाकौ एकस्माद्वा कर्मणः संयोगविभागसंस्काराः यदि तु चेतनत्वे सतीति विशेष
णात् न क्षीरादिभिर्व्यभिचारो दृष्टा हि कुलालादयो बाह्यमृदाद्यपेक्षास्तेन च ब्रह्मेति तत्रे
दमुपतिष्ठते देवादिवदपि लोके लोकवत्तेनेति लोकशास्त्ररूपवतस्मिन् कृत्स्नप्रसक्तिः नि
रवयवत्वशब्दकोपो वा न त्वनवयवस्य ब्रह्मणस्तत्वतः परिणामो येन कार्त्स्न्यैकभागविकल्पेनाक्षिप्य शुं. १६० २८
ते अविद्याकल्पितेन नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मना तत्त्वान्यत्वाभ्याम
निर्वचनीयेन परिणामादिव्यवहारास्पदत्वं ब्रह्म प्रतिपद्यते न च कल्पितरूपं वस्तु स्पृशति
नहि चन्द्रमसि तैमिरिकस्य द्वित्वकल्पनानार्द्वं चन्द्रमसः द्वित्वमावहति तदनुपपन्नावा चन्द्रमसो।

तथा चायं जीवात् पृथक् स्वात्मानमेव बध्नीयात् तदेवमुक्तं नहि कश्चिदपरतन्त्रो बन्धनागार
मात्मनः कृत्वानुप्रविशतीत्यादि तस्मान्न चेतनकारणं जगदिति पूर्वपक्षः अधिकं तु भेदनि
र्देशात् सत्यमपृथक्परमात्मा सर्वज्ञत्वाद्यथा जीवाद्भिन्नत्वं तथात्मनोऽभिन्नत्वं पश्यति पश्यते
वन्नभावतः एषा सावदुःखादिवेदनासंयोगोऽस्ति प्रविश्यावयवा नैषां तद्वदभिमान इति तथा
चैतेषां सावदुःखादिवेदनापात्रमण्यदेहे उदासीन इति नतेषां बन्धनागारनिरोधास्ति दृतिः
कश्चिन्ममेति तेषां सावदुःखादि नहि करणस्यादिदोषापत्तिरिति तात्पर्यं ततः तदिदमुक्तं अपि च
यदात्मतत्वमसीत्यपि चेतितः पूर्वोपपत्तिरपादिनं योगपति नोपपन्नमेतस्मादेतद्घटादिवत्सविव
र्तो जगत् हंसमदेक्षवजीवनखेतन्यपश्यत्यागइति श्रुतमाह अश्मादिवच्च तदनुपपत्तिरिति वोदि
तार्थेन भाष्येणख्यापयति उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ब्रह्मणस्त्वेकमद्वितीयत्वं पाप
नपेत्तं क्रमेणैवमपरमात्मन्यपि नानाविधविचित्ररूपसोपादानमुपपद्यते तदनुपपन्नं न सक
रूपात्कारणात्कार्यभेदो भवितुमर्हतीति तस्मात्कस्मिन्कालेऽप्यसंगात् कारणभेदो हि कार्यभेदहे
तुः क्षीरबीजादिभेदात् दध्यंकुरादिकार्यभेददर्शनात् न चाक्रमात्कारणात्कार्यक्रमो युज्यते
समर्थस्य तत्त्वायोगात् अद्वितीयत्वात्पाचक्रमवत्सहकारिसमवधानानुपपत्तेः तदिदमुक्तं
मिहलोक इति एकैकस्य हि कारकं तेषां तु सामग्र्यमध्ये ततो हि कार्यभवमेव तस्मान्नाद्वि
तीयं ब्रह्म जगदुपादानमिति प्राप्त उच्यते क्षीरवद्धीत्यनावगन्तव्यं भाष्यवाचष्टे किं नातिक

वाच॰
द्वि॰ भा॰
२६२
२६

संयुक्तस्याणोरेकमेकमारभ्यते नैत्रिविभिन्नस्याणोरेकस्याणोरेकमेकमारभ्यते इति प्रक्रिया तत्रद्वयोर
णोरनवयवयोः संयोगस्तावदण्वास्नुपादेयान्नवत्वात्तत्र न वर्त्तेत न तस्मिन्सम्भवः स एव
तदाश्रितवर्त्तेतेनवर्त्तेते चेति तथा चोपर्यधः पार्श्वस्थाः षडपि परमाणवः समानदेशा
इति प्रथिमानुपपत्तेरणुमात्रः पिण्डः प्रसज्येत तद्व्यापनेनाषड्त्वपदेः परमाणोः सादिमनव
यवत्वप्रकोपः अथ शक्यं न नावयवत्वमपेतं तथाप्यसम्प्यनतावयवत्वेन संभवेत्तानसंघयोः
समानपरिमाणत्वप्रसङ्गात् तस्मात्समानो दोषः प्रधानमात्रेणासाम्यमन्यत्र परमार्थतस्तु ।
भाविकपरिणामं वा कार्यकारणभावं वा उद्भूतामेषदुर्वारो दोषः न पुनरस्माकं मायावादि
नामियमाह परिहृतास्त्विति विचित्रशक्तित्वमुक्तं ब्रह्मणः तत्र श्रुत्युपन्यासमुपसंहरत्रं सर्वो
पेता च तद्दर्शनात् एतदाक्षेपसमाधानपरं सूत्रं विकरणत्वान्नेति चेत् तदुक्तं कृत्स्नाला ।
दिभ्यस्तावद्बाह्यकरणेभ्यो देवादीनां बाह्यानपेक्षाणामान्तरकरणानपेक्षाणां जग
त्सर्जनं श्रूयमाणं सामान्यतोदृष्टमात्रेणानापह्नवमर्हतीति १० ३ ५९ न प्रयोजनवत्त्वा
त् न तावदुन्मत्तवदस्य मतिविभ्रमात् जगत् प्रक्रियायां तस्य सर्वज्ञत्वानुपपत्तेः तस्मात्प्रे ३॰
क्षावता ऽनेन जगत्कर्तव्यं प्रेक्षावतश्च प्रवृत्तिः स्वपरहिताहितप्राप्तिपरिहारप्रयोजना २६२
सतीतिः प्रयोजनानात्याप्तकामस्य संभवति किं पुनरपरिमेयानेकविधोच्चावचप्रपञ्चज २६
गद्बिम्बविरचना महाप्रयासा [illegible] यातनास्वल्पायासमसाध्या हि [illegible] चेयम

261

ऽनुपपत्तिः तस्मादबालानां परिणाममभ्युपगच्छतां नानुपपद्यमानापि न परमार्थसतो ब्रह्मणोऽनुग्रय
त्तिमावहति तस्मान्नूं पूर्वपक्षाभावात् [illegible] मिदमपि कथमिति तमाह चेतनमेकमिति
पराप्यपि श्रुतिगणात्राद्वैतिकाद्वैतप्रतिपादनपरात्परिणामो वा स्यान्नेति विरुद्धः तथापि दी
यादि देवतादृष्टान्तेन पुनस्तद्वास्तवत्वप्रसंगो पूर्वपक्षोपपन्नां सर्वे पापं पक्षेन घटपितंशवा
तउत्तपपाद्यश्रुतेस्त्वशब्दमूलत्वात् आत्मनि चैवं विचित्राश्च हीतीति तिरश्चाभ्यां विवर्तते हृदीका
त्तोऽन ऐकान्तिकाद्रूपलक्षणाश्रुत्यर्थः परिशेष्यात उत्पत्ते तस्मादसत्यविकल्पतेः प्रश्नतत्त्वतः
नत्रुणाच्चेनापीति चोद्यमविद्याकल्पितत्वो ज्ञा टनापनहि निरवयवत्वसावयवत्वाभ्यां विद्या
तस्मात्तु एकनिषेधस्येतरविधाननान्तरीयकत्वात् तेन प्रकारान्तराभावात् निरवयव
त्वसावयवत्वयोः प्रकारयोरनुपपत्तेः यावत्सवका यपर्यंत चोवदप्रमाणं शास्त्रमूलादिति चो
द्यार्थः परिहारस्तु सूत्रममः आत्मनि चैवं विचित्राश्च हि यनेनस्कु टितो मायावादः स्वप्ने
दृगात्माहि मनसैव स्वरूपानुपमर्देन रथादीन्सृजति स्वपक्षदोषाच्चेत्युपतिनवैने
वेतिपरिहरति नैव जातीयकेनेति परस्यापि समानदोषः सावयवः तथापि प्रत्येकं सत्वादयो
निरवयवाः न सत्त्वादिभिः सम्भवः सत्वमात्रं परिणममतेनरजस्तमसीउति सर्वेषांसंभूयपरि
णामाभ्युपगमात् प्रत्येकं सावयवानां कृत्स्नपरिणामे मूलोच्छेदप्रसंगः एकदेशप
रिणामेषां सावयवत्वमनिच्छन्नप्यापतेत् तथा एवाद्विनोषीति विशेषिकाणां द्व्यणुकाभ्यां

भाम॰
द्वि॰पा॰
२६२
२०

नैगौनैवधोनीरधिरगाधोमहात्मनामांनचैषनकार्येनशिलीमुखैः नवह्नीनचापेनपी
तः संक्षिप्यचुलुकेनहेलयैवकलशयोनिनामहामुनिना नुवाचापिनहृष्यंतेलीला
मात्रविनिर्मितानिमहाप्रासादप्रमदवनानिश्रीमतानृगनरेन्द्रेणान्येषांमनसापिदु ।
ष्कराणि नरेश्वराणांतस्मादुपपन्नंयदह्णपासभावाद्दालीलयावाजगत्सर्जनंभग
वतोमहेश्वरस्येति अपिचनेयंपारमार्थिकीसृष्टिः येनानुयुज्येतप्रयोजनंअपितु
नाद्यविद्यानिबंधनाअविद्याचस्वभावतएवकार्योन्मुखीनप्रयोजनमपेक्षते नहि
द्विचंद्रालातचक्रगंधर्वनगरादिविभ्रमाः समुद्दिश्यप्रयोजनाभवंति नचतत्कार्या ।
विभ्रमभयकंपादयः स्वोत्पत्तौप्रयोजनमपेक्षंतेसाचचेतनप्रवृत्तिताजगदुत्पादहेत
रितिचेतनोजगद्योनिराख्यायतइत्याह नचेयंपरमार्थविषयेति अपिचनब्रह्म
जगत्कारणमपितत्त्वाविवक्षितमागमानामपितुजगतोब्रह्मात्मभावंतथाचसृष्टि
रविवक्षायांतदप्रयोजनदोषोनिर्विषयएवेत्याशयेनाहब्रह्मात्मभावेति ॥ वैषम्यनै
र्घृण्येनसापेक्षत्वात्तथाहिदर्शयति अतितरोहितोत्रपूर्वपक्षः उत्तरंतुव्यक्ते उच्चाव ३॰
चमध्यमसुखदुःखभेदवत्प्राणभृत्प्रपंचंचसुखदुःखविकारणंहर्षविषादिचा २६२
नेकविधंविरचयतः प्राणभृद्भेदोपादानपापपुण्यकर्माशयसहायस्यात्रभवतः २०
परमेश्वरस्यनवैषम्यनैर्घृण्यप्रसज्येतेनहिसभ्यः सभायांयुक्तवादिनपक्षलाधस्मीति

262

प्यप्रयोजनात्तस्याप्यपि स्यात्प्रयोजनत्वाभावे नवाप्रवृत्तौ तदभावे कृतार्थेनानुपप
त्तेः परं द्योचोपकार्यांश्च भावे तदुपकारायाधि प्रवृत्तेरयोगात् तस्मात्से त्वावृत्स्वरू
त्तिः प्रयोजनवत्तयाज्ञातदभावे तदुपपत्त्या व्यासोपादानतानुगतः प्रतीतिरिपतीतिश
त्ते एवं प्राप्ते अभिधीयते लोकवत्तु लीलाकैवल्यं भवेदेतदेवं यदि प्रेक्षावत्प्रवृत्तिः
प्रयोजनवत्त्वयाप्यभावेन नतस्तत्रिवृत्तौ निवर्तेतयियाशयात्तामिवक्षतत्ता निवृत्तौ न
त्वेतदस्ति प्रेक्षावत्तामनतु संहित प्रयोजनत्वानामपि याद्यक्षिकीषु क्रियासु प्रवृत्तिदर्श
नात् अन्यथानकुर्वीतस्तूयावश्यामितिय मस्त्रकृताभाति घयोनिर्विषयः प्रसज्ये
तन चोन्मत्तानामपि तत्सूत्रमर्पवत् तेषां तदर्थवोधे तदनुष्ठानानुपपत्तेः अपिचा
दृष्टहेतुकीष्वपि याद्यक्षिकीषु श्वासप्रश्वासप्रेक्षावतां क्रियासु प्रयोजनानुसंधानमन्तरे
णादृष्टानवाप्यावेतनस्यापि चेतनस्य मुद्गसुपपाधि मेघप्रासादेषपि भावादिति प्रकृते चात्र।
स्यापि चेतनस्याप्रवृत्ते स्वप्नावस्थायां शरीरेऽपि श्वासप्रश्वासप्रवृत्तिप्रसंगात् यथा च।
स्वार्थपरार्थसंपादनसाधितसमस्तकामानां कृतकृत्यतया नाकुलमनसां समकामानां
मेव लीलामात्रं स्वरूपस्य निष्पादितनिःप्रयोजनेन तद्दृष्टेऽपि न प्रवृत्तिरेवं ब्रह्मणोऽपि
जगत्सर्जने प्रवृत्तिर्नानुपपन्ना दृष्टं च पद्मस्य बलवीर्यवद्धीनामप्याकामतिदृष्टान्ते
वा तदन्येषामनलसबलवीर्यवद्धीनामाकामी यन्मरं चन्नाहि वाननरेमांकन्तिप्रभृतिभि

न्याव- सि-व्या- २६२ २२

कुः जन्मजन्मयदभ्यस्तं दानमध्ययनं तपः तेनैवाभ्यासयोगेन तच्चैवाभ्यस्यते पुनरिति अ
नुपेमन्चस्मृतेस्त्वात्विकत्वमिदमुक्तं अनिर्वाच्यात्वस्मृतिरिति तिन प्रसक्तेर्व्यमत्रापि तथापि
मायाकारस्येवांगमाकल्पभेदेन विचित्रात्‌ प्राणेनोदर्शयतो नवै पम्पदोषः सहसामं
हयतोवानने चूएएएवमस्यापि भगवतो विविधविचित्रप्रपंचमनिर्वाच्यविस्त्रंदर्शयतः
संहरतश्च स्वभावादहातीतपावानकाश्चिद्दोष इति स्थिते शंकापरिहारपरं सूत्रं नकर्मा
विभागादिति चेन्नानादित्वात्‌ शंको न रेतिरोहितार्थः नभाष्यं यथेनव्याख्यातं अ
नादित्वादितिसिद्धवदुक्तं तत्साधनार्थं सूत्रं उपपद्यते चाप्युपलभ्यते च अकृते कर्म
णि सुखदुःखपापेवाततत्कर्तभोक्तारमभ्यागच्छेत्‌ तथा च विविधनिबंधनानुमनर्थकं भ
वेत्‌ प्रवृत्तिनिवृत्त्यभावादिति मोक्षशास्त्रस्य चोक्तमानर्थक्यं न चाविद्या केवलेति ल
याभिप्रायं विक्षेपलक्षणाया विद्यायाः संस्कारस्तु कार्यत्वात्सोऽपि न तौ विक्षेपमपेक्ष्य तं विदे
यश्च मिथ्याप्रत्ययो मोहापरनामा पुण्यपापुण्य प्रवृत्तिहेतुभूत रागद्वेषनिदानं सच सु
हरागादिभिः स्वकार्यैर्नशरीरं सावद्‌ः स्वभोगायतनं नंतरेणसंभवति नच कर्मान्त
रेणशरीरं न च रागद्वेषावंतरेण कर्म न च भोगसहितं मोहमंतरेण रागद्वेषौ न च
पूर्वशरीरमंतरेण मोहादिरिति पूर्वपूर्वं शरीरपेक्षो मोहादिरेवं पूर्वपूर्वं मोहाद्य
पेक्षं पूर्वं शरीरमित्यनादित्वेनात्र भावनीतीति चित्तमनाकुलयितिनदेतत्‌ हसामा

263

कु. २६२ २२

वा प्रत्यवायसीति च ब्रुवाणः सभापतिर्वा सत्यवादिनं मनुगृह्णन्नसत्यवादिनं च निगृह्णं
अनुरक्तो द्विष्टो वा भवत्यपि तु मध्यस्थ इति वीतरागद्वेष इति चाख्यायते तद्वदीश्वरः प्र
ण्यकर्माणमनुगृह्णन्नपुण्यकर्माणं च निगृह्णन्‌ मध्यस्थ एव नामध्यस्थः । एवं स
मावमध्यस्थः स्याद्यदि कल्याणकारिणमनुगृह्णीयात्‌ पुण्यकर्माणं वा निगृह्णीयात
नत्वेतदस्ति तस्मान्नैवं वैषम्यदोषोऽस्य एवं न नैर्घृण्यमपि संहरतः समस्तान्प्राणभृतः
सद्धि प्राणभृत्कर्माशयानां वृत्तिनिरोधसमयः तमनतिलंघ्य पुनरपि प्रकृतकारी स्या
त्‌ न च कर्मापेक्षायामीश्वरस्यैश्वर्यं व्याघातः नहि सेवादिकर्मभेदापेक्षः फलभेदप्र
दः प्रभुरप्रभुर्भवति ननु च एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीष
ते एष उ एवासाधु कर्म कारयति तं यमधो निनीषते इति श्रुतिरीश्वर एव द्वेषपक्षपाता
भ्यां साध्वसाधुनी कर्मणी कारयिता स्वर्गं नरकं वा लोकं नयति तस्माद्वैषम्यदोषप्र
संगान्नेश्वरः कारणमिति वाच्यमविरोधात्‌ यस्मात्कर्मकारयितेश्वरः प्राणिनः प्र
ाणिनः सृजतीति श्रुतेरवगम्यते तस्मान्न सृजतीति विरुद्धमभिधीयते न च वैषम्यमा
त्रमत्र ब्रूमो नतीश्वरकारणतं व्यासेधाम इति वक्तव्यं किमतो यद्येवं तस्मादीश्वर
स्य स्वामिना लोकापरामृष्टमभिवदतीनां भूमीनां श्रुतीनामत्र ग्रहापाविनीयते ।
अधो निनीषत इत्येतदपि तज्जातीयपूर्वकर्माभ्यासवशात्प्राणिनस्तु सेवने प्रपद्या

वाच·
द्वि·द्वि·
२६५
५२

इद्वेदांतवाक्यानामिति नहि वेदांतवाक्यानि निर्णेतव्यानीति निर्णीयंते किंतु मोक्षमाण
नांतरज्ञानोत्पादाय यथा चा वेदांतवाक्येभ्यो जगदुपादानब्रह्मावगम्यते एवं सांख्याद्युक्तमा
नेभ्यः प्रधानाद्यचेतनं जगदुपादानं प्रवगम्यते न च तदेव चेतनोपादानमचेतनोपादानं ।
चेति समनुच्चेतं पाकंविरोधात् न च व्यवस्थितवस्तुनि विकल्पो युज्यते न चागमबाधितवि
षयत्वाद्यनुमानमेवनोपादीयत इति संप्रत्नं सर्वेत्रप्रणीततपासांख्याद्यागमस्य वेदागम
वल्यत्वात् नद्धापितस्यानुमानस्य श्रुतिकृतिसिंहत्वस्य तयाऽबाध्यत्वात् तस्मान्नहि दोषस्तत्र
ह्याणामसमन्वयो वेदांतानां मिथ्यैतीति न तत्सलक्षणानेकमुपर्हतीति न च तत्तत्तानाऽहते मोक्ष इति
त्वेनेचाणमप्यनुमानानामाभासीकरणमिह यात्तेषांगानमेवेति यद्येवं ततः परकीयानुमा
नतिनाषष्ठकमस्मात् प्रथमेनकृतं उत्पत्तमाह वेदार्थनिर्णयस्यैवेति ननु वीतरागकथायांत
त्त्वनिर्णयमात्रमुपयुज्यते न पुनः परपक्षाधिक्षेपः सहि मः रागतामावहतीति चोदयति
ननु मुमुक्षूणामिति नाऽस्मेवं तथापीति तत्त्वनिर्णयावसाना वीतरागकथा न च परपक्षदू
षणमंतरेण तत्त्वनिर्णयः शक्यः कर्तुमिति तत्त्वनिर्णयाय वीतरागेणापि परपक्षो दूष्यते
ननु परपक्षपराजयाय पङ्इति न वीतरागकथा तस्माह निर्विमर्षः पुनरुक्ततां परिचोद्य समा
धत्ते न मीह्नतेरिति तत्र सांख्या उतिस्मृतिहि मनदूपलभ्योऽस्या । द्रावसो स्मात समतीयते ।
तानि तत्कारणानि हष्टानि यथा बुद्धादयो नादयस्त्राभ्यो स्मादावसो स्मात्मस्तेव

उ·
२६५
५२

264

द्द्यतो शब्दस्यानादित्वस्य कर्मापेक्षत्वान्न विद्यावैषम्यकारीस्यादिति रागद्वेषमोहाः रागरूपाः तत्र
हि सुरूपं संसारदुःखं वेदेनानुभाव्यमिति स्ततीति क्लेशाः तेषां वासनाः कर्मस्वरूपस्य तु गुणाः
नाभिरा हि स्यात् सर्वथा नित्यानां कर्मणां नित्यतं दर्पयेत्तत्र फलत्वाणा विद्यासाद्दृतत्वं भविष्यत्यपि।
कार्यपदे शब्दोहच्छापथा पुरोडाशं कणान्वेनतत्र घाणानुपचयपतीत्यत आह नच धारयिष्यतीत्यत
श्रीइति तदेवमनादित्वेसिद्धे सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतःकत्वे
रविभागावधारणस्य समुदाचरदूपतागादिति वैधर्म्यं नपुनरेतत्स्वरूपमात्रेणापाकरो
तिउतिसर्वस्य तत्र सर्वधर्मोपपत्तेश्च यत्र सर्वे तत्त्वमितिदृश्यते सर्वस्य चेतनाधिष्ठि
तस्यैव लोके प्रवृत्तिनिवृत्तिलोकानुसारो दर्शितः सर्वज्ञत्वेनिसर्वशक्तिमत्वात् उपादानका
रणत्वनिमित्तकारणत्वे चोपपादिते महामायमिति सर्वानुपपत्तिशंकापरास्तात्तस्माज्ज
गत्कारणं ब्रह्मेति सिद्धं ॥ इति श्रीवाचस्पतिमिश्रविरचिते भगवत्पादशारीरकभा
ष्यविभागे भामत्यां द्वितीयस्याध्यायस्य प्रथमः पादः ॥ रचनानुपपत्तेश्च नानु ।
मानं स्यादेतत् उक्तं हि पादे स्वतंत्रावेदान्तपक्षाः प्रधानादिभिः विपक्षाः सांख्यादि
कपोनिराकरिष्यन्ते तदपुनरुक्तमसमाप्तमेव गततत्वात् नहीदृशा पुनरुक्तमवलन्तके
शास्त्रेव तत्प्रवृत्तमपीतवेदान्तवाक्यानि ब्रह्मपराणीति पूर्वपक्षोत्तरपक्षाभ्यां वि
निश्चितं तत्रकः प्रसंगः शुष्कतर्कवत्तत्त्वतं इत्युक्ति निराकरणस्येत्यत आह यद्यपी

वाच॰
दि॰ दि॰
२६५
रा

दोषे दृष्टान्तधर्मिणि तथा सति पक्षयोर्विरुद्धं न हि प्रकृतस्य वर्णादेर्वादेः कृत्वा लहेमकारस्य प
कारादिभिरधिष्ठिताः कुंभकत्वकारणाद्युपादद्दते तस्मात्कृतकत्वमिव नित्यत्वसाधना
पयुक्तं साध्यविरुद्धेन व्याप्तं विरुद्धमेवं घमन्वयादिचेतनानधिष्ठितत्वे साध्ये इति रव
नानुपपन्नेरितिरुर्थित पद्युच्यते तद्दृष्टान्तधर्मिण्येव चेतनेनतावद्रूपादानं दृष्टं न त्रपद्यपितवे
त्तनप्रयुक्तमपि दृश्यते तथापि तस्य प्रयुक्तत्वे हेतोरप्रयोजकं वहिरंगत्वात् अंतरंगत्वाद
चेतनमात्रमुपादानत्वे हेतोः प्रयोजकं यथाकृः व्याप्तेस्तु दृश्यमानायाः कश्चिद्धर्मः प्र
योजकइति तत्राहुरनत्र मृदादेरिति स्वभावप्रतिबद्धं हि व्याप्यं व्यापकमवगमयति स्वभा
भावप्रतिबंधः सोंकिन्तमसमारोपितोपाधिनिरासेनेति निश्चीयते तत्र अपश्यान्वयव्य
तिरेकयोरापत्तेतेनोवान्वयव्यतिरेकौ न तथोपादानाश्चैतन्येयथा चेतनप्रयुक्तत्वेऽति
परिस्फुटो तदस्मसंज्ञातरंगत्वे नेतिभावः एवमपि चेतनःप्रयुक्तत्वेनोपाधिरुपेयतम।
दिघ्रमाणांतरविरोधोभवेत् अत्रयुक्तस्मृतिरन्वयगुणत्वेनाहन चैवं सतीति चकारेण
स्वावहः स्वादिसमन्वयलक्षणसहेतोरसिद्धत्वं समनुचिनोतिरुमाह यत्तथाप्यनुपपत्ते
श्चेति अंतराः स्वलभीस्वावहः स्वमोहविषादवानासेश्वंस्त्रादिभ्यो प्रतिविष्टिन्नसम
यवेदनीयेभ्योव्यतिरिक्ताः प्रत्यक्षमीक्ष्यते यदि पुनरेत एवस्वादिस्वभावाभवेयुस्त
तततत्स्वरूपत्वाद्रूमितोपि वेदनः स्यादेवं न हि किंचिद्वेदनः कदाचिदवेदनः तथापि

265

उ॰
२६५
रा

णोन्वितानां कारणं: तथा चेदं बाह्याध्यात्मिकं च भावजातं सुखदुःखमोहात्मतयान्वितमु
पलभ्यते तस्मात्तदपि सुखदुःखमोहात्मसामान्यकारणकं भवितुमर्हतीति तत्र यत्कारणं
स एव प्रधानं सुखात्मता तत्सत्त्वं या दुःखात्मता तद्रजः यच्च मोहात्मता तत्तम इति त्रैगुण्यकार
णसिद्धिः तथा हि प्रत्येकं भावास्त्रैगुण्यवन्तोनुभूयन्ते यथा मैत्रदारेषु पद्मावती नामैव मस्य
स्वं तत्कस्य हेतोः स्वं प्रति तस्याः सत्त्वगुणसमुद्भवात् तत्सपत्नीनां दुःखं तत्कस्य हेतोः ताः प्र
ति तस्या रजोगुणसमुद्भवात् चैत्रस्य तदेवैणस्य तामविंदतो मोहो विषादः तत्कस्य हेतोः
तं प्रति तस्यास्तमोगुणसमुद्भवात् एतदावन्यायाच्च सर्वे भावा व्याख्याताः तस्मात्सर्वं सुख
दुःखमोहान्वितं जगत्कारणमपेक्षते तच्च त्रिगुणं प्रधानं प्रधीयते तेन जगदिति वा
निधीयतेऽस्मिन् प्रलयसमये जगदिति प्रधानं तच्च मृत्स्वर्णवदचेतनं चेतनस्य पुरु
षस्य भोगापवर्गौ लक्षणमर्थं साधयितुं स्वभावत एव प्रवर्त्तते न तु केन चित्प्रवर्त्यते न
चाप्यकः पुरुषार्थ एव हेतुर्न केन चित्कार्यन्ते करणमिति परिमाणादिभिरित्यादिग्रह
णेन यान्ति: प्रवृत्तेः कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य सप्तम्यन्ता सिद्धिहेतवो गृ
ह्यन्ते एतैश्चोपरिणामाद्याव्यापनिराकरिष्यति तदेतत्प्रधानानुमानं दूषयति तत्र च
दामरुतिः यदि तावदचेतनं प्रधानमनधिष्ठितं चेतनेन प्रवर्त्तते स्वभावत एवेति माध्य
ते तदयुक्तं समन्वयादेर्हेतोश्चेतनानधिष्ठितत्वविरुद्धं चेतनाधिष्ठानेन मन्त्रवर्णे

वाच. टि. टि. १९९ २४

266

नहि यथा तैः कार्यं जातं प्रविष्टं एवं तानि परस्परं वेविशन्ति मिथः कार्यकारणभावाभावात्
परस्परसंसर्गाल्लावेशाः चितिशक्तौ नास्ति नहि चितिशक्तिः कूटस्थनित्या तैः संसृज्यते तत
स्तत्स्वाप्रकाशगुणत्र इति परिमिता एवं चितिशक्तिरपि गुणैरसंसृष्टेति साऽपि परिमितेत्य
नैकान्तिकत्वं परिमितत्वस्य हेतोरिति तथा कारणकार्यविभागोऽपि समन्वयवद्धि कृत इत्याह
कार्यकारणभावस्त्विति प्रवृत्तेश्च न केवलं रचनाभेदाः न चेतनाधिष्ठानमन्तरेण भवन्ति
अपितु साम्यावस्थायाः प्रच्युतिर्वैषम्यं तथा च पटउद्भूतं कस्रीपलं दण्डप्रभृतं चेतनस्तु
गुणत्रयाधिष्ठितमेव गमे वहि गुणप्रधानभाववैषम्यमहदादौ कार्यप्रवृत्तिः साऽपि चेतनाधि
ष्ठानमन्तरेण प्रवृत्तिं दृष्टप्रधानेऽगभावेन चक्रादेः सलिलस्य ज्ञाद्यपोवतिष्ठन्ते तस्मात्प्रवृत्तेर
पि चेतनाधिष्ठानसिद्धिरिति यावदितः प्रवृत्तेश्च समन्वयमपि हेतुः सांख्यीयो विरुद्ध एव संक्षे
वक्तोऽनयाग्रन्थाद्व्यश्चोदयति न च चेतनस्यापि प्रवृत्तिरिति अयमभिप्रायः तथाहि
तोपनिषदेन महता दृष्टपिताके वलस्य चेतनस्येवान्यनिरपेक्षस्य जगदुपादानत्वं नि
मित्तत्वं च समर्थनीयं तदस्मिन्केवलस्याचेतनस्य प्रवृत्तेः दृष्टान्तधर्मिण्यनुपलब्धेरिति टि. १९९ २५
औपनिषदस्तु चेतनहेतुकानावद्वेषसांख्यैः प्रवृत्तिमभ्युपगच्छन्तु पश्चात्स्वपक्षमत एव
समाधास्यामि इत्यभिसंधिमानाह समनुमतेन न केवलस्याचेतनस्य प्रवृत्तिर्दृष्टेति सांख्यश्चा
हन्न चेतनस्य प्रवृत्तिरिति तथा च औपनिषदं पक्षं व्यावर्तयति अचेतनाश्रयं वस्त्वाश्र

रागोपि कुंकुमपंकः स्याल्लोकभेदेन न स लोको कदाचिद्दृक्कुंकुमपंक इति एवं कंटकः कमल
कस्य स्वाद इति मनुष्याणां नामभिश्रणाभूतामावस्मात् न स लोको कश्चित्सत्यं कंटक इति
तस्मादसत्वादिस्वभावा अपि चंदनकुंकुमादयो जाति कान्ताव्यापापेक्षया सत्वादि
हेतवो न तत्स्वरूपसत्वादिस्वभावा इति रसालोयं तस्मात्सत्वादिरूपसमन्वयो भावानां
मसिद्ध इति नानेन तद्रूपं कारणमव्यक्तं उन्नीयत इति तदिदमसौगताध्यायविशेषपि च
भावनाविशेषादिति भावनावासनासंस्कारः तद्विशेषात्कर्मजन्मसंवर्तकं हि क
र्मकरभोगिनामेव भावनामभिव्यनक्ति यथा सेकेटकादयो चेतनवत्सन्नप्यापि द
ष्ट्वा परिमाणादिति सांख्यीयहेतुमुपन्यस्यति तथा परिमितानां स्वर्गभूर्वतेहि सम
न्येकस्मिन्द्रूपे संभवात् नानानेककार्यसमवेतसमानानाकारणानि संसृष्टानि कल्प
नीयानि तानि च सत्वरजस्तमांसि एवेति भावः तदेतत्परिमितत्वं सांख्यीयपराकृतां लोच
नेनैकांतिकमिति दूषयति सत्वरजस्तमसामिति यदि तावत्परिमितत्वमिष्यनाशान
भसोपि नाशीलः सव्यापको हेतुः परिमाणादिति अथ घटपटानादिमितत्वपरिमाण
मिष्यतां न भसो ब्रूमः किं तव व्यापितां अव्यापि नभस्तन्मात्रादेर्न हि कार्यकारणव्या
पि किं तु कारणं कार्यं व्याप्नोतीति परिमितं नभस्तन्मात्राद्यव्यापितात् इतरसत्वर
जस्तमांस्यपि न परस्परं व्याप्नुवंति न च ततोऽतरपूर्वकं नमतेषामिति व्यभिचारः

वाच॰ द्धिरिति तत्राविवादस्तस्मात् लोकायतिकानामपीति स्यादेतत् देहः स्वयं चेतनः करचरणं।
द्वि॰ द्वि॰ दिमान् तत्व्यापारेण प्रवर्त्तयतीति प्रवृत्तेन तु न तदस्तीति विवक्षितः कूटस्थः निःसङ्गो न तेनो व्यापारवद्धितो
२६९ तानेकस्वभावः प्रवृत्तस्वभावात् प्रवर्त्तकोऽपृक्त इति चोदयति नन्वनवतेति परिहरति किंनाम यस्का
२५ न तद्रूपादिवज्ज्ञेति यथायावद्रूपादयः पादयाइति सौम्योनांहि शब्दे शस्यामुरूपात्स्पशंइंद्रियं विकुर्वन्ति ये
न तर्हि इंद्रियमर्थयामन्यग्रणीकारेण परिणामत इतिस्थितिः संशतिचोदकः स्वामिप्रायमा।
वियुक्ता इति एकत्वात् क्षितिये षाम चेतनं चेतनं वास्ति तेषामेतत् युज्यते व तुं चेतनाधिष्ठितमचे
267 तनं प्रवर्त्ततइति यथायोगिनां ईश्वरवादिनां येषां तु चेतनातिरिक्तं नास्ति ते तवादिनां तेषां प्रव
र्त्तभावेकमिति प्रवर्त्तकत्वे चेतनस्य समर्थः परिहरति नाविद्येति कारणभूतयालयलक्षण
याः विद्यायाप्रायःक्षमर्गी पचिते न च विवर्त्तेप संस्कारेण पत प्रत्युपस्थापितेनामरूपं तदेव
मायातद्वेषोनामचो रस्यासक्तुमस्युक्तत्वात् एतदुक्तं भवति नेयं दृष्टिर्वस्तुसती येना
द्वैतिनो वस्तु सतो द्वितीयस्याभावात् ग्रतुप्रत्यते कात्पनिकात्तदृष्यावस्तिकाल्पनिकं द्वि
तीयं सहायमायामयं यथाहुः महायात्ला हस्था एव यहरेवो भवितव्यतेति न चैवं ब्रह्मोपाद भा॰
नत्वाघातः ब्रह्मण एव मायावेशेनोपादानत्वात् तदधिष्ठानत्वात्तज्जगद्विभ्रमस्य रजत २६९
विभ्रमस्येव शुक्तिकाधिष्ठानस्य शुक्तिकोपादानत्वमिति निरवद्यं यथोत्तु वर्त्तेनाचालि यथा २५
यथोत्तुनोऽश्मनतनानधिष्ठितयोः स्वतएव प्रवृत्तिः एवं प्रधानस्यापीतिशंकापाशः ‹ त्वाशिद्धत

वृत्तिरिष्यते न तु चेतनाश्रयायाः विदर्पितमात्रं चेतनस्य जगत्सर्जने प्रवृत्तिर्विरोधः अत्रौप
निषदो गूढाभिसंधिः प्रश्नपूर्वकं विमृशति किं पुनरत्रेति अत्रोत्तरं सांख्यो ब्रूते ननु य
स्मिन्निति न तावच्चेतनः प्रवृत्त्याश्रयतया तस्य याजकतया चाप्रत्यक्षत्वमिष्यते केवलप्र
वृत्तिः तदाश्रयस्याचेतनो देहरथादिः प्रत्यक्षेण प्रतीयते तथा चेतनस्य प्रवृत्तिः तन्नि
मित्तैव न तु चेतननिमित्ता सद्भावमात्रं तु तत्र चेतनस्य गम्यते रथादिवैलक्षण्येन जीव
देहस्य न तु सद्भावमात्रेण कारणत्वसिद्धिः मा भूदाकाशादेरपि निमित्तत्वं घटादिनिमित्त
कारणत्वमिति हि सर्वत्रेति तदनेन देहातिरिक्तस्यापि चेतनस्य न प्रवृत्तिं प्रति निमि
त्तभावोऽस्तीत्युक्तं यतश्चाश्रयस्यैव प्रवृत्तिहेतुभावोऽस्ति अत एव च प्रत्यक्षे देहे सति प्रवृत्ति
दर्शनादसति चादर्शनाद्देहस्यैव चेतनत्वं लोकायतिकाः प्रतिपन्नाः तस्माच्च न विद्यमाननिमि
त्ताप्रवृत्तिरिति सिद्धं तस्मादचेतनस्यैव प्रवृत्तेर्विद्यमानकारणत्वसिद्धिर्युक्त इति
औपनिषदः परिहरति तदभिधीयते न ब्रूम इति न तावदस्मत्पक्षानुमानानामसिद्धिः
यतो जीवो वा परमात्मा वा अस्माभिर्विवक्षितो साधनीयः केवलमस्य प्रवृत्तिं प्रति कारण
त्वं वक्तव्यं तत्र मृतशरीरे वा रथादौ वा प्रयत्नविशिष्टचेतनेन प्रवृत्तेरदर्शनात्तद्विपर्यये
च प्रवृत्तिदर्शनादन्वयव्यतिरेकाभ्यां चेतनहेतुकत्वं प्रवृत्तेर्निश्चीयते न तु चेतनसद्भा
वमात्रेणापि नातिप्रसंगो भवेत् मृतचेतनिकानामपि चेतनाधिष्ठानादचेतनानां प्र

वा॰च॰ रभावेऽपरिणममाने न तत्र येन चेतनमपेक्षते उपयोगमात्रेण तदपेक्षत्वात् एवं प्रधानमपि स्व
टि॰टि॰ भावत एव परिणंस्यते कृतमत्र चेतनेनेति शंकार्थः येनूपपन्नमेतत् क्षीरादेः क्षीरभावे किंनिमि
२५८ त्तांतरमात्रे निमित्तमपेक्षते उत चेतनं न तावन्निमित्तांतरं येन देहस्य मोदर्शवत्क्षीरादिभेदस्य निमित्तां
तरसंभवात् बुद्धिपूर्वकारी तत्र चापीश्वर एव सर्वज्ञः संभवतीति शंकानिराकरणस्यार्थः त
दिदमुक्तं किं विहेवमंपासमिति अभ्युपगमेऽप्यर्थाभावात् पुरुषार्थापेक्षाभावप्रसंगात् तदि
168 दमुक्तं एवं प्रयोजनमपि किंचिन्नापेक्षतेति अपवर्गाद्युरुषार्थाभावादिति योज्यं तदिदमुक्तं त
थापि प्रवृत्तेः प्रयोजनं विवेक्तव्यमिति न केवलं तावन्निर्मोक्षो भोगोऽप्यनाधेयातिशयस्य कूटस्थनित्य
स्य पुरुषस्य न संभवति अनिर्मोक्षप्रसंगश्च येन हि प्रयोजनेन प्रधानं प्रवर्तते तत्तदनेन कर्तव्यं
भोगेन चेतनस्य वर्तितमिति तमेव उपायान्तर्मोक्षं तेनाप्रवर्तितत्वादित्यर्थः अपवर्गोऽस्त्येषा गापी।
तिचितेः सदा विशुद्धत्वान्नैतस्यां जातकर्मानुभववासनाः संति प्रधाने तु तासामनादीनामा
धारः तस्याश्च प्रधानप्रवृत्तेः प्राक्चिन्मात्रैवेति नापवर्गोऽयमपि तत्प्रवृत्तिरिति शास्त्रार्थश्चेदुपल
ब्धिप्रसंगस्तद्दर्शनमप्रवृत्तं तावत्प्रधानस्य उभयार्थतास्युपगमेऽपीति न तावदपवर्गः साध्यस्त उ॰
स्य प्रधानप्रवृत्तिमात्रेण सिद्धत्वात् भोगार्थं तु प्रवर्तेत भोगस्य च सर्वशब्दाद्युपलंभादेव समा २५८
प्तत्वात् न तदर्थं पुनः प्रधानं प्रवर्तेतेत्यपवर्गाभावो मोक्षः स्यात् निःशेषशब्दाद्युपभोगस्य चा ३६
नंतेन समस्तानंतरनुपपत्तेरनिर्मोक्षप्रसंगः कृतभोगमपि प्रधानमासनंतपुरुषानुगतावयोगात्तेः

नाधिष्ठितत्वं साध्यं न च साध्येनैव व्यभिचारस्तस्यासमानमात्रोद्देशप्रसंगान्न सर्वज्ञाश्य
सत्वभंगात् न वा साध्यांशस्थानामचेतनाधिष्ठानस्यागमसिद्धत्वात् न च सपक्षेणाव्यभिचार
श्रुतियांकानि साकरणस्यायः साध्यपक्षे हेतुपलक्षणासपक्षनिर्दिष्टत्वादित्यपि इत्युक्तं नन्
संहारदर्शनादित्यत्रानपेक्षस्य प्रवृत्तिर्दर्शिता इह तु सर्वस्य चेतनापेक्षा प्रवृत्तिः प्रतिपाद्यत
इति कुतो न विरोध इत्यत आह उपसंहारदर्शनादिति स्थूलदर्शी लोकाभिप्रायानुरोधेन
तदुक्तं न तु परमार्थतः तस्यापि व्यतिरेकानवस्थितेः प्रधानापेक्षत्वात् यद्यपि सांख्यानामपि
त्रिविधकर्मवासनावासितं प्रधानं साम्यावस्थायामपि तथापि न कर्मवासनाः सर्गे सेधा
ते किं तु प्रधानमेव स्वस्वकार्ये प्रवर्त्तमानमधर्मप्रतिबद्धं सत्त्वस्वरूपमपीहृष्टिं कर्त्तुमलम्
स्यत इति धर्मेणाधर्मप्रतिबंधोऽपनीयते एवमधर्मेण धर्मप्रतिबंधोऽपनीयते दुःखम
प्यास्तृष्टौ स्वयमेव प्रधानमपेक्षं सृष्टौ प्रवर्त्तते यथाहुः निमित्तमप्रयोजकं प्रकृतीनां वर
णभेदस्तु ततः क्षैत्रिकवदिति ततश्च प्रतिबंधकापनयमात्रेण धर्माधर्मवासनेऽप्यपि
संनिहिते उत्संगतोऽपेक्षणीयस्याभावात् सदैव साम्येन परिणमेत वैषम्येन वानन्तयं
कादाचित्कः परिणामभेद उपपद्यते ईश्वरस्य तु महाप्रभावस्य चेतनस्य लीलया वा परदुःख
याबा स्वभाववैचित्र्याद्वा कर्मपरिपाकापेक्षस्य प्रवृत्तिनिवृत्ती उपपद्येते एवेति [illegible]
भावाच्चनतृणादिवत् येनृपत्यक्तेहितृणपल्लवादिप्रयासस्वभावं तदेव चेतनानपेक्षं

वाच॰
द्वि॰द्वि॰
१५८
५२

यत्तं निर्गुणत्वादिति शेषमतिरोहितार्थं संगितानुपपन्नेत्यपदिश्यथानावस्थाकृतस्यानित्या
नत्यात्ः प्रत्युतिर्यनित्यत्वप्रसंगात् यथाकुः नित्यत्वमाकुर्विद्वान्सोयत्नभावेन न स्यादिति न
द्विरन्तं तत्त्रूपग्रहणाभयादिति ग्रयपरिणामित्यनित्यायथाकुः यस्मिन्नविक्रियमाणे
यन्नत्वेन विहन्यते तत्तद्यतिनित्यमितितज्ञाहवासमचति यस्याभावस्थपाशविर यर्णा
मत्नकर्णतदेवामतिविलक्षणप्रत्ययोपनिपातेवैधम्र्यमपेति अनपेत्तमस्तनोवैधम्र्य
नकदाचित्साम्यं भवेदित्यर्थः अन्यथानुमितोत्तवशानिविपोगात् एवमपिप्रधानस्य
नित्यत्वसंगितानुपपत्तिरलक्षणोदेषत्वावन्नभवद्भिः शक्यः परिहर्तुमितिवक्ष्यामः अभ्युप
गम्यापि यन्मतादेषत्वमुच्यतइत्यर्थः संगत्वसंगितानुपपत्तिमुपपादयति वैधम्र्योपगम
योगपद्यपीति विप्रतिषेधाच्चाग्रमनसंक्षविसमेतद्विपाक्षेति तद्रुमाव्रमेवहि बुद्धिः
यमनेकद्रूपादियहणमर्थमेकं कर्मेद्विपाकाणिपं चसन्नमं चमनइति सन्नेद्विपाक्षे।
ति कविचीर्णपतत्कवणानि बुद्धिरहंकारोमनइति कविदेकं बुद्धिरिति शेषमतिरो।
हितं अत्राह सांख्यः नतोपनिषदानामपीति तथ्यतापकभावस्तावदेकस्मिन्नपयघेते
नहित्वपिरज्ञितिरवकतं तस्यभावकः किंतयचिरिवकर्मस्थभावकः परसमवेतक्रियाफल
शालित्वकर्मतया चत्वेनधर्म्यक्षतापकसमवेतक्रियाफलशालिनाताप्रकाद्यत्वेन भ
वितव्यं अतन्यनेवेज्ञप्यवमाणुः स्वसमवेतगमनक्रियाफलनगरशालितयानिष्पक १५८
५२

169

क्रियासमभिहारे लभोजनयतीति चेत् अथ पुरुषार्थाय प्रवृत्तं किमर्थं सत्त्वपुरुषान्यताख्यातिं करोति
अपवर्गार्थमिति चेत् हेनार्थं सत्त्वस्य स्वायुपभोगेन कृतप्रयोजनस्य प्रधानस्य निवृत्तिमात्रा
देव सिद्ध्यतीति कृतं सत्त्वान्यताख्यातिप्रतीत्यायेन न चास्याः स्वरूपतः पुरुषार्थत्वं तस्मात्
उभयार्थमपि न प्रधानस्य प्रवृत्तिरुपपद्यत इति सिद्धोर्थाभावः स्वागममन्यत् शंकते द
कृशान्तीति पुरुषो हि दृक्शक्तिसाहाय्यमन्तरेणानर्थिका स्यान्न च स्वात्मन्यर्थवतीत्यात्म
निवृत्तिविरोधात् प्रधानं च सर्गशक्तिः सा सर्जनीयमन्तरेणानर्थिका स्यादिति यथा
नेन शाख्यादिसन्न्याते तदेव दृक्शक्तेः स्वरूपं भवतीति तदुभयार्थं वत्तापसर्जनमिति
शंकार्थः निराकरोति सर्गशक्त्यनुच्छेदवदिति यथा हि प्रधानस्य सर्गशक्तिरेकं पुरु
षं प्रति चरितार्थापि पुरुषान्तरं प्रति प्रवर्त्तते अनुच्छेदादेवं दृक्शक्तिरपि तं पुरुषं प्रत
र्थवत्तापत्तानुच्छेदात्सर्वदा प्रवर्त्तेते न निर्मोक्षप्रसंगः सकृदस्य दर्शनेन वा चरितार्थत्वेन भू
यः प्रवर्त्तेतेति सर्वेषामेकपदे निर्मोक्षः प्रसज्येतेति तत्संसारसमुच्छिद्येतेति पुरु
षाश्मवदिति चेत्तथापि नैव दोषात् व्युत्पत्तिरितिशेषः मा भूत् पुरुषार्थस्य साक्षात्प्रवर्त्तकत्वं स्वभा
प्रवर्त्तकत्वं पुरुष एव दृक्छक्तिसंपन्नः पंगुरिव प्रवृत्तिशक्तिसंपन्नं प्रधानमंधमिव प्र
वर्त्तयिष्यतीति यांकादोषादनिर्मोक्षमाह अभ्युपेत्य हानं तावदिति न केवलमभ्युपेत
हानमप्रयुक्तं चैतन्यात् भवदृष्टमात्रलोचनेनेत्याह कथं चोदासीनस्य सतो निः किं प्रतेः सा

वाच. टि. टि.
१७०
२८

170

बंधमोक्षौ बुद्धिसत्त्वे वर्त्तमानौ कथं चितिशक्तेर्व्यपदिश्येते सत्यपि भागापत्तावस्य न भोक्तेति न
इदमसिद्धं व्याघात इत्याद्यपि कदाचिन्नोपपद्यत इति अत्रोच्यते तदेकत्वादेव तप्यतापकभावा
नुपपत्तेः यत्र एकत्वेन तप्यतापको भावो नोपपद्यते एकत्वादेव तस्मात्सांव्यवहारिकभेदाश्रय
तप्यतापकभावोऽस्माभिरभ्युपेयः तापो हि सांव्यवहारिक एव न तु पारमार्थिक इत्यस्मत्कृदा
वेदित्वं भवेदेव यद्दोषोपपत्तेः कात्मतापांतप्यतापकाख्योऽन्यमपि विषयविषयिभावं प्रतिपद्ये
यातामित्यत्र स्यादभ्युपगमसङ्गतिरेव सांख्योपि हि भेदाश्रयं तप्यतापकभावं ब्रुवाणेन
पुरुषस्य तापिकर्मतामाख्यातुमर्हति तस्मादपरिणामितयापि क्रियाजनितफलशालि
त्वानुपपत्तेः केवलस्य मनो न सत्त्वं तप्यमभ्युपेयं तापकं च रजः दर्शितविषयत्वात् बुद्धिस
त्त्वेन यतः तद्विभागापन्नात्पुरुषोऽप्युक्त तप्यत इत्युच्यते अपरिणामित्वादित्यत्रोक्तं
तद्विभागापन्निश्चाविद्या तया चाविद्याकृत तप्यतापकभावस्त्वयाप्यभ्युपेतः सोऽयम
स्माभिरुच्यमानः किमिति भवतः पुरुषस्याभाति अपि च नित्यत्वाभ्युपगमात् तस्य ताप
कस्यानिर्मोक्षप्रसंगः यः कल्ते तप्यतापकयोर्न्योर्निमित्तेयमीति महदर्शनेन निमित्तेन व रे. १७०
क्ताः इति सन्निमित्तः संयोगः तदपेक्षत्वादिति निराकरोति तद्दर्शनस्य नमस्त इति ततोवह
पुरुषस्य तन्निवृत्तिस्त्वं केवलमियं बुद्धिसत्त्वस्य तापकरजोजनिता तस्य च बुद्धिसत्त्वस्यता २८
मसविपर्यासादात्मनः पुरुषाद्भेदमपश्यतः पुरुषस्य तप्यमानत्वाभिमानः तत्र पुरु

मेत्वप्रसंगात् ग्रस्यत्वेन तप्यतापकाच्चेत्र समवेतया मनक्रियाफलभाजो गम्यमेवमनया
यस्य तप्यत्वोपपत्तेः तस्मादभेदेन तप्यतापकभावो नोपपद्यत इति दृष्टान्तेनेयमाह यदि चे
ति न हि स्वभावाद्वावेतियोगमितेर्ण ववत इति भावः ननु येऽस्मवीचीनरंगपेनादृष्टः स्वा
वाः सन्तः आविर्भावतिरोभावधर्माणो न तु ते जात्वयिः कदाचिदपि मुच्यन्ते नैकं वल्कमे
भावात् तप्यतापकाद्न्यत्वमपि तत्र भवन्ति सिद्धमेवेत्याह प्रसिद्धमाम्नायमिति तथाप्यसौ पा
र्थेन रत्वाणत्वपरागावृत्तिर्हिंसादोषदर्शनाद्नर्थः सत्वप्रवर्तिनं दुःखीतिनद्यपीतप्यः तापकस्मा
र्थः नो चेमोक्तो केप्रतीत भेदाय भेदे चदृष्टान्तमुक्तानितत्कपमेकस्मिन्द्रव्ये भवितुमर्हतीत
त्यर्थः तदेवमौपनिषदं मतमसमंजसमनुक्त्वा सांख्यः स्वपक्षे तप्यतापकयोर्भेदमोत्तमुप
पादयति जात्यन्तरभावेतिति दृक्दर्शनशक्त्योः नित्यसंयोगः तापनिदानं तस्य हेतुरविवेक
दर्शनसंस्कारो विद्यासा च विवेकख्यात्याविद्यया निरोधिताविवर्तते तन्निवृत्तौ तद्धेतुकः
संयोगो निवर्तते तन्निवृत्तौ च तत्कार्यस्तापो निवर्तते तदुक्तं पञ्चशिखाचार्येण तत्संयोग।
हेतुविवर्जनात् स्यादयमात्यन्तिको दुःखप्रतीकार इति अत्र च न साक्षात्पुरुषस्यापरिणा
मिनो बन्धमोक्षौ किं तु बुद्धिसत्वस्यैव चितिच्छायापत्त्या लब्धचैतन्यस्य तत्पाहीच्छानिष्ट गुणस्व
रूपावधारणमविभागापन्नमस्य भोगोऽभोगेस्वभावावधारणमपवर्गः तेन हि बुद्धिसत्वमेवा
पकृष्यते पंतथापि यथा जयः पराजयो वा योधेषु वर्तमानः प्रधान्यात् स्वामिन्युपदिश्यते एवं

वाव· नकारणत्वनादेवसकारणत्वादनित्यौ घेवं परमाणुकारणत्वादेवोऽप्यतः सोऽपि नित्यकार्यत्वः एते
द्वि·द्वि· न निष्ठापत्तिरसहायस्यापि स्यात्वात्वातः सम्भवं च प्रारभ्यते न त्वैवैशेषिकाश्रमत्रकारणत्वैरूपणो वस्तु
२२१ ः चेतनेन चेष्टाकाणाधीनास्मुपादानं तदारब्धमाकाणादिचेतनेभ्यात् कारणगुणप्रक्रमेणाहि
२९६ कार्यवैशेषिकगुणारम्भो दृष्टोऽपपाम्भस्तैलैतन्तुभिरारब्धः पटः शुक्लः न त्वानतो कृष्णो भवत्येवं ।
चेतनारब्धमाकाशादि चेतनं भवेन्नाचेतनं तस्मादचेतनोपादानमेव जगन्न चाचेतनं परमाणु
वः सूक्ष्मात्तावल्लस्थूलस्यो न निर्दिश्यते यथा तन्तुभ्यः पटस्यैव मंशुभ्यस्तन्तूनामेवमपकर्षपर्य
न्तेकारणद्रव्यमतिसूक्ष्ममनवयवमवतिष्ठते तत्स्तुपरमाणुः तस्मात्स्वभाववयवन्तेऽप्युपगम्यमा
।७। ने ऽनन्तावयवत्वेन सुमेरुराजसर्षपयोः समानपरिमाणत्वप्रसंगादनन्तत्वे तत्र च प्रथमेतावद्
दृष्टवत् तेनतत्संयोगाभ्यां परमाणुभ्यां कर्मतत्तोसौ परमाणवेतरेणसंयुज्य द्व्यणुकमारभते वद्दव ।
स्तु परमाणवः संयुक्ताः न महत्स्थूलमारभन्ते परमाणुतेभ्यतिबहुत्वात्तद्घटोपगृहीतपरमा
णुवत् यदि हि घटोपगृहीता परमाणवो घटमारभेरन् नघटे प्रविभज्यमानेकपालशर्करा
द्युपलभ्येत तेषामनारब्धत्वात् तथा सति मृत्कुरस्प्रहाराद्विनाघट
विनाशेन किंचिदुपलभ्येत नदवयवानां परमाणूनामतीन्द्रियत्वात् तस्मान्न बहूनां परमा द्वि·
णूनां द्रव्यं प्रतिसमवायिकारणत्वं अपितु द्वावेव परमाणू द्व्यणुकमारभेते तस्य चाणुत्वे २२१
परिमाणं परमाणुपरिमाणजन्यं तत्परिमाणे ऽनन्यद्व्यणुकंपरत्वेश्वरबुद्धिमपेक्ष्योपमज्ञाद्दिनसे । २९६
व्याऽऽरभतेनचद्व्यणुकमाद्व्यणुकारंभः वैसर्ग्यप्रसंगात् तदपि हि द्व्यणुकमेव भवे।

स्यो विपर्यासस्तस्यैवापि युक्तं तेन तस्य तद्बुद्धितत्त्वस्य साक्षिकत्वाविवेकख्यात्यात्मना मसी ममविवेकख्या
तिर्निवर्त्तनीयान च सतीत्वमसि मूलेशाक्यात्पंतमग्नं तेन पापो हि छिन्नापि छिन्नवदृश्यते पुन
स्तमसोऽग्नं तेन सत्वमभिभूय विवेकख्यातिमयोऽस्य न तथा प्रत्यविद्याविभीषेतेति च तेषाम प
र्वगीकरणेन पद्मिनी दत्तजलांजलीं प्रसत्त्येन प्रसन्नं तेन दोषत्यापह्नोपनिषत्स्विति ।
यथा हि मायाव्यमवलम्बमपि मलिनाद्दर्पणे तत्तोपाधिकल्पितप्रतिबिंबभेदं मलिनतामप्येति न च ।
तद्दृश्यते मलिनं न च बिंबात्प्रतिबिंबं वस्तुतो भिद्यते प्रपञ्चतस्मिन्प्रतिबिंबे मलिनाद्दर्पणाप
धानात् मलिनतापदं लभते तथा चात्मनो मलिनमपि वंपश्यन् देवदत्तस्तस्तु पत्तेपदात्तत्वा
धापनयात् बिंबमेव कल्पनावशात् प्रतिबिंबं तत्त्वावदानमिति तत्त्वमसि वागर्थ इति तदा
प्यतापः प्रत्यक्त्वेन मलिनमेवमुक्तमिति एवमविद्योपधानकल्पितावच्छेदो जीवः पर
मात्मप्रतिबिंबकल्पः कल्पितेन वर्णाद्यादिभिः संपर्केऽनुपपन्ने न तत्तत्त्वतः परमात्मनोऽस्ति
तापः यदा तत्त्वमसीतिवाक्यश्रवणमननध्यानाभ्यासपरिपाकप्रकर्षपर्यन्तजोऽस्य सा ।
क्षात्कारस्तदुत्पन्नायते तदा जीवः शुद्धबुद्धतत्त्वस्वभावमात्मनोऽनुभवन्निर्मृष्टनिखिलवासः ।
नात्क्लेशजालः केवलः स्वस्थो भवति न चास्य पुनः संसारभयमस्ति तद्धेतोरत्वात्तत्वेन सम
मूलकार्षकषितत्वात् सांख्यस्य तमत्तमसोऽप्यकायममस्पन्दत्वादिति तदिदमुक्तं वि
कारभेदस्य च वाचारम्भणमात्रत्वश्रवणादिति प्रधानकारणवाद इति यथैव प्रधा

वाच. इत्यग्रहणमुपलक्षणं न ह्यणुकेऽणुत्वमपि परमाणुवर्त्तिपरिमाणेनारभ्यते नस्य हि न
द्वि.द्वि. संख्यायोनित्वादिमपि इष्टं द्व्यणुके ह्रस्वपरिमाणं त्वारभ्यामिति तनहे गुणिपरं न गुणपरं यद्यपि
१७२ द्व्यणुकेऽत्यविहितत्वेऽप्रमादादेकं द्वे पदं न पठितम् एवं चतुरणुकमित्याद्युपपद्यते उतत्र
